Downloaded from https:// www.studiestoday.com

# संस्कृतवाङ्मयादर्शः ( प्रथमो भागः )

कनिष्ठोपाध्यायः

कक्षा–11

माध्यमिक-शिक्षा-बोर्ड, राजस्थानम्, अजमेरम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्य–पुस्तक–निर्माण–समितिः

संस्कृतवाङ्मयादर्शः (प्रथमो भागः)
कनिष्ठोपाध्याय–कक्षायै स्वीकृतं पाठ्यपुस्तकम्

**संयोजकः लेखकश्च –** डॉ. निरञ्जन साहुः
संभागीय–संस्कृत–शिक्षाधिकारी, अजमेर–संभागः, अजमेरम्।

**लेखकगणः –**

1. डॉ. रघुवीरप्रसादः शर्मा, प्राध्यापकः
   निदेशालय–संस्कृतशिक्षा, राजस्थानम्, जयपुरम्।

2. डॉ. अनिलकुमारः शर्मा, प्राध्यापकः
   निदेशालय–संस्कृतशिक्षा, राजस्थानम्, जयपुरम्।

3. डॉ. अञ्जना पाण्डेय, प्राध्यापिका,
   राजकीय–वरिष्ठोपाध्याय–संस्कृत–विद्यालयः, कुण्डगेट,
   सावरम्, अजमेरम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## शब्दद्वयम्

पाठ्यपुस्तकमिदं विद्यार्थिनां कृते क्रमबद्ध-अध्ययन-पुष्टीकरण-समीक्षा-आगामिस्वाध्यायानाम् आधार: विद्यते। विषयवस्तु-शिक्षणविधीनां दृष्ट्या विद्यालयीय-पाठ्यपुस्तकानां स्तरम् अत्यन्तं महत्त्वपूर्णं भवति। पाठ्यपुस्तकानि कदापि स्थावराणि वा महिमामण्डनकारकाणि न भवेयु:। अद्यापि पाठ्यपुस्तकं शिक्षण-अधिगम-प्रक्रियाया: एकम् अनिवार्यम् उपकरणं विद्यते। यस्य वयम् उपेक्षां कर्तुं नैव शक्नुम:।

विगतवर्षेषु माध्यमिक-शिक्षा-बोर्ड-राजस्थानस्य भाषागत-सांस्कृतिकस्थितीनां प्रतिनिधित्वस्य अभाव: अनुभूयते स्म। एतत् दृष्टिगोचरं कृत्वा राज्यसर्वकारेण नवमी/प्रवेशिका-कक्षात: द्वादशी/वरिष्ठोपाध्याय-कक्षापर्यन्तम् अध्ययनरतानां विद्यार्थिनां कृते माध्यमिक-शिक्षा-बोर्ड-राजस्थान-अजमेरद्वारा स्वकीयं पाठ्यक्रमं संचालयितुं निर्णय: कृत:।

तदनुसारं बोर्डद्वारा शिक्षणसत्र-२०१६-२०१७त: नवमी/पूर्वप्रवेशिका-एकादशी/कनिष्ठोपाध्याय-कक्षाणां पाठ्यपुस्तकानि निर्धारित-पाठ्यक्रमानुसारं प्रस्तुतानि। आशासे यत् एतानि पुस्तकानि विद्यार्थिषु मौलिक-चिन्तन-मनन-स्वाध्याय-अभिव्यक्तीनाम् अवसरान् समुद्पादयिष्यन्ति।

**प्रो.बी.एल.चौधरी**
**अध्यक्ष:**
**माध्यमिक-शिक्षा-बोर्ड-राजस्थान-अजमेरम्**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रास्ताविकं किञ्चित्

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्थता इति मूलमन्त्रमाधारीकृत्य संस्कृतस्याध्यापमध्ययनञ्च भवतः। संस्कृतविभागीयविद्यालयेषु कनिष्ठोपाध्यायकक्षायामध्यापनार्थं माध्यमिक-शिक्षा-बोर्ड-राजस्थानस्य निर्देशेन संस्कृतवाङ्मयादर्शः नाम पुस्तकमिदं लेखकैः प्रस्तुतम्। अत्र संस्कृतवाङ्मयमवगन्तुं विभिन्नेषु पुस्तकेषु पाठ्यांशाः संकलिताः सन्ति। व्याकरणं सर्वशास्त्राणां मुखं वर्तते। अतः प्रोक्तं यद्यपि बहु नाधीषे पठ पुत्र व्याकरणम्। सर्वप्रथमं श्रीमतः वरदराजस्य लघुसिद्धान्त-कौमुदीतः पूर्वकृदन्त-उत्तरकृदन्त-समास-उणादिकोषप्रकरणानि लिखितानि सन्ति। एतेषां प्रकरणानां सूत्रव्याख्या-सिद्धि-भावार्थाः सरलसंस्कृतेन वर्णिताः सन्ति।

द्वितीयभागे संस्कृतसाहित्यस्याधुनिकोपन्यासः गद्यकाव्यान्तर्गतः श्रीमताम्बिकादत्तव्यासेन विरचितः शिवराजविजयः विद्यते। अस्मात् गद्यकाव्यात् प्रथमनिःश्वासः पाठ्यक्रमे गृहीतः। अत्र स्थितानां गद्यखण्डानां प्रसंग-अन्वय-व्याख्या-भावार्थ-व्याकरण-कोषादयः सुलिखिताः।

तृतीयभागे लोकव्यवहारान् परिज्ञातुं नीतिशास्त्राणि विरचितानि सन्ति। अस्मिन् प्रसंगे भर्तृहरिणा विरचितं नीतिशतकं सुप्रसिद्धम्। अस्मात् एकतः पञ्चाशत् श्लोकाः पाठ्यक्रमे निर्धारिताः सन्ति। एषु श्लोकेषु मूर्खनिन्दा, चरित्रनिर्माणं, विद्यामहिमा, सत्संगतेः महत्त्वं, धनस्य महत्ता, च वर्णिताः सन्ति।

चतुर्थभागे श्रीमता अमरसिंहेन विरचितात् अमरकोषात् भूमि-पुर्-शैल-सिंहादिवर्गाः समुद्धृताः। छात्राः कोष-व्याकरणाभ्यां संस्कृतसाहित्याध्ययने पटवः भवितुं शक्नुवन्ति। संस्कृत-वाङ्मयादर्श-पुस्तकमिदं छात्रोपकाराय संस्कृतज्ञानवर्धनाय च सहायकं स्याद् इति आशास्महे।

पुस्तकमिदं सुरुचिरं विधातुं सन्नद्धाः सुलेखकाः व्याख्याकाराः धन्यवादार्हाः। अस्मिन् कार्ये प्रत्यक्ष-परोक्षरूपेण यैः विद्वद्भिः मार्गदर्शनं प्रदत्तम्। वयं तेषां सर्वेषां महानुभावानां कृते हृदयतः कृतज्ञतां साधुवादान् ज्ञापयामः।

**संपादकः लेखकगणश्च**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# विषय– संस्कृतवाङ्मयम्

समय : 3 घण्टे | पूर्णांक : 100

| क्र.सं. | अधिगम–क्षेत्रम् | | अंकभारः |
|---|---|---|---|
| 1. | **लघुसिद्धान्तकौमुदी (कृदन्त, कृत्य प्रक्रिया, उणादि, उत्तरकृदन्त समासः)** | | **40** |
| | (i) रुपसिद्धिः | 25 | |
| | (ii) सूत्र व्याख्या (सोदाहरणम्) | 15 | |
| 2. | **शिवराजविजयः (प्रथमविरामस्य प्रथमनिश्वासः)** | | **20** |
| | (i) सन्दर्भः, प्रसंगः, अन्वयः, व्याख्या, भावार्थश्च। | 10 | |
| | (ii) कविपरिचय–सम्बन्धिनः प्रश्नाः | 2 | |
| | (iii) विषयवस्तु–सम्बन्धिनः प्रश्नाः | 8 | |
| 3. | **नीतिशतकम् (1 तः 50 श्लोकाः)** | | **20** |
| | (i) प्रसंगः, व्याख्या, भावार्थ च। | 10 | |
| | (ii) विषयवस्तु–सम्बन्धिनः प्रश्नाः | 10 | |
| 4. | **अमरकोषः (भूमि–पुर–शैल–सिंहादिवर्गाः)** | | **10** |
| 5. | **रचनानुवादः संस्कृतानुवादः, अशुद्धि संशोधनम्, निबंधलेखनम्** | | **10** |

निर्धारित–पुस्तकम् –

1. संस्कृत–वाङ्मयादर्शः (प्रथमो भागः) – माध्यमिक शिक्षा बोर्ड द्वारा प्रकाशित
2. रचनानुवाद–कौमुदी – डॉ. कपिलदेव द्विवेदी

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# विषय–सूची


| | | |
|---|---|---|
| 1. | (क) कृदन्तप्रकरणम् (कृत्यः–प्रक्रिया) | 1–5 |
| | (ख) पूर्वकृदन्तप्रकरणम् | 6–32 |
| | (ग) उत्तरकृदन्तप्रकरणम् | 33–49 |
| | (घ) समासप्रकरणम् | 50–77 |
| 2. | शिवराजविजयः (प्रथमः निःश्वासः) | 78–121 |
| 3. | नीतिशतकम् (1 तः 50 श्लोकाः) | 122–153 |
| 4. | अमरकोषः | 154–168 |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## श्रीमद्वरदराजाचार्यप्रणीता
## लघुसिद्धान्तकौमुदी
## अथ कृदन्तप्रकरणम्
## अथ कृत्यप्रक्रिया

769. **धातोः ( 3-1-91 ) ।। अधिकारसूत्रम् ।।**
आतृतीयाध्याय - समाप्त्यन्तं ये प्रत्ययाः, ते धातोः परे स्युः। 'कृदतिङ्' इति 'कृत्' संज्ञा।

770. **वाऽसरूपोऽस्त्रियाम् ( 3-1-94 ) ।। परिभाषासूत्रम् ।।**
अस्मिन् धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना।

771. **कृत्याः ( 3-1-95 ) ।। अधिकारसूत्रम् ।।**
ण्वुल्तृचौ (787) इत्यतः प्राक् कृत्यसञ्ज्ञाः स्युः।

772. **कर्तरि कृत् ( 3-4-67 ) ।। विधिसूत्रम् ।।**
'कृत्' प्रत्ययः कर्तरि स्यात्। इति प्राप्ते -

773. **तयोरेव कृत्यक्तखलर्थाः ( 3-4-70 ) ।। विधिसूत्रम् ।।**

774. **तव्यत्तव्यानीयरः ( 3-1-96 ) ।। विधिसूत्रम् ।।**
धातोरेते प्रत्ययाः स्युः। एधितव्यम् एधनीयं वा त्वया। भावे औत्सर्गिकम् एकवचनं क्लीबत्वं च। चेतव्यः चयनीयो वा धर्मस्त्वया।
(वा.) **केलिमर उपसंख्यानम्।**
पचेलिमा माषाः, पक्तव्या इत्यर्थ। भिदेलिमाः सरलाः, भेत्तव्या इत्यर्थः। कर्मणि प्रत्ययः।

---

769. **धातोरिति**- तृतीयाध्यायस्य समाप्तिं यावद् ये प्रत्ययाः कथिताः, ते धातोः परे भवेयुः।'कृत्सञ्ज्ञा'-इति धात्वधिकारे तिङ्भिन्नस्य प्रत्ययस्य 'कृत्' संज्ञा भवति।

770. **वाऽसरूप इति**- वा इत्यव्ययपदम्। वा असरूपः अस्त्रियाम् इतिच्छेदः। समानं रूपं यस्य स सरूपः, न सरूपः असरूपः। धात्वधिकारेऽस्मिन् असरूपोऽपवादप्रत्ययः उत्सर्गस्य विकल्पेन बाधकः स्यात्, स्त्र्यधिकारोक्तम् अपवादं परित्यज्य। यथा ण्वुल्तृचौ इति उत्सर्गौ प्रत्ययौ, तयोः 'इगुपधज्ञाप्रीकिरः कः' इत्यपवादः सरूपो नास्ति, अतः कप्रत्ययविषये ण्वुल्तृचौ अपि भवतः।

771. **कृत्या इति**-अष्टाध्याय्यां तव्यत्, तव्य, अनीयर्, यत्, क्यप् ण्यत् चेति षट्प्रत्ययाः 'कृत्या' इत्यधिकारे उक्ताः। वार्तिककारेण "केलिमर उपसंख्यानम्" इति सप्तमः केलिमर्-प्रत्ययोऽपि प्रतिपादितः। एवं कृत्यप्रत्ययाः सप्त सञ्जाताः।

772. **कर्तरि कृदिति**-कृत्सञ्ज्ञकः प्रत्ययः कर्तरि भवतीति सूत्रतात्पर्यम्।

773. **तयोरेवेति**-एते कृत्यसञ्ज्ञकाः, क्तप्रत्ययः, खल्प्रत्ययार्थाश्च भावकर्मणोरेव स्युः। तत्रापि सकर्मकेभ्यः कर्मणि तथा अकर्मकभ्यो भावे प्रत्ययाः स्युः इति विभागः। यथा एधितव्यम्, एधनीयम्। चेतव्यः, चयनीयः।

774. **तव्यत्तव्येति**- तव्यत्, तव्य अनीयर् चेति प्रत्ययाः धातोः परे भवन्तीत्यर्थः। तव्यत् इति तित्स्वरार्थम्। वा. केलिमर्-प्रत्ययस्यापि उपसंख्यानं कार्यम्। यथा-पचेलिमाः। भिदेलिमाः।

**रूपसिद्धिः**

**एधितव्यम्, एधनीयम्**- एध वृद्धौ इति धातोः "तव्यत्तव्यानीयरः" इति तव्यत्-प्रत्यये, अनुबन्धलोपे, "आर्धधातुकं शेषः" इति आर्धधातुक-सञ्ज्ञायाम्, "आर्धधातुकस्येड्वलादेः" इति इडागमेऽनुबन्धलोपे विभक्तिकार्ये च कृते एधितव्यम् इति रूपं निष्पन्नम्। पक्षे अनीयर् प्रत्यये एधनीयम् इति सिद्धम्।

**चेतव्यः, चयनीयः** - चिञ् चयने इति सकर्मकाद्धातोः कर्मणि "तव्यत्तव्यानीयरः" इति तव्यत्प्रत्ययेऽनुबन्धलोपे, आर्धधातुकसञ्ज्ञायां, गुणे, स्वादिकार्ये च कृते चेतव्यः इति रूपं निष्पन्नम्। पक्षे अनीयर्-प्रत्यये, अनुबन्धलोपे, गुणे, अयादेशे स्वादिकार्ये च कृते चयनीयः इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

775. **कृत्यल्युटो बहुलम्( 3-3-113 ) ।।विधिसूत्रम् ।।**
क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः, क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा समीक्ष्य, चतुर्विधं बाहुलकं वदन्ति॥
स्नान्ति अनेन इति स्नानीयं चूर्णम्। दीयतेऽस्मै दानीयो विप्रः।

776. **अचो यत्( 3-1-97 ) ।।विधिसूत्रम् ।।**
अजन्ताद् धातोर्यत् स्यात्। चेयम्।

777. **ईद् यति( 6-4-65 ) ।। विधिसूत्रम् ।।**
यति परे आत ईत् स्यात्। देयम्। ग्लेयम्।

---

775. **कृत्यल्युट इति**- कृत्याश्च ल्युट् च कृत्यल्युटः, इतरेतरयोगद्वन्द्वः। कृत्याः ल्युट् च धातोः विहिताः बहुलं स्युरिति सूत्रार्थः। बहून् अर्थान् लाति = आदत्ते इति बहुलम् अर्थात् यत् बहून् अर्थान् प्रकटयति।
यथा- 1. **क्वचित् प्रवृत्तिः** - बाहुलकं कार्यं कुत्रचिद् अयोग्यस्थानेष्वपि प्रवर्तते।
2. **क्वचिद् अप्रवृत्तिः** - कुत्रचित् प्रवृत्तियोग्यस्थानेष्वपि न प्रवर्तते बाहुलकात्।
3. **क्वचिद् विभाषा** - बाहुलकात् कुत्रचित् कार्यं विकल्पेन प्रवर्तते।
4. **क्वचिदन्यदेव** -
बाहुलकात् कुत्रचिद् अन्यदपि कार्यं भवितुमर्हति यथा - कृत्यल्युटो बहुलम् इति सूत्रे कृत्याः ल्युट् प्रत्ययश्च 'बहुलम्' इति कथिताः। एतेन इमे प्रत्ययाः प्रतिपादितनियमेभ्यः विपरीत-स्थानेष्वपि प्रवृत्ताः भविष्यन्ति। उदाहरणार्थं यथा कृत्यप्रत्ययाः भावकर्मणोरेव विधीयन्ते परन्तु एते प्रत्ययाः करण सम्प्रदानादि-अन्यकारकेष्वपि दृश्यन्ते-स्नान्ति अनेन इति स्नानीयं चूर्णम् इत्यत्र करणे कृत्यप्रत्ययः (अनीयर्) दृश्यते। दीयतेऽस्मै इति दानीयो विप्रः अत्र सम्प्रदान कारके कृत्य प्रत्ययः भवति।

**रूपसिद्धिः**

**पचेलिमाः ( माषाः )**- डुपचष् (पच्) पाके इत्यर्थे सकर्मकत्वात् कर्मणि ''केलिमर उपसंख्यानम्'' इति केलिमर्-प्रत्यये, अनुबन्धलोपे ''स्वौजस.'' इत्यादिना सूत्रेण जस् प्रत्यये पचेलिमा इति रूपं सिद्धम्।
**भिदेलिमाः ( सरलाः )**- भिदिर् विदारणे इति धातोः सकर्मकत्वात् कर्मणि ''केलिमर उपसंख्यानम्'' इति केलिमर्-प्रत्यये, अनुबन्धलोपे, ''स्वौजस.'' इत्यादिना सूत्रेण जस् प्रत्यये ''प्रथमयोः पूर्व सवर्णः'' इति पूर्वसवर्णदीर्घे, सस्य रुत्वे विसर्गे च कृते भिदेलिमाः इति रूपं सिद्धम्।
**स्नानीयम्** - स्नान्त्यनेन इत्यर्थे अकर्मकात् स्नाधातोः भावे प्राप्तौ अपि ''कृत्यल्युटो बहुलम्'' इति सूत्रेण बाहुलकात् करणे अनीयर्-प्रत्यये, ''स्वौजस.'' इत्यादिना प्रथमैकवचने सु-प्रत्यये, ''अतोऽम्'' इति अमादेशे, ''अमि पूर्वः'' इति पूर्वरूपे कृते स्नानीयम् इति रूपं सिद्धम्।
**दानीयो ( विप्रः )** - दीयतेऽस्मै इत्यर्थे दाधातोः ''कृत्यल्युटो बहुलम्'' इति बाहुलकात् सम्प्रदाने अनीयर्-प्रत्यये, स्वादिकार्ये दानीयो (विप्रः) इति रूपं सिद्धम्।

776. **अचो यदिति**- अजन्ताद् धातोर्यत्प्रत्ययो भवतीत्यर्थः यथा चेयम्।

**रूपसिद्धिः**

**चेयम्**- चिञ् चयने इति धातोः सकर्मकत्वात् कर्मणि ''अचो यत्'' इति यत्-प्रत्यये, आर्धधातुकसञ्ज्ञकत्वात्, ''सार्वधातुकार्धधातुकयोः'' इति इकारस्य एकारे गुणे कृते, स्वादिकार्ये 'चेयम्' इति सिद्धम्।

777. **ईद् यतीति**- 'आ' स्थाने 'ई' भवति यत् प्रत्यये परे इत्यर्थः। यथा देयम्। ग्लेयम्।

**रूपसिद्धिः**

**देयम्**- डुदाञ्दाने इत्यस्माद्धातोः ''अचो यत्'' इति सूत्रेण यत्प्रत्ययेऽनुबन्धलोपे, ''ईद्यति'' इति आ स्थाने ई कृते दी य इति जाते। आर्धधातुकसञ्ज्ञकत्वात् ''सार्वधातु.'' इत्यादिना सूत्रेण ईकारस्य एकारे गुणे, स्वादिकार्ये देयम् इति रूपं सिद्धम्।
**ग्लेयम्**- ग्लै हर्षक्षये इति धातोः ''आदेच उपदेशेऽशिति'' इति ऐ स्थाने आत्त्वे, ग्ला य इति जाते, ''अचो यत्'' इति भावे यत्-प्रत्यये, ''ईद्यति'' इति आ स्थाने ई कृते, ग्ली य इति जाते, आर्धधातुकत्वात् ''सार्वधातु.'' इत्यादिना सूत्रेण 'ई' स्थाने एकारे गुणे, स्वादिकार्ये ग्लेयम् इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

778. **पोरदुपधात् ( 3-1-98 ) ।। विधिसूत्रम् ।।**
पवर्गान्ताद् अदुपधाद् यत् स्यात्। ण्यतोऽपवादः। शप्यम्। लभ्यम्

779. **एति-स्तु-शास्-वृ-दृ-जुषः क्यप् ( 3-1-109 ) ।। विधिसूत्रम् ।।**
एभ्यः क्यप् स्यात्।

780. **ह्रस्वस्य पिति कृति तुक् ( 6-1-71 ) ।। विधिसूत्रम् ।।**
इत्यः। स्तुत्यः। शासु अनुशिष्टौ।

781. **शास इदङ्हलोः ( 6-4-34 ) ।। विधिसूत्रम् ।।**
शास उपधाया इत् स्यादङि हलादौ क्ङिति। शिष्यः। वृत्यः। आदृत्यः। जुष्यः।

---

778. **पोरदुपधादिति**– पवर्गान्ताद् अदुपधाद् धातोः यत्प्रत्ययो भवतीत्यर्थः। यथा शप्यम्। लभ्यम्।

**रूपसिद्धिः**

**शप्यम्**– शप् आक्रोशे इति धातोः ''पोरदुपधात्'' इति यत्प्रत्यये, अनुबन्धलोपे, स्वादिकार्ये 'शप्यम्' इति रूपं सिद्धम्।

**लभ्यम्**– डुलभष् प्राप्तौ इति धातोः ''पोरदुपधात्'' इति यत्प्रत्यये, अनुबन्धलोपे स्वादिकार्ये 'लभ्यम्' इति रूपं सिद्धम्।

779. **एति-स्तु-शासिति**– एभ्यो धातुभ्यः क्यप्प्रत्ययः स्यादित्यर्थः।

780. **ह्रस्वस्येति**– ह्रस्वस्य तुक् स्यात् पिति कृति इत्यर्थः। यथा इत्यः। स्तुत्यः।

**रूपसिद्धिः**

**इत्यः** – एतुं योग्यः इत्यर्थे इण्-गतौ इति धातोः ''एतिस्तुशास्वृदृजुषः क्यप्'' इति क्यप्प्रत्यये, अनुबन्धलोपे, कित्त्वाद् गुणाभावे, स्वादि-कार्ये 'इत्यः' इति रूपं सिद्धम्।

**स्तुत्यः**– ष्टुञ्-स्तुतौ इति धातोः ''धात्वादेः षः सः'' इति षस्य सत्वे, ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति टस्य तत्वे स्तु इत्यस्माद् ''एतिस्तुशास्वृदृजुषः क्यप्'' इति क्यप्प्रत्यये, अनुबन्धलोपे ''ह्रस्वस्य पिति कृति तुक्'' इति सूत्रेण तुगागमे, अनुबन्धलोपे स्वादिकार्ये च कृते स्तुत्यः इति रूपं सिद्धम्।

781. **शास् इति**– शास्धातोः उपधायाः इत् स्याद् अङि हलादौ क्ङिति। यथा शिष्यः।

**रूपसिद्धिः**

**शिष्यः** – 'शासितुं योग्यः' इत्यर्थे शासु-अनुशिष्टौ इति धातोः ''एति-स्तु-शास्-वृ-दृ-जुषः क्यप्'' इति क्यप्प्रत्ययेऽनुबन्धलोपे, शास् य इति जाते। ''शास इदङ्हलोः'' इति शास्धातोः उपधाभूतस्य आकारस्य इत्त्वे, शिस् य इति जाते। ''शासिवसिघसीनाञ्च'' इति सस्य षत्वे, स्वादिकार्ये शिष्यः इति रूपं सिद्धम्।

**वृत्यः** – वृञ्- वरणे धातोः कर्मणि ''एतिस्तुशास् वृदृजुषः क्यप्'' इति क्यप्-प्रत्यये, अनुबन्धलोपे, वृ य इति जाते। कित्त्वाद् गुणाभावे, ''ह्रस्वस्य पिति कृति तुक्'' इति सूत्रेण तुगागमे, अनुबन्धलोपे, वृ त् य इति जाते। स्वादिकार्ये 'वृत्यः' इति रूपं सिद्धम्।

**आदृत्यः** – आङ् पूर्वकात् 'दृङ् आदरे' इति धातोः कर्मणि ''एतिस्तुशास्वृदृ जुषः क्यप्'' इति सूत्रेण क्यप्-प्रत्यये, कित्त्वाद् गुणाभावे, ''ह्रस्वस्य पिति कृति तुक्'' इति तुगागमे, अनुबन्धलोपे, आदृत्य इति जाते, स्वादिकार्ये 'आदृत्यः' इति रूपं सिद्धम्।

**जुष्यः** – 'जुषी प्रीतिसेवनयोः' इति धातोः कर्मणि क्यप्-प्रत्यये, अनुबन्धलोपे, ''पुगन्तलघूपधस्य च'' इति गुणे प्राप्ते, कित्त्वात् ''क्ङिति च'' इति गुणनिषेधे, स्वादिकार्ये 'जुष्यः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

782. **मृजेर्विभाषा ( 3-1-113 ) ।। विधिसूत्रम् ।।**
मृजेः क्यब्वा। मृज्यः।

783. **ऋहलोर्ण्यत् ( 3-1-124 ) ।। विधिसूत्रम् ।।**
ऋवर्णान्ताद् हलन्ताच्च धातोर्ण्यत्। कार्यम्। हार्यम्। धार्यम्।

784. **चजोः कु घिण्यतोः ( 7-3-52 ) ।। विधिसूत्रम् ।।**
चजोः कुत्वं स्याद् घिति ण्यति च परे।

785. **मृजेर्वृद्धिः ( 7-2-114 ) ।। विधिसूत्रम् ।।**
मृजेरिको वृद्धिः सार्वधातुकार्धधातुकयोः। मार्ग्यः।

786. **भोज्यं भक्ष्ये ( 7-3-69 ) ।। विधिसूत्रम् ।।**
भोग्यम् अन्यत्।

---

782. **मृजेर्विभाषेति**– मृज्धातोः विभाषया क्यप् स्यात्। यथा मृज्यः।

**रूपसिद्धिः**

**मृज्यः**– मृजूष्-शुद्धौ इत्यस्माद् धातोः ''मृजेर्विभाषा'' इति सूत्रेण क्यप्-प्रत्यये, अनुबन्धलोपे, कित्त्वाद् गुणाभावे, स्वादिकार्ये 'मृज्यः' इति रूपं सिद्धम्।

783. **ऋहलोरिति**– ऋवर्णान्तधातोः हलन्तधातोश्च ण्यत् स्यात्। यथा कार्यम्। हार्यम्। धार्यम्।

**रूपसिद्धिः**

**कार्यम्**– 'डुकृञ्-करणे' इति धातोः ऋवर्णान्ताद् ''ऋहलोर्ण्यत्'' इति सूत्रेण ण्यत्प्रत्यये, अनुबन्धलोपे, कृ य इति जाते, णित्त्वाद् ''अचोञ्णिति'' इति ऋकारस्य आकारे वृद्धौ, ''उरण् रपरः'' इति रपरत्वे, स्वादिकार्ये 'कार्यम्' इति रूपं सिद्धम्।

**हार्यम्**– 'हृञ् हरणे' धातोः ''ऋहलोर्ण्यत्'' इति सूत्रेण ण्यत्-प्रत्यये, अनुबन्धलोपे, हृ य इति जाते, ''अचोञ्णिति'' इति 'ऋ' स्थाने 'आ' वृद्धौ, रपरत्वे स्वादिकार्ये च कृते 'हार्यम्' इति रूपं सिद्धम्।

**धार्यम्**– 'धृञ् धारणे' धातोः ''ऋहलोर्ण्यत्'' इति ण्यत्-प्रत्यये, अनुबन्धलोपे, धृ य इति जाते, ''अचोञ्णिति'' इति ऋकारस्य 'आ' वृद्धौ, रपरत्वे स्वादिकार्ये च कृते 'धार्यम्' इति रूपं सिद्धम्।

784. **चजोरिति**– चस्य जस्य च कुत्व स्याद् घिति ण्यति च परे इत्यर्थः।

785. **मृजेर्वृद्धिरिति**– मृजूष्धातोः इको वृद्धिः स्यात् सार्वधातुके आर्धधातुके च प्रत्यये परे इत्यर्थः।

**रूपसिद्धिः**

**मार्ग्यः**– 'मृजूष्-शुद्धौ' इत्यस्माद् धातोः ''ऋहलोर्ण्यत्'' इति सूत्रेण ण्यत्प्रत्यये, अनुबन्धलोपे, मृज् य इति जाते, ''चजोः कु घिण्यतोः'' इति जकारस्य गकारे कुत्वे, मृग् य इति जाते, लघूपधगुणे प्राप्ते अपवादत्वेन ''मृजेर्वृद्धिः'' इति ऋकारस्य आकारे वृद्धौ, रपरत्वे जलतुम्बिकान्यायेन रेफस्योर्ध्वगमने, स्वादिकार्ये 'मार्ग्यः' इति रूपं सिद्धम्।

786. **भोज्यमिति**– भुज्धातोः भक्ष्येऽर्थे भोज्यं भक्ष्ये इति निपातनाद् 'भोज्यम्' इति रूपं निष्पन्नम्। यथा भोज्यं फलम्, भोज्यः ओदनः, भोज्या यवागूः। भोग्यं राज्यम्, भोग्यः कम्बलः भोग्या वसुन्धरा।

**रूपासिद्धिः**

**भोज्यम्**– 'भुज पालनाभ्यवहारयोः' धातोः ''ऋहलोर्ण्यत्'' इति सूत्रेण ण्यत्-प्रत्यये, अनुबन्धलोपे, भुज् य इति जाते, ''पुगन्तलघूपधस्य च'' इति उपधा-उकारस्य ओकारे गुणे, भोज् य इति जाते, निपातनात् कुत्वाभावे, स्वादिकार्ये 'भोज्यम्' इति रूपं सिद्धम्। अन्येऽर्थे कुत्वेन भोग्यमिति रूपं निष्पद्यते।

(इति कृत्यप्रक्रिया)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासप्रश्नाः

### वस्तुनिष्ठात्मकप्रश्नाः –

1. 'धातोः' इति सूत्रमस्ति –
   (क) अधिकारसूत्रम्  (ख) सञ्ज्ञासूत्रम्
   (ग) परिभाषासूत्रम्  (घ) विधिसूत्रम्
2. कृत्प्रत्ययो भवति –
   (क) कर्तृकर्मणोः  (ख) भावे
   (ग) कर्मणि  (घ) कर्तरि
3. 'पचेलिमाः' इत्यत्र प्रत्ययोऽस्ति –
   (क) एलिमर्  (ख) केलिमर्
   (ग) ऐलिम  (घ) अनीयर्
4. 'चेयम्' इत्यत्र प्रत्ययोऽस्ति –
   (क) क्यप्  (ख) यत्
   (ग) ण्यत्  (घ) ल्यप्

### लघूत्तरात्मकप्रश्नाः –

5. वाऽसरूपोऽस्त्रियाम् इति सूत्रस्यार्थं लिखत।
6. कृत्य-क्त-खलर्थकाः प्रत्ययाः कस्मिन्नर्थे भवन्ति?
7. 'भेत्तव्याः' इत्यस्य केलिमर्-प्रत्ययान्तरूपं किम्?
8. बाहुलकः कतिविधः?
9. यति परे आतः कः आदेशः?
10. अजन्ताद् धातोः यत्-प्रत्ययः केन भवति?
11. 'शप्यम्' इत्यत्र कः प्रत्ययः?
12. 'स्तुत्यः' इत्यत्र कः आगमः केन भवति?
13. 'शिष्यः' इत्यत्र कः धातुः कश्च प्रत्ययः?
14. कार्यम् इत्यत्र कः प्रत्ययः केन भवति?
15. भुज्धातोः भक्ष्येऽर्थे ण्यति किं रूपम्?

### निबन्धात्मकप्रश्नाः –

16. तव्यत्-प्रत्ययान्त विंशतिशब्दानां सारणी लेखनीया।
17. केषाञ्चित् पञ्चप्रयोगाणां सिद्धिः कर्त्तव्या।
    मार्ग्यः, भिदेलिमाः, कार्यम्, भोग्यम्, चेयम्, शिष्यः, शप्यम्।
18. सर्वान् कृत्यप्रत्ययान् लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ पूर्वकृदन्त-प्रकरणम्

787. **ण्वुल्तृचौ ( 3-1-133 ) ।। विधिसूत्रम् ।।**
धातोरेतौ स्तः। 'कर्तरि कृद्' इति कर्त्रर्थे।

788. **युवोरनाकौ ( 3-1-1 ) ।। विधिसूत्रम् ।।**
यु वु एतयोरनाकौ स्तः। कारकः। कर्ता।

---

## अथ पूर्वकृदन्त-प्रकरणम्

787. **ण्वुल्-तृचाविति**-ण्वुल् च तृच् च ण्वुल्तृचौ, इतरेतरद्वन्द्व-समासः।- ''ण्वुल्तृचौ'' इत्यस्मिन् सूत्रे ''धातोः'' इति सूत्रस्याधिकारः समायाति एवञ्च ''कर्तरि कृदिति'' सूत्रनिर्देशेन कर्त्रर्थे कृत्प्रत्ययानां विधानवशात् सूत्रार्थो भवति। **धातोः ण्वुल्तृचौ इत्येतौ प्रत्ययौ स्तः कर्त्रर्थे।** अत्र णकारानुबन्धः वृद्ध्यर्थः लकारानुबन्धश्च लित्स्वरार्थः। तृचः चकारेत्सञ्ज्ञकत्वेन तृन्-तृचोः सामान्येन ग्रहणं भवति। अन्यथा निरनुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणमिति परिभाषाबलात् 'तृच्' इत्यस्यैव ग्रहणं स्यात्, न तु 'तृन्' इत्यस्य।

788. **युवोरिति**- युश्च वुश्च युवुः, तस्य युवोः। समाहारद्वन्द्वः। अत्र सौत्रं पुंस्त्वम्। अनश्च अकश्च अनाकौ, इतरेतर-द्वन्द्वः। ''शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय'' इत्यत्र यथा 'जय' इत्यस्य शत्रुशब्देन 'रञ्जय' इत्यस्य मित्रशब्देन 'भञ्जय' इत्यस्य च विपत्ति शब्देन सहान्वयः क्रमशः भवति। तद्वदेव ''युवोरनाकौ'' इत्यत्रापि अनिर्धारित-सम्बन्ध-विशेषे षष्ठीयोगे स्थानपदस्य स्थान्यादेशयोश्च समसंख्यात्वाद् ''यथा संख्यमनुदेशः समानमिति'' सूत्रार्थतया च प्रकृतसूत्रस्यार्थो भवति, **यद् यु वु इत्यनयोः स्थाने क्रमशः अन-अक-इत्यादेशौ भवतः।**

**रूपसिद्धिः**

**कारकः**- 'डुकृञ्करणे' इत्यस्माद् धातोः ''ण्वुल्तृचौ'' इति सूत्रेण कर्त्रर्थे ण्वुल्प्रत्यये, अनुबन्धलोपे, कृ वु इति जाते, ''युवोरनाकौ'' इति 'वु' इत्यस्य स्थाने 'अक' इत्यादेशे कृ अक इति जाते, ''अचोञ्णिति'' इति सूत्रेण 'कृ' इत्यत्र ऋकारस्य आकारे वृद्धौ, ''उरण् रपरः'' इति रपरत्वे क् आर् अकः इति जाते, ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सूत्रेण प्रथम-पुरुषैकवचने 'सु' प्रत्यये, अनुबन्धलोपे, ''ससजुषो रुः'' इति सूत्रेण सस्य रुत्वे, अनुबन्धलोपे, कारकर् इति जाते, ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे ''कारकः'' इति रूपं सिद्धम्।

**कर्ता**- 'डुकृञ् करणे' इत्यस्माद् धातोः ''ण्वुल्तृचौ'' इति कर्त्रर्थे तृच्-प्रत्यये, अनुबन्धलोपे, कृ तृ इति जाते, ''आर्धधातुकं शेषः'' इति सूत्रेण 'तृ' इत्यस्य आर्धधातुक-सञ्ज्ञायां, ''सार्वधातुकार्धधातुकयोः'' इति 'कृ' इत्यत्र ऋकारस्य 'अ' इति गुणे, ''उरण् रपरः'' इति रपरत्वे, क् अर् तृ इति जाते, जलतुम्बिकान्यायेन रेफस्य ऊर्ध्वगमने 'कर्तृ' इति जाते, ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसञ्ज्ञायां, ''स्वौजस. इत्यादिना सूत्रेण प्रथमपुरुषैकवचनविवक्षायां 'सु' प्रत्यये, अनुबन्धलोपे कर्तृ स् इति जाते, ''ऋदुशनस्पुरुदंसोऽनेहसां च'' इति सूत्रेण ऋकारस्य स्थाने अनङादेशे, अनुबन्धलोपे, कर्तन् स् इति जाते, ''अप्तृन्तृच्. इत्यादिना सूत्रेण उपधादीर्घे, कर्तान् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण सकारलोपे, ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, 'कर्ता' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

789. **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ( 3-1-134 ) ।। विधिसूत्रम् ।।**
नन्द्यादेर्ल्युः, ग्रह्यादेर्णिनि, पचादेरच् स्यात्। नन्दयतीति-नन्दनः। जनमर्दयतीति जनार्दनः। लवणः। ग्राही। स्थायी। मन्त्री। पचः। पचादिराकृतिगणः।

---

789. **नन्दिग्रहीति**- नन्दिश्च ग्रहिश्च पच् च नन्दिग्रहिपच्, नन्दिग्रहिपच्, समाहारद्वन्द्वः। नन्दिग्रहिपच् आदिर्येषां ते नन्दिग्रहिपचादयः, तेभ्यः = नन्दिग्रहिपचादिभ्यः।द्वन्द्वगर्भितबहुव्रीहिः।''द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बद्ध्यते'' इति सिद्धान्तमाश्रित्य द्वन्द्वान्ते श्रूयमाणस्यादिपदस्य प्रत्येकं सह सम्बन्धो भवति, अतः नन्द्यादेः ल्युः, ग्रह्यादेर्णिनिः पचादेश्च अच्प्रत्ययः स्यादिति सूत्रार्थो निष्पद्यते।

**रूपसिद्धिः**

**नन्दनः**- इत्यत्र 'नन्दयतीति' अर्थे 'टुनदि समृद्धौ' इत्यस्माद् धातोः, अनुबन्धलोपे, ''इदितो नुम्धातोः'' इति सूत्रेण नुमागमेऽनुबन्धलोपे नन्द् इति जाते ''हेतुमति च'' इति सूत्रेण णिच्-प्रत्ययेऽनुबन्धलोपे, नन्दि इति जाते, ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' इति सूत्रेण ल्युप्रत्यये अनुबन्धलोपे, नन्दि+यु इति दशायां ''युवोरनाकौ'' इति सूत्रेण यु इत्यस्य स्थाने अनादेशे ''णेरनिटि'' इति सूत्रेण णिलोपे नन्दन इति जाते कृदन्तत्वात् ''कृत्तद्धितसमासाश्चेति'' सूत्रेण प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये नन्दनः इति रूपं निष्पन्नम्।

**जनार्दनः**- जनमर्दयतीति विग्रहे अर्दि धातोः ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' इति सूत्रेण ल्युप्रत्ययेऽनुबन्धलोपे ''युवोरनाकौ'' इति सूत्रेण यु इत्यस्य स्थानेऽनादेशे ''णेरनिटि'' इति सूत्रेण णिलोपे ''उपपदमतिङ्'' इति सूत्रेण उपपदसमासे समासत्वात् प्रातिपदिकसंज्ञायां सुपो लुकि सर्वणदीर्घे जनार्दन इति जाते ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसञ्ज्ञायां प्रथमैकवचने सु-प्रत्ययेऽनुबन्धलोपे सस्य रुत्वे विसर्गे जनार्दनः इति रूपं निष्पन्नम्।

**लवणः**- इत्यत्र लुनाति इति विग्रहे छेदनार्थकाद् लूञ्-धातोः ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' इति सूत्रेण ल्युप्रत्ययेऽनुबन्धलोपे ''युवोरनाकौ'' इति सूत्रेण यु इत्यस्य स्थानेऽनादेशे ''आर्धधातुकं शेषः'' इति सूत्रेण यु इत्यस्य आर्धधातुकसंज्ञायां ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण धातोः उकारस्य गुणे लो+अन इति जाते, अवादेशे वर्ण-संयोगे लवन इति स्थितौ निपातनाद् नस्य णत्वे लवण इति जाते ततः प्रातिपदिकसञ्ज्ञायां प्रथमैकवचने सु-प्रत्ययेऽनुबन्धलोपे सस्य रुत्वे विसर्गे लवणः इति रूपं निष्पन्नम्।

**ग्राही**- गृह्णातीति विग्रहे ग्रह् धातोः ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' इति सूत्रेण णिनिप्रत्ययेऽनुबन्धलोपे ग्रह्+इन् इति जाते ''अत उपधायाः'' इति सूत्रेण णित्त्वाद् उपधावृद्धौ ग्राहिन् इति जाते, कृदन्तत्वात् प्रातिपदिकसंज्ञायां सु-प्रत्ययेऽनुबन्धलोपे ''सौ च'' इति सूत्रेण उपधादीर्घे ग्राहीन् स् इति जाते हल्ङ्यादिना सलोपे ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नलोपे 'ग्राही' इति रूपं सिद्धम्।

**स्थायी**- तिष्ठतीत्यर्थे 'ष्ठा गतिनिवृत्तौ' इति धातोः ''धात्वादेः षः सः'' इति षस्य सत्वे, ''निमित्तापाये नैमित्तिकस्याप्यपायः'' इति ठस्य थत्वे, स्था इति जाते, ''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'' इति णिनि-प्रत्यये, अनुबन्धलोपे, स्था इन् इति जाते, ''आतो युक् चिण्कृतोः'' इति सूत्रेण युगागमे, अनुबन्धलोपे, स्था य् इन् इति जाते, कृदन्तत्वात् प्रातिपदिक-सञ्ज्ञायां, स्वौजस. इत्यादिना सूत्रेण सुप्रत्यये, अनुबन्धलोपे, स्थायिन् स् इति जाते ''सौ च'' इति उपधादीर्घे, स्थायीन् स् इति जाते, ''हल्ङ्याब्भ्यो. इत्यादिना सूत्रेण सलोपे, ''नलोपः इत्यादिना सूत्रेण नलोपे'' 'स्थायी' इति रूपं सिद्धम्।

**मन्त्री**- मन्त्रयत इत्यर्थे ''मत्रि गुप्तभाषणे'' इत्यस्मात् चौरादिकणिजन्ताद् धातोः 'इदितो नुम्धातोः' इति सूत्रेण नुमागमे, अनुबन्धलोपे मन्त्रि इति जाते, ''नन्दिग्रहि.'' इत्यादिना सूत्रेण णिनि-प्रत्यये, अनुबन्धलोपे, मन्त्रि इन् इति जाते, ''णेरनिटि'' इति णिलोपे मन्त्रिन् इति जाते, ''कृत्रद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिक सञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सूत्रेण सुप्रत्यये अनुबन्धलोपे, मन्त्रिन् स् इति जाते, ''सौ च'' इति उपधादीर्घे, मन्त्रीन् स् इति जाते, सलोपे नलोपे च कृते मन्त्री इति रूपं सिद्धम्।

**पचः ( पाचकः )** - पचतीत्यर्थे 'डुपचष् पाके' इति धातोः अनुबन्धलोपे पच् इति जाते, ''नन्दिग्रहिपचा-दिभ्योल्युणिन्यचः'' इति सूत्रेण अच् प्रत्यये अनुबन्धलोपे पच इति जाते, प्रातिपदिकत्वात्स्वादिकार्ये 'पचः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

790. **इगुपधज्ञाप्रीकिरः कः ( 3-1-135 ) ।। विधिसूत्रम् ।।**
एभ्यः कः स्यात्। क्षिपः। बुधः। कृशः। ज्ञः। प्रियः। किरः।

791. **आतश्चोपसर्गे ( 3-1-136 ) ।। विधिसूत्रम् ।।**
प्रज्ञः। सुग्लः।

---

790. **इगुपधेति**– इक् उपधा यस्य सः इगुपधः बहुव्रीहि समासः। इगुपधश्च, ज्ञा च प्री च कृ च – इगुपधज्ञाप्रीकिर्, तस्माद् इगुपधज्ञाप्रीकिरः समाहारद्वन्द्वः। समाहारे नपुंसकत्वेऽपि ह्रस्वाभावः सौत्रत्वाद्। **अतः इगुपधेभ्यो ज्ञा प्री कृ एतेभ्यो धातुभ्यः कः प्रत्ययः स्यात् कर्तरि अर्थे इत्यर्थः।**

**रूपसिद्धिः**

**क्षिपः ( क्षेपकः )**– क्षिपतीति क्षिपः।'क्षिप् क्षेपणे' इति धातोः इगुपधत्वाद् ''इगुपधज्ञाप्रीकिरः कः'' इति सूत्रेण क-प्रत्यये, अनुबन्धलोपे क्षिप् अ इति जाते, ''पुगन्तलघूपधस्य च'' इति उपधा गुणे प्राप्ते ''क्ङिति च'' इति निषेधे, प्रातिपदिकत्वात् स्वादिकार्ये 'क्षिपः' इति रूपं सिद्धम्।

**बुधः**– बोधति बुध्यते इति वा बुधः (विद्वान्)।'बुध अवगमने' इति धातोः ''इगुपध.'' इत्यादिना सूत्रेण क-प्रत्यये, अनुबन्धलोपे बुध् अ इति जाते, कित्त्वाद् गुणाभावे प्रातिपदिकत्वात् स्वादिकार्ये 'बुधः' इति रूपं सिद्धम्।

**कृशः**– 'कृश्यति' इत्यर्थे कृशः (दुर्बलः)।'कृश तनूकरणे' इत्यस्याद् धातोः ''इगुपधेति'' कप्रत्यये अनुबन्धलोपे, कृश् अ इति जाते, कित्त्वाद् गुणाभावे, प्रातिपदिकत्वात् स्वादिकार्ये, 'कृशः' इति रूपं सिद्धम्।

**ज्ञः**– जानातीति ज्ञः (जानने वाला)।'ज्ञा अवबोधने' इत्यस्माद् धातोः ''इगुपधेति'' सूत्रेण क प्रत्यये, अनुबन्धलोपे, ज्ञा अ इति जाते, ''आतो लोप इटि च'' इति सूत्रेण आलोपे, ज्ञ् अ इति जाते, 'ज्ञ' इत्यस्य प्रातिपदिकत्वात् स्वादिकार्ये 'ज्ञः' इति रूपं सिद्धम्।

**प्रियः**– प्रीणातीति प्रियः। 'प्रीञ् तर्पणे कान्तौ च' इत्यस्माद् धातोः ''इगुपधज्ञाप्रीकिरः कः'' इति क-प्रत्यये, अनुबन्धलोपे, प्री अ इति जाते, कित्त्वाद् गुण-निषेधे, ''अचिश्नुधातु.'' इत्यादिना सूत्रेण ईकारस्य इयङ् आदेशे, अनुबन्धलोपे, प्रिय इति जाते, प्रातिपदिकत्वात् स्वादिकार्ये 'प्रियः' इति रूपं सिद्धम्।

**किरः**– किरति विक्षिपतीति किरः (बिखेरने वाला, सूअर)। कॄ विक्षेपे इति धातोः ''इगुपध.'' इत्यादिना सूत्रेण क-प्रत्यये, अनुबन्धलोपे, कॄ अ इति जाते, ''आर्धधातुकं शेषः'' इति आर्धधातुकसञ्ज्ञायां, ''सार्वधातुकार्धधातुकयोः'' इति ॠकारस्य 'अ गुणे प्राप्ते' ''क्ङिति च'' इति निषेधे, ''ॠत इद्धातोः'' इति सूत्रेण ॠकारस्य इत्वे, रपरत्वे, किर् अ इति जाते, प्रातिपदिकत्वात् स्वादिकार्ये किरः इति रूपं सिद्धम्।

791. **आतश्चेति** ''आतश्चोपसर्गे'' इत्यस्मिन् सूत्रे 'आत' इति पदं धातोर्विशेषणम्। विशेषणाच्च तदन्तोपस्थितिर्भवति। अतः आत इत्यनेन आदन्त- धातोर्ग्रहण भवति चकारश्च वर्तते समुच्चयार्थः। उपसर्गे इत्यस्मिन् पदे सति सप्तमी। कप्रत्ययस्य बोधः भवति पूर्वसूत्रेण। अनेन प्रकारेण प्रकृतसूत्रस्यार्थो भवति – **आदन्त-धातोः कप्रत्ययः स्याद् उपसर्गे उपपदे**।

**रूपसिद्धिः**

**प्रज्ञः**– अत्रोक्तप्रयोगे प्रोपसर्गपूर्वकाद् ज्ञाधातोः ''आतश्चोपसर्गे'' इति सूत्रेण कप्रत्यये अनुबन्धलोपे प्रज्ञा+अ इति दशायाम् ''आतो लोप इटि च'' इति सूत्रेण धातोराकारलोपे, प्रादिसमासे वर्णसंयोगे च कृते प्रज्ञ इति जाते कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये प्रज्ञः इति रूपं निष्पन्नम्।

**सुग्लः**– सुग्लायतीति (खिन्नः)। इत्यत्र 'सु' इति उपसर्ग-पूर्वकाद् 'ग्लै हर्षक्षये' इति धातोः कप्रत्ययस्य विवक्षायाम् ''आदेच उपदेशेऽशिति'' इति सूत्रेण ऐकारस्य आत्वे सु ग्ला इति जाते, ''आतो लोप इटि च'' इति सूत्रेण आलोपे सुग्ल इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'सुग्लः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

792. **गेहे कः ( 3-1-144 ) ।। विधिसूत्रम् ।।**
गेहे कर्तरि ग्रहेः कः स्यात्। गृहम्।

793. **कर्मण्यण् ( 3-2-1 ) ।। विधिसूत्रम् ।।**
कर्मण्युपपदे धातोरण् प्रत्ययः स्यात्। कुम्भं करोतीति कुम्भकारः।

---

792. **गेहे क इति**– ''गेहे कः'' इति सूत्रं ''विभाषा ग्रहः'' इति सूत्रस्यापवादरूपम्। गेहे इति पदं प्रत्ययार्थस्य कर्तुः विशेषणरूपेण पठितं, न तु उपपदम्। अतः **ग्रहधातोः कः प्रत्ययः स्याद् गेहे कर्तरि अर्थे।**

**रूपसिद्धिः**

**गृहम्**– गृह्णाति धान्यादिकमिति विग्रहे ग्रह्धातोः ''गेहे कः'' इति सूत्रेण कप्रत्ययेऽनुबन्धलोपे, ग्रह्+अ इति दशायां ''ग्रहिज्यावयिव्यधिव्यष्टि.'' इत्यादिसूत्रेण रेफस्य सम्प्रसारणे पूर्वरूपे च कृते गृह इति जाते ततः प्रातिपदिकसञ्ज्ञायां प्रथमैकवचने स्वादिकार्ये गृहम् इति रूपं निष्पन्नम्।

793. **कर्मणीति**– कर्मणि अण् इति पदच्छेदः। अत्र धातोरिति सूत्रस्याधिकारः समायाति। **अधिकारत्वञ्च स्वदेशे वाक्यार्थशून्यत्वे सति उत्तरोत्तरफलजनकत्वम्।** एवं प्रकृतसूत्रस्यार्थः भवति– **कर्मण्युपपदे सति धातोरण्- प्रत्ययः स्यादिति।**

**कुम्भकारः**– इत्यत्र कुम्भं करोतीति विग्रहे कुम्भ अम् उपपदात् कृधातोः ''कर्मण्यण्'' इति सूत्रेण अण्प्रत्ययेऽनुबन्धलोपे ''अचोञ्णिति'' इति सूत्रेण वृद्धौ रपरत्वे कर्तृकर्मणोरिति कर्मणः षष्ठ्यां सत्यां कुम्भ ङस् कार इति जाते ''उपपदमतिङ्'' इति सूत्रेण उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि कुम्भकार इति दशायाम् ''एकदेशविकृतमनन्यवद्'' इति न्यायेन सुप्रत्यये, अनुबन्धलोपे, सस्य रुत्वे विसर्गे च कुम्भकारः इति रूपं निष्पन्नम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

794. **आतोऽनुपसर्गे कः ( 3-2-3 ) ।। विधिसूत्रम् ।।**
आदन्ताद् धातोरनुपसर्गात् कर्मण्युपपदे कः स्यात्। अणोऽपवादः।
आतो लोप इटि च। गोदः। धनदः। कम्बलदः। अनुपसर्गे किम्? गो सन्दायः।
वा. **मूलविभुजादिभ्यः कः**। मूलानि विभुजति-मूलविभुजो रथः। आकृतिगणोऽयम्। महीध्रः। कुध्रः।

794. **आत इति**- आत इति पदं पञ्चम्यन्तम्। सप्तम्यन्तञ्च अनुपसर्गे इति पदम्। अनुपसर्गे इत्यस्मिन् पदे प्रसज्यप्रतिषेधार्थकः नञ् समासः। तेन **अनुपसर्गाद् आदन्ताद् धातोः कः प्रत्ययः स्याद् इति सूत्रार्थः सम्पद्यते।** प्रकृतसूत्रेण विधीयमानः अण्प्रत्ययः ''कर्मण्यण्'' इति सूत्रेण विधीयमानस्य 'अण्प्रत्ययस्यापवादः। अतः गोदः, कम्बलदः प्रभृतिरूपाणां सिद्धिर्जायते।'

**मूलेति**- मूलविभुजादिगणपठितेभ्यः शब्देभ्यः कप्रत्ययः स्यादिति वार्तिकार्थः। आकृतिगणपठितत्वान् निगद्यते- आकृतिगणोऽयम्। तेन महीध्रः, कुध्रः इत्यादीनि रूपाणि निष्पन्नानि भवन्ति।

**रूपसिद्धिः**

**गोदः**- गां ददातीति विग्रहे, गो अम् इत्युपपदाद् दाधातोः ''कर्मण्यण्'' इति सूत्रेण अण्प्राप्ते, तं प्रबाध्य ''आतोऽनुपसर्गे कः'' इति सूत्रेण कप्रत्ययेऽनुबन्धलोपे ''आतो लोप इटि च'' इति सूत्रेण आकारलोपे, उपपदसमासे, प्रातिपदिकसञ्ज्ञायां सुपो लुकि गोद इति जाते कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये ''गोदः'' इति रूपं निष्पन्नम्।

**धनदः**- धनं ददातीति विग्रहे, धन अम् इत्युपपदात् ''डुदाञ् दाने'' इति धातोः अणं प्रबाध्य ''आतोऽनुपसर्गे कः'' इति सूत्रेण कप्रत्यये, अनुबन्धलोपे, धन अम् दा अ इति जाते, ''आतो लोप इटि च'' इति आलोपे धन अम् द् अ इति जाते, ''उपपदमतिङ्'' इत्युपपदसमासे, प्रातिपदिकसञ्ज्ञायां, ''सुपो धातु.'' इत्यादिना सुब्लुकि, धन द इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये धनदः इति रूपं सिद्धम्।

**कम्बलदः**- कम्बलं ददातीति विग्रहे, कम्बल अम् इत्युपदात् 'डुदाञ् दाने' इति धातोः अणं प्रबाध्य ''आतोऽनुपसर्गे कः'' इति सूत्रेण क प्रत्यये, अनुबन्धलोपे, कम्बल अम् दा इति जाते, आकारलोपे, कम्बल अम् द् अ इति जाते, ''उपपदमतिङ्'' इति उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, कम्बलद इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'कम्बलदः' इति रूपं सिद्धम्।

**मूलविभुजः**- 'मूलानि विभुजति' इति विग्रहे मूल जस् 'वि' उपसर्गपूर्वकात् 'भुजो कौटिल्ये' इति धातोः ''मूल विभुजादिभ्यः कः'' इति वार्तिकेन क प्रत्यये, अनुबन्धलोपे, मूल जस् विभुज् अ इति जाते, कित्त्वात् लघूपधगुणनिषेधे, कृद्योगे कर्मणः षष्ठ्यां, स्वादिकार्ये 'मूलविभुजः' इति रूपं सिद्धम्।

**महीध्रः**-महीं धरतीति विग्रहे, (पर्वत) मही अम् उपपदात् 'धृञ् धारणे' धातोः ''मूलविभुजादिभ्यः कः'' इति सूत्रेण क प्रत्यये, अनुबन्धलोपे, मही अम् धृ अ इति जाते, कित्त्वाद् गुणाभावे, ''इको यणचि'' इति ऋकारस्य रेफे यणि कृते मही अम् ध् र् अ (ध्र) इति जाते, कृद्योगे कर्मणः षष्ठ्यां सत्यां, मही ङस् ध्र इति जाते, ''उपपदमतिङ्'' इति उपपदसमासे, प्रातिपदिकसञ्ज्ञायां सुब्लुकि, महीध्र इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादि कार्ये 'महीध्रः' इति रूपं सिद्धम्।

**कुध्रः**- कुं (पृथ्वीम्) धरतीति विग्रहे (पर्वतः) कु अम् उपपदाद् 'धृञ् धारणे' धातोः ''मूलविभुजादिभ्यः कः'' इति सूत्रेण कप्रत्यये, अनुबन्धलोपे, कु अम् धृ अ इति जाते, कित्त्वाद् गुणाभावे, ''इको यणचि'' इति ऋकारस्य रेफे यणि कृते कु अम् ध्र इति जाते कृद्योगे कर्मणः षष्ठ्यां सत्यां कु ङस् ध्र इति जाते, ''उपपदमतिङ्'' इत्युपपदसमासे, सुब्लुकि, कु ध्र इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'कुध्रः' इत रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

795. **चरेष्टः ( 3-2-16 ) ।। विधिसूत्रम् ।।**
अधिकरणे उपपदे। कुरुचरः।

796. **भिक्षासेनादायेषु च ( 3-2-17 ) ।। विधिसूत्रम् ।।**
भिक्षाचरः। सेनाचरः। आदायेति ल्यबन्तम्। आदायचरः।

797. **कृञो हेतुताच्छील्यानुलोम्येषु ( 3-2-20 ) ।। विधिसूत्रम् ।।**
एषु द्योत्येषु करोतेष्टः स्यात्।

---

795. **चरेष्ट इति**– चरेष्टः इत्यस्मिन् सूत्रे ''अधिकरणे शेते'' इति सूत्राद् अधिकरणे इति पदस्यानुवृत्तिः समायाति। ततः **अधिकरणे उपपदे चर् धातोः ट प्रत्ययः स्यादिति सूत्रार्थः**। कुरुषु चरतीति कुरुचरः प्रभृतयः प्रयोगाः निष्पन्नाः भवन्ति।

**रूपसिद्धिः**

**कुरुचरः**– कुरुषु चरतीति विग्रहे कुरु सुप् उपपदात् चर् धातोः ''चरेष्टः'' इति सूत्रेण टप्रत्ययेऽनुबन्धलोपे, ''उपपदमतिङ्'' इति सूत्रेण उपपदसमासे, समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि कुरुचर इति जाते, कृदन्तत्वात् पुनः प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये कुरुचरः इति रूपं सिद्धम्।

796. **भिक्षेति**– ''भिक्षासेनादायेषु च'' इत्यस्मिन् सूत्रे चकारः समुच्चयार्थकः।''**भिक्षा सेना आदाय इत्येषु उपपदेषु अनधिकरणे अर्थे चर् धातोः टप्रत्ययः स्यादित्यर्थः**।''

**भिक्षाचरः**– भिक्षां चरतीति विग्रहे, भिक्षा अम् इत्युपपदात् चर्- धातोः ''भिक्षासेनादायेषु च'' इति सूत्रेण टप्रत्ययेऽनुबन्धलोपे, भिक्षा अम् चर् अ इति जाते, ''उपपदमतिङ्'' इति सूत्रेण उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, भिक्षा चर इति जाते, कृदन्तत्वात् पुनः प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'भिक्षाचरः' इति रूपं सिद्धम्।

**सेनाचरः**– सेनां चरति प्रविशतीति सेनाचरः (सेना में प्रवेश लेने वाला)। सेना अम् इत्युपपदात् चर् धातोः ''उपपदमतिङ्'' इति सूत्रेण उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, सेनाचर इति जाते, कृदन्तत्वात् पुनः प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'सेनाचरः' इति रूपं सिद्धम्।

**आदायचरः**– आदाय चरतीति विग्रहे 'आदायेति' उपपदपूर्वकात् चर् धातोः ''भिक्षासेनादायेषु च'' इति सूत्रेण टप्रत्यये, अनुबन्धलोपे, आदाय चर् अ इति जाते, ''उपपदमतिङ्'' इत्युपपदसमासे, प्रातिपदिकत्वात् स्वादिकार्ये 'आदायचरः' इति रूपं सिद्धम्।

797. **कृञो हेतु इति**– अत्र 'कर्मणि' 'ट' इति पदद्वयम् अनुवर्तते। प्रकृतसूत्रे हेतुशब्दः कारणवाचकः। ताच्छील्यं तत्स्वभावता। आनुलोम्यं नाम आराध्यस्य चित्तानुवर्तनम्, अतः सूत्रार्थो वर्तते– **'हेतु, ताच्छील्य, आनुलोम्य' इत्येषु अर्थेषु द्योत्येषु कर्मणि उपपदे कृधातोः टप्रत्ययः स्यादिति**।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

798. **अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य ( 8-3-46 ) ।। विधिसूत्रम् ।।** आदुत्तरस्यानव्ययस्य विसर्गस्य नित्यं सादेशः स्यात् करोत्यादिषु परेषु। यशस्करी विद्या। श्राद्धकरी। वचनकरः।

799. **एजेः खश्** (3-2-28) ।। **विधिसूत्रम्** ।। ण्यन्तादेजेः खश् स्यात्।

800. **अरुर्द्विषदजन्तस्य मुम् ( 6-3-67 )** अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात् खिदन्ते परे, नत्वव्ययस्य। शित्त्वाच्छबादिः। जनमेजयतीति जनमेजयः।

---

798. **अतः कृकमि**- सूत्रेऽस्मिन् अतः इति पदं पञ्चम्यन्तम्। 'अनव्ययस्य' इत्यस्मिन् पदे हेत्वर्थे षष्ठी। कृकमि-कंस-कुम्भ-पात्र-कुशा-कर्णीषु इति सप्तमी। कृ च कमिश्च कंसश्च कुम्भश्च पात्रञ्च कुशा च कर्णी च **कृकमिकंसकुम्भपात्र-कुशाकर्ण्यः तेषु, इतरेतरद्वन्द्वः। न अव्ययस्य अनव्ययस्य नञ् तत्पुरुषः। अदन्तात् परे अव्ययभिन्नस्य कृकमिकंसकुम्भपात्रकुशाकर्णी एषु उपपदेषु विसर्गस्य स्थाने सः भवतीति सूत्रार्थः सङ्गच्छते।**

**रूपसिद्धिः**

**यशस्करी विद्या**- यशः करोतीति विग्रहे यशस् अम् इत्युपपदात् कृधातोः ''कृञो हेतुताच्छील्यानुलोम्येषु'' इति सूत्रेण हेत्वर्थे टप्रत्ययेऽनुबन्धलोपे, यशस् अम् कृ अ इति जाते, ''आर्धधातुकं शेषः'' इति सूत्रेण आर्धधातुकसञ्ज्ञायां, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण ऋकारस्य अकारे गुणे, रपरत्वे, यशस् क् अर् अ इति जाते, ''उपपदमतिङ्'' इति उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, यशस् कर इति जाते, सस्य रुत्वे, विसर्गे, यशः कर इति जाते, ''अतः कृकमिकंस.'' इत्यादिना सूत्रेण विसर्गस्य स्थाने सत्वे यशस्कर इति जाते, स्त्रीत्वविवक्षायां ''टिड्ढाणञ्.'' इत्यादिना सूत्रेण ङीप्-प्रत्यये, अनुबन्धलोपे, यशस्कर ई इति जाते, ''यचि भम्'' इति भसञ्ज्ञायां, ''यस्येति च'' इति सूत्रेण अकारलोपे यशस्कर् ई इति जाते, प्रतिपदिकात् स्वादिकार्ये 'यशस्करी ' इति रूपं सिद्धम्।

**श्राद्धकरी**- श्राद्धं करोति तच्छीलः इति श्राद्धकरः। श्राद्ध अम् इत्युपदात् कृधातोः''कृञो हेतुताच्छील्यानुलोम्येषु'' इति सूत्रेण ताच्छील्यार्थे द्योत्ये टप्रत्यये, अनुबन्धलोपे, श्राद्ध अम् कृ अ इति जाते, आर्धधातुकत्वात् ऋकारस्य अकारे गुणे, रपरत्वे, श्राद्ध अम् कर् अ इति जाते, ''उपपदमतिङ्'' इति उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, श्राद्धकर इति जाते, स्त्रीत्वविवक्षायां ''टिड्ढाणञ्.'' इत्यादिना सूत्रेण ङीप्-प्रत्यये, अनुबन्धलोपे श्राद्धकर ई इति जाते, ''यचि भम्'' इति भसञ्ज्ञायां, ''यस्येति च'' इति सूत्रेण अलोपे श्राद्धकरी इति जाते, प्रातिपदिकात् स्वादिकार्ये 'श्राद्धकरी' इति रूपं सिद्धम्।

**वचनकरः**- वचनं करोतीति वचनकरः (आज्ञाकारी सेवक)। वचन अम् इत्युपपदात् कृ धातोः ''कृञो हेतुताच्छील्यानुलोम्येषु'' इति सूत्रेण आनुलोम्ये द्योत्ये टप्रत्यये, अनुबन्धलोपे, वचन अम् कृ अ इति जाते, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण ऋकारस्य अकारे गुणे, रपरत्वे, वचन अम् कर इति जाते, उपपदसमासे, सुपो लुकि, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'वचनकरः' इति रूपं सिद्धम्।''

799. **एजेरिति**- ''एजेः खश्'' इत्यस्मिन् सूत्रे कर्मणि उपपदे इति गृह्यते। णिजन्ताद् एजृ धातोः एजेः इति षष्ठ्यन्तपदम्। अतः **कर्मणि उपपदे ण्यन्ताद् एजृधातोः खश्प्रत्ययः स्यादिति सूत्रार्थः।** खश् इत्यत्र शित्करणं सार्वधातुकसंज्ञा-प्रयुक्तस्य शपो विधानार्थम्।

800. **अरुर्द्विषदिति**- प्रकृतसूत्रे ''खित्यनव्ययस्य'' इत्यतः खिति अनव्ययस्य च ''अलुगुत्तरपदे'' इत्यतः 'उत्तरपदे इत्यस्यानुवृत्तिः समायाति। अरुश्च द्विषच्च अजन्तश्च इति एषां समाहारद्वन्द्वः, तस्य अरुर्द्विषदजन्तस्येति समाहारद्वन्द्वात् षष्ठी। ततः सूत्रार्थो भवति **अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात् खिदन्ते उत्तरपदे, न तु अव्ययस्य।**

**रूपसिद्धिः**

**जनमेजयः**- इत्यत्र जनम् एजयतीति विग्रहे जनम् उपपदपूर्वकाद् ण्यन्ताद् एज्धातोः ''एजेः खश्'' इति सूत्रेण खश्प्रत्ययेऽनुबन्धलोपे, शित्त्वात् सार्वधातुकसञ्ज्ञायां ''कर्तरि शप्'' इति सूत्रेण शपि, अनुबन्धलोपे, पुनः सार्वधातुकसञ्ज्ञायां, जन अम् एजि अ इति जाते, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण गुणेऽयादेशे, पररूपे, उपपदसमासे, सुपो लुकि, जन एजय इति दशायाम्, ''अरुर्द्विषदजन्तस्य मुम्'' इति सूत्रेण मुमागमे, अनुबन्धलोपे, वर्णसंयोगे, जनमेजय इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये, जनमेजयः इति रूपं निष्पन्नम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

801. **प्रियवशे वदः खच् ( 3-2-38 ) ।। विधिसूत्रम् ।।**
प्रियंवदः। वशंवदः।

802. **अन्येभ्योऽपि दृश्यन्ते ( 3-2-75 ) ।। विधिसूत्रम् ।।**
मनिन्, क्वनिप्, वनिप्, विच्, एते प्रत्यया धातोः स्युः।

803. **नेड् वशि कृति ( 7-2-8 ) ।। विधिसूत्रम् ।।**
वशादेः कृत इण् न स्यात्। ''शॄ'' हिंसायाम्। सुशर्मा। प्रातरित्वा।

---

801. **प्रियवशे वद इति**– प्रियश्च वशश्च प्रियवशम्, तस्मिन्=प्रियवशे। समाहारद्वन्द्वः। **प्रियवशकर्मोपपदक-वद्-धातोः खच्प्रत्ययः स्यात्।** खच् इत्यत्र खकारः मुम्विधानाय चकारस्तु ''खचि ह्रस्वः'' इति सूत्रेण ह्रस्वविधानार्थम्।

**रूपसिद्धिः**

**प्रियंवदः**– अत्र प्रियं वदतीति विग्रहे प्रिय अम् इत्युपपदाद् वद्धातोः ''प्रियवशे वदः खच्'' इति सूत्रेण खच्प्रत्यये अनुबन्धलोपे, उपपदसमासे, सुपो लुकि, ''अरुर्द्विषदजन्तस्य मुम्'' इति सूत्रेण मुमागमेऽनुबन्धलोपे, मस्यानुस्वारे, प्रियंवद इति जाते ततः कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'प्रियंवदः' इति रूपं निष्पन्नम्।

**वशंवदः**– वशं वदतीति विग्रहे वश अम् इत्युपपदाद् वद्धातोः ''प्रियवशे वदः खच्'' इति खचि, अनुबन्धलोपे, ''उपपदमतिङ्'' इति सूत्रेण उपपदसमासे, सुपो लुकि, वश वद इति जाते, ''अरुर्द्विषदजन्तस्य मुम्'' इति मुमागमेऽनुबन्धलोपे, मकारस्य अनुस्वारे, वशं वद इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'वशंवदः' इति रूपं सिद्धम्।

802. ''**अन्येभ्योऽपि दृश्यन्ते**''– इति सूत्रम् ''आतो मनिन्क्वनिब्वनिपश्च'' इति सूत्रस्याधिकारे समायाति। अतः अन्येभ्यः इत्यस्यार्थः वर्तते आदन्तधातोर्भिन्नः। एवमेव ''विजुपेश्छन्दसि'' इति सूत्रस्याधिकारे मनिन् क्वनिप् वनिप् विच् इति प्रत्ययाः भवन्ति।

803. **नेड् वशि**– वशादेः कृत इण्न स्यात्, इत्यर्थकेन ''नेड्वशि कृति'' इति सूत्रेण ''आर्धधातुकस्येड् वलादेः'' इति सूत्रेण प्राप्तस्य इडागमस्य निषेधः भवति।

**रूपसिद्धिः**

**सुशर्मा**– सुष्ठु शृणाति इति विग्रहे सुपूर्वकात् शॄधातोः ''अन्येभ्योऽपि दृश्यन्ते'' इति सूत्रेण मनिन्प्रत्यये, इनो लोपे, सु शॄ मन् इति जाते ''आर्धधातुकं शेषः'' इति सूत्रेण आर्धधातुकसञ्ज्ञायां, गुणे, रपरत्वे, ''आर्धधातुकस्येड्वलादेः'' इति सूत्रेण इडागमे प्राप्ते ''नेड्वशि कृति'' इति सूत्रेण निषेधे, सुशर्मन् इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, अनुबन्धलोपे, ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति सूत्रेण उपधादीर्घे सलोपे नलोपे च कृते 'सुशर्मा' इति रूपं निष्पन्नम्।

**प्रातरित्वा**– प्रातर् एति गच्छति इति विग्रहे, प्रातर् पूर्वकाद् इण्धातोः ''अन्येभ्योऽपि दृश्यन्ते'' इति सूत्रेण वनिप्प्रत्ययेऽनुबन्धलोपे, आर्धधातुकसंज्ञायाम्, इडागमे प्राप्ते ''नेड् वशि कृति'' इति सूत्रेण निषेधे, प्रातरि वन् इति जाते ''ह्रस्वस्य पिति कृति तुक्'' इति सूत्रेण तुगागमेऽनुबन्धलोपे, उपधादीर्घे, सलोपे नलोपे च कृते 'प्रातरित्वा' इति रूपं निष्पन्नम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

804. **विड्वनोरनुनासिकस्यात् ( 6-4-41 ) ।। विधिसूत्रम् ।।**
अनुनासिकस्यात् स्यात्। विजायते इति विजावा। ओणृ अपनयने। अवावा। विच्-रुष रिष हिंसायाम्। रोट्। रेट्। सुगण्।

---

804. **विड्वनोरिति**- विट् च वन् च विड्वनौ, तयो: = विड्वनो:। इतरेतरद्वन्द्व: प्रकृतसूत्रे विड्वनोरित्यत्र सप्तमीविभक्ति:। अनुनासिकस्य आत् इति पदच्छेद:। अनुनासिकस्य इत्यस्य षष्ठ्यन्तत्वात् सूत्रस्यार्थो भवति- **अनुनासिकस्य आत् स्याद् विड्वनो: परयोरिति।**

**रूपसिद्धि:**

**विजावा**- विजायते इति विग्रहे 'वि' उपसर्गपूर्वकाद् वन् धातो: ''अन्येभ्योऽपि दृश्यन्ते'' इति सूत्रेण वनिप् प्रत्ययेऽनुबन्धलोपे, वि जन् वन् इति जाते, ''विड्वनोरनुनासिकस्यात्'' इति सूत्रेण जनेर्नकारस्य आत्त्वे, सवर्णदीर्घे, विजावन् इति जाते, ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसञ्ज्ञायां, स्वौजस. इत्यादिना सुप्रत्यये, अनुबन्धलोपे, विजावन् स् इति जाते, ''सुडनपुंसकस्य'' इति सर्वनामस्थानसञ्ज्ञायां, ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति उपधादीर्घे विजावान् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे, ''नलोप: प्रातिपदिकान्तस्य'' इति नलोपे 'विजावा' इति रूपं सिद्धम्।

**अवावा**- ओणति अपनयति हरतीति विग्रहे ओणृ धातो: ''अन्येभ्योऽपि दृश्यन्ते'' इति वनिप्-प्रत्यये, अनुबन्धलोपे, ओण् वन् इति जाते, आर्धधातुक-इट्प्राप्ते, ''नेड्वशि कृति'' इति निषेधे, ''विड्वनोरनुनासिकस्यात्'' इति णकारस्य आत्वे, ओ आ वन् इति जाते, ''एचोऽयवायाव:'' इति ओकारस्य अवादेशे, अव् आ वन् (अवावन्) इति जाते, ''कृत्तद्धितेति'' प्रातिपदिकासञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, अवावन् स् इति जाते, सर्वनामस्थानसञ्ज्ञायां, ''सर्वनामस्थानेचाऽसम्बुद्धौ'' इति सूत्रेण उपधादीर्घे, अवावान् स् इति जाते, सलोपे नलोपे च कृते 'अवावा' इति रूपं सिद्धम्।

**रोट्**- रोषति हिनस्तीति विग्रहे (हिंसक:) रुष् धातो: ''अन्येभ्योऽपि दृश्यन्ते'' इति विच् प्रत्यये, अनुबन्धलोपे, रुष् व् इति जाते, ''अपृक्तएकाल्प्रत्यय:'' इति सूत्रेण अपृक्तसञ्ज्ञायां, ''वेरपृक्तस्य'' इति वलोपे, रुष् इति जाते, प्रत्ययलक्षण द्वारा ''पुगन्तलघूपधस्य च'' इति सूत्रेण उपधागुणे, रोष् इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां ''स्वौजस. इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, रोष् स् इति जाते, हल्ङ्यादिलोपे, ''झलां जशोऽन्ते'' इति षस्य डत्वे जश्त्वे, रोड् इति जाते, ''वाऽवसाने'' इति विकल्पेन डस्य टत्वे चर्त्वे 'रोट्' इति रूपं पक्षे विकल्पाभावे 'रोड्' इति रूपद्वयं सिद्धम्।''

**रेट्, रेड्**- रेषति हिनस्तीति विग्रहे (हिंसक:) रिष् धातो: ''अन्येभ्योऽपि दृश्यन्ते'' इति विच् प्रत्यये, विच: सर्वापहारलोपे, रिष् इति जाते, प्रत्ययलक्षणद्वारा लघूपधगुणे, रेष् इति जाते, ''कृत्तद्धितसमासाश्चेति'' प्रातिपदिकसञ्ज्ञायां, ''स्वौजस्.'' इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, रेष् स् इति जाते, हल्ङ्यादि सलोपे, रेष् इति जाते, ''झलां जशोऽन्ते'' इति षस्य डत्वे जश्त्वे, रेड् इति जाते, ''वाऽवसाने'' इति विकल्पेन डस्य टत्वे चर्त्वे 'रेट्' इति रूपं पक्षे 'रेड्' इति रूपद्वयं सिद्धम्।

**सुगण्**- सुष्ठु गणयतीति विग्रहे (सुगणक:) 'सु' इति उपसर्गपूर्वकात् 'गणि' (गण संख्याने) इति चौरादिकण्यन्तधातो: ''अन्येभ्योऽपि दृश्यन्ते'' इति विच् प्रत्यये, विच: सर्वापहारलोपे, प्रत्ययलक्षण द्वारा ''णेरनिटि'' इति णिलोपे, सु गण् इति जाते, ''उपपदमतिङ्'' इति उपपदसमासे, सुगण् इति जाते, प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे सुगण् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे 'सुगण्' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

805. **क्विप् च ( 3-2-76 ) ।। विधिसूत्रम् ।।**
अयमपि दृश्यते। उखास्रत्। पर्णध्वत्। वाहभ्रट्।

806. **सुप्यजातौ णिनिस्ताच्छील्ये ( 3-2-78 ) ।। विधिसूत्रम् ।।**
अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये। उष्णभोजी।

---

805. **क्विप् चेति**– "अन्येभ्योऽपि दृश्यन्ते" इति सूत्रेण यथा क्वनिबादयः प्रत्ययाः इति विधानं भवेत्, एतदर्थमेव कथ्यते– अयमपि दृश्यते। अतः **सोपपदेभ्यः निरुपपदेभ्यः वा सर्वधातुभ्यः छन्दसि लोके च क्विप्-प्रत्ययः स्यादिति सूत्रार्थः।**

**रूपसिद्धिः**

**उखास्रत्**– 'उखायाः स्रंसते' इति विग्रहे उखायाः इति उपपदपूर्वकात् स्रंसु अवस्रंसने धातोः "क्विप् च" इति सूत्रेण क्विप् प्रत्यये, क्विपः सर्वापहारलोपे, उखा ङसि स्रस् इति जाते, कित्वाद् "अनिदितां हल उपधायाः क्ङिति" इति उपधानलोपे, उखा (ङसि) अस् स्रस् इति जाते, उपपदसमासे, समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, उखास्रस् इति जाते, पुनः "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसञ्ज्ञायां, "स्वौजस. इत्यादिना सूत्रेण सुप्रत्यये, अनुबन्धलोपे, उखास्रस् स् इति जाते, "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सलोपे उखास्रस् इति जाते, "वसुस्रंसु-ध्वंस्वनडुहां दः" इति पदान्तसस्य दत्वे उखास्रद् इति जाते, "वाऽवसाने" इति विकल्पेन चर्त्वे 'उखास्रत्' इति रूपं, पक्षे विकल्पाभावे 'उखास्रद्' इति रूपद्वयं सिद्धम्।

**पर्णध्वत्**– 'पर्णाद् ध्वंसते' इति विग्रहे पर्णाद् इति उपपद् पूर्वकाद् ध्वंसु अवस्रंसने धातोः "क्विप् च" इति क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, पर्ण (ङसि) अस् ध्वंस् इति जाते, कित्वाद् "अनिदितां हल उपधायाः क्ङिति" इत्युपधानकारस्य लोपे, पर्ण अस् ध्वस् इति जाते, उपपदसमासे, प्रातिपदिकत्वात् सुपो लुकि, पर्णध्वस् इति जाते, पुनः 'कृत्तद्धितेति' प्रातिपदिकसञ्ज्ञायां, स्वौजस. इत्यादिना सुप्रत्यये, अनुबन्धलोपे, पर्णध्वस् स् इति जाते, "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सलोपे, "वसुस्रंसुध्वंस्वनडुहां दः" इति सस्य दत्वे, "वाऽवसाने" इति विकल्पेन तत्वे चर्त्वे 'पर्णध्वत्' इति रूपं, पक्षे विकल्पाभावे 'पर्णध्वद्' इति रूपद्वयं सिद्धम्।

**वाहभ्रट्**– वाहाद् भ्रंशते भ्रश्यति इति वा विग्रहे वाहाद् (ङसि) इत्युपपदात् भ्रंशु अवस्रंसने अधः पतने वा धातोः "क्विप् च" इति क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, वाह (ङसि) अस् भ्रंश् इति जाते, "अनिदितां हल उपधायाः क्ङिति" इति उपधानकारस्य लोपे, उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, वाहभ्रश् इति जाते, पुनः 'कृत्तद्धितेति' प्रातिपदिकसञ्ज्ञायां, स्वौजस. इत्यादिना सुप्रत्यये, अनुबन्धलोपे, वाहभ्रश् स् इति जाते, "हल्ङ्याब्भ्यो दीर्घादिति" सुलोपे, वाहभ्रश् इति जाते, "व्रश्चभ्रस्जसृजमृजयजराजभ्राच्छशां षः" इति शस्य षत्वे, वाहभ्रष् इति जाते, "झलां जशोऽन्ते" इति पदान्त षस्य डत्वे, "वाऽवसाने" इति विकल्पेन डस्य टत्वे चर्त्वे 'वाहभ्रट्' इति रूपं, पक्षे चर्त्वाभावे 'वाहभ्रड्' इति रूपद्वयं सिद्धम्।

806. **सुप्यजाताविति**– स (धात्वर्थः) शीलं (स्वभावः) यस्य स तच्छीलः, (बहुव्रीहिः)। तच्छीलस्य भावः – ताच्छील्यम्, तस्मिन् = ताच्छील्ये। न जातिः अजातिः, तस्याम् = अजातौ, नञ्तत्पुरुषः। सुपि अजातौ णिनिः ताच्छील्ये इति सूत्रच्छेदः। सुपि इत्यत्र सप्तमी। **अजात्यर्थे ( जातिभिन्नार्थे ) सुबन्तोपपदे धातोः णिनिप्रत्ययः स्यात् ताच्छील्ये अर्थे द्योत्ये, इत्यर्थः समायाति।**

**रूपसिद्धिः**

**उष्णभोजी**– 'उष्णं भुङ्क्ते तच्छीलः' इत्यर्थे उष्णम् इत्युपपदात् भुज् (भुज पालनाभ्यवहारयोः) धातोः "सुप्यजातौ. इत्यादिना णिनिप्रत्यये, अनुबन्धलोपे, उष्ण अम् भुज् इन् इति जाते, "कर्तृकर्मणोः कृति", इति कर्मणः षष्ठ्यां कृते, उष्ण ङस् भुज् इन् इति जाते, "पुगन्तलघूपधस्य च" इति लघूपधगुणे, उष्ण (ङस्) अस् भोजिन् इति जाते। "उपपदमतिङ्" इत्युपपदसमासे, प्रातिपदिकत्वात् सुपो लुकि, उष्णभोजिन् इति जाते, पुनः "कृत्तद्धितसमासाश्च" इति प्रातिपदिकसञ्ज्ञायां, स्वौजस. इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, उष्णभोजिन् स् इति जाते, "सौ च" इत्युपधादीर्घे, उष्णभोजीन् इति जाते, "हल्ङ्याब्यो दीर्घात्सुतिस्यपृक्तं हल्" इति सलोपे, "नलोपः प्रातिपदिकान्तस्य" इति नलोपे 'उष्णभोजी' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

807. **मनः ( 3-2-82 ) ।। विधिसूत्रम् ।।**
सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानी।

808. **आत्ममाने खश्च ( 3-2-83 ) ।। विधिसूत्रम् ।।**
स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् स्यात् चाण्णिनिः। पण्डितमात्मानं मन्यते पण्डितम्मन्यः। पण्डितमानी।

---

807. **मनः इति**- मनः इति पञ्चम्यन्तं पदम्। सुपीत्यस्यानुवृत्तिः समायाति। अतः सूत्रास्यार्थः वर्तते-**सुपि मन्यतेर्णिनिः स्यात्।**

**रूपसिद्धिः**

**दर्शनीयमानी**- 'दर्शनीयं मन्यते' इति विग्रहे दर्शनीयम् इत्युपपदात् मन ज्ञाने धातोः ''मनः'' इति सूत्रेण कर्तरि अर्थे णिनिप्रत्यये, अनुबन्धलोपे, दर्शनीय अम् मन् इन् इति जाते, ''कर्तृकर्मणोः कृति'' इति कर्मणः षष्ठ्यां कृते, दर्शनीय ङस् मन् इन् इति जाते, णिनेः णित्वाद् ''अत उपधायाः'' इति उपधा-अकारस्य आकारे वृद्धौ, दर्शनीय अम् मान् इन् इति जाते, ''उपपदमतिङ्'' इत्युपपदसमासे, प्रातिपदिकत्वात् सुब्लुकि, दर्शनीयमानिन् इति जाते, ''कृत्तद्धित.'' इत्यादिना प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, दशनीयमानिन् स् इति जाते, ''सौ चेति'' दीर्घे, दर्शनीयमानीन् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे, ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, 'दर्शनीयमानी' इति रूपं सिद्धम्।

808. **आत्ममाने इति**- मननं मानः, भावे घञ्, आत्मनः = स्वस्य = कर्तुः मानः = आत्ममानः, तस्मिन् आत्ममाने, षष्ठीतत्पुरुषसमासः। अर्थाद् **आत्मानं मन्यते इति स्वकर्मके मनने वर्तमानाद् मन्यतेः खश्प्रत्ययः भवति। चकाराद् णिनिप्रत्ययस्यापि विधानं भवति।**

**रूपसिद्धिः**

**पण्डितम्मन्यः, पण्डितमानी**- अत्र पण्डितमात्मानं मन्यते इति विग्रहे पण्डित अम् इत्युपपदात् मनधातोः ''आत्ममाने खश्च'' इति सूत्रेण खश्प्रत्ययेऽनुबन्धलोपे, कृद्योगे कर्मणः षष्ठ्यां कृते, पण्डित ङस् मन् अ इति जाते, सार्वधातुकसञ्ज्ञायां, ''दिवादिभ्यः श्यन्'' इति श्यन्प्रत्ययेऽनुबन्धलोपे, पण्डित अस् मन् य अ इति जाते, ''अतो गुणे'' इति अकार-अकारयोः स्थाने अकारे पररूपे, पण्डित अस् मन् य इति जाते, ''उपपदमतिङ्'' इत्युपपदसमासे, प्रातिपदिकत्वात् सुब्लुकि, 'पण्डित मन्य' इति जाते, ''अरुर्द्विषदजन्तस्य मुम्'' इति सूत्रेण मुमागमे, अनुबन्धलोपे पण्डित म् मन्य इति जाते, पुनः प्रातिपदिकत्वात् ''स्वौजस.'' इत्यादिना सुप्रत्यये, अनुबन्धलोपे, पण्डितम्मन्य स् इति जाते, सस्य रुत्वे विसर्गे च कृते 'पण्डितम्मन्यः' इति रूपं सिद्धम्।
चकारबलाद् णिनिप्रत्यये कृते सति पण्डित अम् मन् इन् इति जाते, कृद्योगे कर्मणः षष्ठ्यां कृते, ''अत उपधाया'' इति उपधावृद्धौ पण्डित अस् (ङस्) मानिन् इति जाते, ''उपपदमतिङ्'' इति समासे, प्रातिपदिकत्वात् सुब्लुकि, पण्डितमानिन् इति जाते, पुनः प्रातिपादिकसञ्ज्ञायां ''स्वौजस.'' इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, पण्डितमानिन् स् इति जाते, ''सौ च'' इति उपधादीर्घे पण्डितमानीन् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे, ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे 'पण्डितमानी' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

809. **खित्यनव्ययस्य ( 6-3-66 ) ।। विधिसूत्रम् ।।**
खिदन्ते परे पूर्वपदस्य ह्रस्वः। ततो मुम्। कालिम्मन्या।

810. **करणे यजः ( 3-2-85 ) ।। विधिसूत्रम् ।।**
करणे उपपदे भूतार्थे यजेर्णिनिः स्यात् कर्तरि। सोमेन इष्टवान् सोमयाजी। अग्निष्टोमयाजी।

811. **दृशेः क्वनिप् ( 3-2-94 ) ।। विधिसूत्रम् ।।**
कर्मणि भूते। पारं दृष्टवान् पारदृश्वा।

---

809. **खित्यनव्ययस्य इति**- ख् इद् यस्यासौ खित् तस्मिन् खिति। बहुव्रीहिः। न अव्ययस्य अनव्ययस्य। नञ्तत्पुरुषः। प्रकृतसूत्रे ''इको ह्रस्वोऽङ्यो गालवस्य'' इति सूत्राद् ह्रस्वः इति पदस्यानुवृत्तिः समायाति। ह्रस्वश्रवणाद् अचः उपस्थितिर्भवति। अतः **खिदन्ते परे पूर्वपदस्य ह्रस्वः स्याद् इत्यर्थो जायते।**

**रूपसिद्धिः**

**कालिम्मन्या**- आत्मानं कालीं मन्यते इति विग्रहे काली (अम्) इति उपपदाद् दैवादिक मन् धातोः ''आत्ममाने खश्च'' इति खश्प्रत्यये, अनुबन्धलोपे, काली अम् मन् अ इति जाते, सार्वधातुकसञ्ज्ञायां, ''दिवादिभ्यः श्यन्'' इति श्यन्-प्रत्यये, अनुबन्धलोपे, काली अम् मन् य अ इति जाते, ''अतो गुणे'' इति पररूपे, काली अम् मन्य इति जाते, कृद्योगे कर्मणः षष्ठ्यां, काली ङस् मन्य इति जाते, उपपदसमासे, सुब्लुकि, कालीमन्य इति जाते, ''खित्यनव्ययस्य'' इति ह्रस्वे, कालिमन्य इति जाते, ''अरुर्द्विषदजन्तस्य मुम्'' इति मुमागमे, अनुबन्धलोपे कालिम् मन्य इति जाते, ''मोऽनुस्वारः'' इति मकारस्य अनुस्वारे, ''वा पदान्तस्य'' इति सूत्रेण विकल्पेन अनुस्वारस्य 'म्' इति कृते कालिम्मन्य इति जाते, स्त्रीत्वविवक्षायाम् ''अजाद्यतष्टाप् इति सूत्रेण टाप्-प्रत्यये, अनुबन्धलोपे, कालिम्मन्य आ इति जाते, ''अकः सवर्णे दीर्घः'' इति अकार-आकारयोः स्थाने आकारे दीर्घे, स्वादिकार्ये 'कालिम्मन्या' इति रूपं सिद्धम्।

810. **करणे इति**- करणे यजः इत्यस्मिन् सूत्रे भूते इति सूत्रस्याधिकारः समायाति। अतः **करणे उपपदे भूतार्थे यजेर्णिनिप्रत्ययः स्यात् कर्तरि इत्यर्थः।**

**रूपसिद्धिः**

**सोमयाजी**- सोमेन इष्टवान् इति विग्रहे सोम टा इत्युपपदात् यज् (यज देवपूजा-संगतिकरण-दानेषु) धातोः ''करणे यजः'' इति सूत्रेण णिनिप्रत्यये, अनुबन्धलोपे, सोम टा यज् इन् इति जाते, ''अत उपधाया'' इत्युपधावृद्धौ, सोम टा याजिन् इति जाते, ''गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः'' इति परिभाषाबलात् ''उपपदमतिङ्'' इति उपपदसमासे, सुब्लुकि, सोमयाजिन् इति जाते, कृदन्तत्वात् समासत्वाद्वा ''कृत्तद्धित. इत्यादिना सुप्रत्यये, अनुबन्धलोपे, सोम याजिन् स् इति जाते, ''सौ च'' इति उपधादीर्घे, सोमयाजीन् स् इति जाते, सलोपे नलोपे च कृते 'सोमयाजी' इति रूपं सिद्धम्।

**अग्निष्टोमयाजी**- अग्निष्टोमेन इष्टवान् इति विग्रहे 'सोमयाजी' इतिवत्।

811. **दृशेः क्वनिबिति**- अत्र ''आतो मनिन् क्वनिब्वनिपश्च'' इति सूत्रेण ''अन्येभ्योऽपि दृश्यन्ते'' इति सूत्रेण च क्वनिप्प्रत्ययः भवितुमर्हति, पुनः अत्र क्वनिब्ग्रहणं तत्रत्यानां तत्साहचर्येण मनिन् वनिप् सोपपद अणादिप्रत्ययानां बाधनार्थम्। प्रकृतसूत्रस्यार्थः वर्तते यद् **दृशधातोः क्वनिप्प्रत्ययः स्यात् कर्मणि भूतेऽर्थे।**

**रूपसिद्धिः**

**पारदृश्वा**- पारं दृष्टवान् इति विग्रहे, पार अम् उपपदपूर्वकाद् दृश् धातोः ''दृशेः क्वनिप्'' इति सूत्रेण क्वनिप् प्रत्यये, अनुबन्धलोपे, पार अम् दृश् वन् इति जाते, कित्वात् लघूपधगुणनिषेधे, कृद्योगे कर्मणः षष्ठ्यां कृते, पार ङस् दृश् वन् इति जाते, ''गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः'' इति परिभाषाबलात् विभक्त्युत्पत्तेः पूर्वमेव ''उपपदमतिङ्'' इति उपपदसमासे, प्रातिपदिकत्वात् सुब्लुकि, पारदृश्वन् इति जाते, प्रातिपदिकत्वात् पुनः ''स्वौजस.'' इत्यादिना सूत्रेण सुप्रत्यये अनुबन्धलोपे, पारदृश्वन् स् इति जाते, उपधादीर्घे पारदृश्वान् स् इति जाते, सलोपे नलोपे च कृते 'पारदृश्वा' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

812. **राजनि युधि कृञः ( 3-2-95 ) ।। विधिसूत्रम् ।।**
क्वनिप् स्यात्। युधिरन्तर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा।

813. **सहे च ( 3-2-96 ) ।। विधिसूत्रम् ।।**
कर्मणीति निवृत्तम्। सह योधितवान् सहयुध्वा। सहकृत्वा।

814. **सप्तम्यां जनेर्डः ( 3-2-97 ) ।। विधिसूत्रम् ।।**

815. **तत्पुरुषे कृति बहुलम् ( 6-3-14 ) ।। विधिसूत्रम् ।।**
ङेरलुक्। सरसिजम्। सरोजम्।

816. **उपसर्गे च सञ्ज्ञायाम् ( 33-2-99 ) ।। विधिसूत्रम् ।।**
प्रजा स्यात् सन्ततौ जने।

---

812. **राजनि इति**– अत्र सूत्रे राजनि युधि कृञः इति इति पदत्रयं वर्तते। राजनि इत्यत्र सप्तमी विभक्तिः। युधिश्च कृञ् च युधिकृञ्, तस्मात् = युधिकृञ समाहारद्वन्द्वसमासः। राजनि इति कर्मणि इत्यनेन अन्वितो भवति, ततः सूत्रार्थो भवति– **राजन् - शब्दे कर्मणि उपपदे युध्यतेः करोतेः च क्वनिप्प्रत्ययः स्यात्।**

**रूपसिद्धिः**

**राजयुध्वा**– राजानं योधितवान् इति विग्रहे, राजन् अम् इत्युपपदात् युध् धातोः ''राजनि युधि कृञः'' इति सूत्रेण क्वनिप् प्रत्यये, अनुबन्धलोपे, राजन् अम् युध वन् इति जाते, कित्त्वात् लघूपधगुणनिषेधे, कृद्योगे कर्मणः षष्ठ्याम्, उपपदसमासे, सुब्लुकि, राजयुध्वन् इति जाते, प्रातिपदिकसञ्ज्ञायां ''स्वौजस.'' इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, राजयुध्वन् स् इति जाते, ''सर्वनामस्थानेचाऽसम्बुद्धौ'' इत्युपधादीर्घे, राजयुध्वान् स् इति जाते, सलोपे नलोपे च 'राजयुध्वा' इति रूपं सिद्धम्।

**राजकृत्वा**– राजानं कृतवान् इति विग्रहे, राजयुध्वावत् रूपं निष्पन्नं भवति।

813. **सहे चेति**– अत्र सूत्रे चकारेण युधिकृञ्भ्यां क्वनिब् इत्यर्थः गृह्यते। कर्मणि इत्यर्थः निवृत्तः। ततः **सह उपपदक-युध्-धातोः कृञ्धातोश्च क्वनिप्प्रत्ययः स्याद् भूतार्थे इत्यर्थो निष्पद्यते।**

**रूपसिद्धिः**

**सहयुध्वा**– सह योधितवान् इति विग्रहे, सह इति उपपदपूर्वकाद् युध् धातोः ''सहे च'' इति सूत्रेण क्वनिप् प्रत्यये, अनुबन्धलोपे, सहयुध्वन्, प्रत्ययस्य कित्त्वात् लघूपधगुणनिषेधे, उपपदसमासे, प्रातिपदिकत्वात् स्वादिकार्ये, सहयुध्वन् स् इति जाते, उपधादीर्घे सहयुध्वान् स् इति जाते, सलोपे नलोपे च कृते 'सहयुध्वा' इति रूपं सिद्धम्।

**सहकृत्वा**– सह कृतवान् इति विग्रहे सह इति उपपदपूर्वकात् ''सहे च'' इति क्वनिप् प्रत्यये, अनुबन्धलोपे, सह कृ वन् इति जाते, ''ह्रस्वस्य पिति कृति तुक्'' इति तुगागमे, अनुबन्धलोपे, सह कृत्वन् इति जाते, कित्त्वाद् गुणनिषेधे, उपपदसमासे, प्रातिपदिकत्वात् स्वादिकार्ये, सहकृत्वन् स् इति जाते, उपधादीर्घे, सहकृत्वान् स् इति जाते, सलोपे नलोपे च 'सहकृत्वा' इति रूपं सिद्धम्।

814. **सप्तम्यामिति**– सप्तम्यां जनेर्डः इत्यत्र जनेरिति पदं जनिधातोः पञ्चम्यन्तम्। सूत्रस्यार्थः वर्तते–**सप्तम्यन्ते उपपदे जन्धातोः डः प्रत्ययः स्यादिति।**

815. **तत्पुरुषे इति**– इत्यत्र तत्पुरुषे विषयार्थे सप्तमी। कृति निमित्तसप्तमी। बहुलशब्दः विकल्पवाचकः। **तत्पुरुष-समासे कृत्प्रत्ययान्ते शब्दे परे विकल्पेन ङेरलुक् स्यादिति सूत्रार्थः।**

816. **उपसर्गे चेति**– उपसर्गे इति उपपदम्। सञ्ज्ञायाम् इति विषयसप्तमी। अस्य सूत्रस्यार्थो भवति – **उपसर्गे उपपदे जन्धातोः डः प्रत्ययः स्यादिति।**

**रूपसिद्धिः**

**सरसिजम्, सरोजम्**– इत्यत्र सरसि जातम् इति विग्रहे, सरसि उपपदे जन्धातोः ''सप्तम्यां जनेर्डः'' इति सूत्रेण डप्रत्ययेऽनुबन्धलोपे, डित्त्वसामर्थ्यादभस्यापि ''टेः'' इति सूत्रेण टिलोपे, सरस् इ ज् अ इति जाते, उपपदसमासे, सुब्लुकि प्राप्ते, ''तत्पुरुषे कृति बहुलम्'' इति सूत्रेण ङेः विकल्पेन अलुकि, सरसिज इति जाते, प्रातिपदिकत्वात् स्वादिकार्ये, 'सरसिजम्' इति रूपं सिद्धम्। विकल्पाभावपक्षे सरसि जन् अ इति जाते, टिलोपे, उपपदसमासे, सुब्लुकि सरस् ज इति जाते, सस्य रुत्वे ''हशिचेति'' उत्वे. ''आद्गुणः'' इति गुणे, स्वादिकार्ये सरोजम् इति रूपं सिद्धम्।

**प्रजा**– प्रजाता इति विग्रहे 'प्र' इत्युपसर्गपूर्वकाद् जन्धातोः ''उपसर्गे च सञ्ज्ञायाम्'' इति सूत्रेण डप्रत्यये, अनुबन्धलोपे, प्र जन् अ इति जाते, डित्त्वसामर्थ्याद् अभस्यापि ''टेः'' इति सूत्रेण टि (अन्) लोपे, प्र ज् अ इति जाते, स्त्रीत्वविवक्षायाम् ''अजाद्यतष्टाप्'' इति टाप्-प्रत्यये, अनुबन्धलोपे, सवर्णदीर्घे, प्रजा इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'प्रजा' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

817. **क्तक्तवतू निष्ठा ( 1-1-26 ) ।। विधिसूत्रम् ।।**
एतौ निष्ठासंज्ञौ स्त:।

818. **निष्ठा ( 3-2-102 ) ।। विधिसूत्रम् ।।**
भूतार्थवृत्तेर्धातो: निष्ठा स्यात्। तत्र तयोरेवेति भावकर्मणो: क्त: कर्तरि कृदिति कर्तरि क्तवतु:। उकावितौ। स्नातं मया। स्तुतस्त्वया विष्णु:। विश्वं कृतवान् विष्णु:।

---

817. **क्त-क्तवतू निष्ठेति**- क्तश्च क्तवतुश्चेति क्तक्तवतू, इतरेतरद्वन्द्व:। क्तप्रत्ययस्य ककारोऽनुबन्ध:। क्तवतु इत्यस्य ककार: उकारश्च अनुबन्धौ स्त:, तवत् इत्यवशिष्यते। **क्त- क्तवतू प्रत्ययौ निष्ठासंज्ञौ स्त: इति सूत्रस्यार्थ:।**

818. **निष्ठेति**- अत्र 'भूते' इति सूत्रस्याधिकार: समायाति। अत: **भूतार्थवृत्ते: निष्ठासंज्ञकौ क्तक्तवतू प्रत्ययौ भवत: इति सूत्रस्यार्थ:।** ''तयोरेव कृत्यक्तखलर्था:'' इति सूत्रेण च क्तप्रत्ययस्य विधानं भावकर्मणोरेव भवति, ''कर्तरि कृत्'' इति सूत्रविधानात् क्तवतुप्रत्ययस्य विधानं कर्त्रर्थे भवति। अत एव कथितं मूले-स्नातं मया। अत्र अकर्मकत्वाद् भावे क्त- प्रत्यय:। स्तुतस्त्वया विष्णु: इत्यत्र सकर्मकत्वात् कर्मणि क्तप्रत्यय:। विष्णु: विश्वं कृतवान् इत्यत्र कर्तरि अर्थे क्तवतुप्रत्यय:।

**रुपसिद्धि:**

**स्नातं मया**- अत्र स्नाधातोरकर्मकत्वात् ''निष्ठा'' इति सूत्रेण भावे क्तप्रत्यये, अनुबन्धलोपे, स्ना त इति जाते, ''आर्धधातुकस्येड्वलादे:'' इति इडागमे प्राप्ते, ''एकाच उपदेशेऽनुदात्तात्'' इति निषेधे, स्नात इति जाते, अद्रव्यत्वात् 'सामान्ये नपुंसकम्' इति नपुंसकलिङ्गे, एकवचने कृदन्तत्वात्, प्रातिपदिकसञ्ज्ञायां ''स्वौजस.'' इत्यादिना सु प्रत्यये, ''अतोऽम्'' इति सुस्थाने अमि, ''अमिपूर्व:'' इति पूर्वरूपे 'स्नातम्' इति रूपं सिद्धम्।

**स्तुतस्त्वया विष्णु**:- अत्र स्तु (ष्टु)-धातो: सकर्मकत्वात् ''निष्ठा'' इति कर्मणि क्तप्रत्यये, स्तु त इति जाते, इट्प्राप्ते, निषेधे, ''सार्वधातुकार्धधातुकयो:'' इति गुणे प्राप्ते, ''क्ङिति च'' इति निषेधे, स्तुत इति जाते, कृदन्तत्वात् ''कृत्तद्धित.'' इत्यादिना प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'स्तुत:' इति रूपं सिद्धम्।

**विश्वं कृतवान् विष्णु**: - अत्र डुकृञ्धातो: ''निष्ठा'' इति सूत्रेण कर्तरि क्तवतु प्रत्यये, अनुबन्धलोपे, कृ तवत् इति जाते, इट् प्राप्ते, निषेधे, ''सार्वधातुकार्धधातुकयो'' रिति गुणे प्राप्ते, कित्त्वात् ''क्ङिति च'' इति निषेधे, कृतवत् इति जाते, ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सुप्रत्यये, अनुबन्धलोपे, कृतवत् स् इति जाते, ''अत्वसन्तस्य चाऽधातो:'' इति उपधादीर्घे, कृतवात् स् इति जाते, ''उगिदचां सर्वनामस्थानेऽधातो:'' इति नुमागमेऽनुबन्धलोपे, कृतवान् त् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे, ''संयोगान्तस्य लोप:'' इति तलोपे 'कृतवान्' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

819. **रदाभ्यां निष्ठातो नः पूर्वस्य च दः ( 8-2-42 ) ।। विधिसूत्रम् ।।**
रदाभ्यां परस्य निष्ठातस्य नः स्यात् निष्ठापेक्षया पूर्वस्य धातोर्दस्य च। ''शॄ'' हिंसायाम्। ॠत इत्। रपरः। णत्वम्। शीर्णः। भिन्नः। छिन्नः।

820. **संयोगादेरातो धातोर्यण्वतः ( 8-3-43 ) ।। विधिसूत्रम् ।।**
निष्ठा-तस्य नः स्यात्। द्राणः। ग्लानः।

---

819. **रदाभ्यामिति**- रश्च दश्चेति रदौ, ताभ्यां रदाभ्याम्, इतरेतरद्वन्द्वः। निष्ठायाः त् = निष्ठात्, तस्य = निष्ठातः, षष्ठीतत्पुरुषः। अर्थात् निष्ठासञ्ज्ञकस्य तकारस्येत्यर्थः। रदाभ्यामिति पञ्चम्याः द्विवचनम्। नः इति पदं प्रथमान्तं, दः इति पदञ्च षष्ठ्यन्तम्। अतः **रेफदकाराभ्यां परस्य निष्ठायाः तकारस्य नकारः स्यात्, निष्ठापेक्षया पूर्वदकारस्यापि इति सूत्रार्थो भवति।**

**रूपसिद्धिः**

**शीर्णः ( नाशितः )** - इत्यत्र ''शॄ हिंसायां धातोः'' ''निष्ठा'' इति कर्मणि क्तप्रत्यये, अनुबन्धलोपे, शॄ त इति जाते, ''आर्धधातुकस्येड्वलादेः'' इति इडागमे प्राप्ते, ''श्र्युकः किति'' निषेधे, ''सार्वधातु. इत्यादिना गुणे प्राप्ते, ''क्ङिति च'' इति निषेधे, ''ॠत इद् धातोः'' इति सूत्रेण ॠकारस्य इत्वे, रपरत्वे, शिर् त इति जाते, ''हलि च'' इति उपधा दीर्घे, शीर् त इति जाते, ''रदाभ्यां निष्ठातो नः पूर्वस्य च दः'' इति तकारस्य नकारे, शीर् न इति जाते, ''रषाभ्यां नो णः समानपदे'' इति नस्य णत्वे, शीर् ण इति जाते, जलतुम्बिकान्यायेन रेफस्योर्ध्वगमने शीर्ण इति जाते, ''कृत्तद्धित.'' इत्यादिना सूत्रेण प्रातिपदिकसञ्ज्ञायां ''स्वौजस.'' इत्यादिना सुप्रत्ययेऽनुबन्धलोपे, शीर्ण स् इति जाते, सस्य रुत्वेऽनुबन्धलोपे, रेफस्य विसर्गे ''शीर्णः'' इति रूपं सिद्धम्।

**भिन्नः ( त्रोटितः )** - इत्यत्र भिदिर् विदारणे इति धातोः ''निष्ठा'' इति सूत्रेण क्तप्रत्ययेऽनुबन्धलोपे, भिद् त इति जाते, इट् प्राप्ते, ''एकाच.'' इत्यादिना निषेधे, लघूपधगुणे प्राप्ते, ''क्ङिति च'' इति निषेधे, ''रदाभ्यां निष्ठातो नः पूर्वस्य च दः'' इति सूत्रेण दकारतकारयोः स्थाने नकारे भिन्न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'भिन्नः' इति रूपं सिद्धम्।

**छिन्नः ( कर्तितः )** - 'छिदिर् द्वैधीकरणे' इति धातोः ''निष्ठा'' इति सूत्रेण क्तप्रत्यये, अनुबन्धलोपे, छिद् त इति जाते, इट् प्राप्ते, निषेधे, गुणे प्राप्ते, निषेधे, ''रदाभ्यामि'' त्यादिना दकारतकारयोः नकारे छिन्न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'छिन्नः' इति रूपं सिद्धम्।

820. **संयोगादेति**- संयोगः आदिर्यस्य सः संयोगादिः, तस्मात् संयोगादेः। बहुव्रीहिसमासः। यण् अस्य अस्तीति यण्वान्, तस्य यण्वतः। ''रदाभ्यां निष्ठातो नः पूर्वस्य च दः'' इति सूत्राद् ''निष्ठातो नः'' इत्यस्यानुवृत्तिः समायाति। ततः सूत्रस्यार्थः भवति - **यण्वतः संयोगादाकारान्ताद् धातोः परे निष्ठायाः तकारस्य नकारः स्यादिति।**

**रूपसिद्धिः**

**द्राणः ( कुत्सितः )** - 'द्रा कुत्सायां गतौ' धातोः ''निष्ठा'' इति क्तप्रत्यये, अनुबन्धलोपे, द्रा त इति जाते, इट् प्राप्ते, ''एकाचेति'' निषेधे, ''संयोगादेरातो धातोर्यण्वतः'' इति सूत्रेण तकारस्य नकारे, द्रा न इति जाते, ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे, द्राण इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'द्राणः' इति रूपं सिद्धम्।

**ग्लानः ( खिन्नः )** - 'ग्लै हर्षक्षये' इति धातोः ''आदैच उपदेशेऽशिति'' इति आत्वे ''निष्ठा'' इति सूत्रेण क्तप्रत्यये, अनुबन्धलोपे, ग्ला त इति जाते, ''संयोगादेरातोधातोर्यण्वतः'' इति तस्य नत्वे, ग्ला न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'ग्लानः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

821. **ल्वादिभ्यः ( 8-2-44 ) ।। विधिसूत्रम् ।।**
एकविंशतेः लूञादिभ्यः प्राग्वत्। लूनः। ज्याधातुः। ग्रहिज्येति- सम्प्रसारणम्।

822. **हलः ( 6-4-2 ) ।। विधिसूत्रम् ।।**
अङ्गावयवाद्धलः परं यत् सम्प्रसारणं, तदन्तस्य दीर्घः। जीनः।

823. **ओदितश्च ( 8-2-45 ) ।। विधिसूत्रम् ।।**
भुजो भुग्नः। टु ओश्वि - उच्छूनः।

824. **शुषः कः ( 8-2-51 ) ।। विधिसूत्रम् ।।**
निष्ठा तस्य कः। शुष्कः।

825. **पचो वः ( 8-2-52 ) ।। विधिसूत्रम् ।।**
पक्वः। क्षै क्षये।

---

821. **ल्वादिभ्यः इति**- लू आदिर्येषां ते ल्वादयः, तेभ्यो ल्वादिभ्यः, तद्गुणसंविज्ञानबहुव्रीहिसमासः। निष्ठायाः त्, तस्य निष्ठातः, षष्ठी-तत्पुरुषः। **लू आदयः एकविंशतिर्धातवः सन्ति तेभ्यः परे निष्ठायाः यः तकारः, तस्य नः स्यादिति सूत्रार्थः।**

822. **हलः इति**- हलः इति पञ्चम्यन्तं पदम्। **अङ्गावयवाद् हलः परस्य सम्प्रसारणान्ताङ्गस्य अन्त्यं दीर्घः स्यादिति सूत्रार्थः।**

**रूपसिद्धिः**

**लूनः**- 'लूञ् छेदने' धातोः "निष्ठा" इति क्त प्रत्यये, लू त इति जाते, इट् प्राप्ते "श्र्युकः किति" इति इटः निषेधे, "सार्वधातुक." इत्यादिना गुणे प्राप्ते, "क्ङिति च" इति निषेधे, "ल्वादिभ्यः" इति तस्य नत्वे, लू न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'लूनः' इति रूपं सिद्धम्।

**जीनः**- 'ज्या वयोहानौ' धातोः 'निष्ठा' इति क्तप्रत्ययेऽनुबन्धलोपे, ज्या त इति जाते, इट् प्राप्ते, "एकाचेति" इण्निषेधे "ग्रहिज्या." इत्यादिना सूत्रेण यकारस्य इकारे सम्प्रसारणे, ज् इ आ त इति जाते, "सम्प्रसारणाच्च" इति पूर्वरूपे जित इति जाते, "सार्वधातुका." इत्यादिना गुणे प्राप्ते, "क्ङिति च" इति गुणनिषेधे, "हलः" इति सूत्रेण दीर्घे जी त इति जाते, "संयोगादेरातो धातोर्यण्वतः" इति सूत्रेण तकारस्य नकारे, जी न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'जीनः' इति रूपं सिद्धम्।

823. **ओदितश्चेति- ओत् ( ओकारः ) इत् यस्य सः ओदित्, तस्माद् ओदितः, बहुव्रीहिसमासः। ओदित्-धातोः परे यः निष्ठायाः तकारः, तस्य नकारो भवतीति सूत्रार्थः।**

824. **शुष इति**- शुषः इति पदं पञ्चम्यन्तम्। **शुष्धातोः परे यः निष्ठायाः तकारः, तस्य ककारो भवतीति सूत्रार्थः।**

825. **पच इति- पच्धातोः परे निष्ठायाः तकारस्य स्थाने वकारादेशः स्यादिति सूत्रार्थः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

826. **क्षायो मः ( 8-2-52 ) ।। विधिसूत्रम् ।।**
क्षामः।

827. **निष्ठायां सेटि ( 6-4-52 ) ।। विधिसूत्रम् ।।**
णेर्लोपः। भावितः। भावितवान्। दृह हिंसायाम्।

828. **दृढः स्थूलबलयोः ( 7-2-20 ) ।। विधिसूत्रम् ।।**
स्थूले बलवति च निपात्यते।

---

826. **क्षायो म इति**– हर्षक्षयार्थकात् क्षै-धातोः ''आदैच उपदेशेऽशिति'' इति सूत्रेण ऐकारस्य आत्वे, ततः प्रकृतसूत्रेण **धातोः परस्य निष्ठायाः तकारस्य स्थाने मकारादेशः स्यादिति सूत्रार्थः।**

**रूपसिद्धिः**

**भुग्नः ( टेढा किया गया )** – 'भुजो कौटिल्ये' इत्यस्माद् धातोः अनुबन्धलोपे, भुज् इति जाते, ''निष्ठा'' इति सूत्रेण क्तप्रत्यये, अनुबन्धलोपे, भुज् त इति जाते, इट् प्राप्ते, एकाचेति निषेधे ''ओदितश्च'' इति तकारस्य नकारे, भुज् न इति जाते, नत्वस्याद्धित्वात् ''चोः कुः'' इति जस्य गत्वे (कुत्वे) भुग् न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'भुग्नः' इति रूपं सिद्धम्।

**उच्छूनः ( फूला हुआ, सूजा हुआ )**– उद् पूर्वकात् 'टुओ श्वि गतिवृद्धयोः' इति धातोः अनुबन्धलोपे, उद् श्वि इति जाते, ''निष्ठा'' इति क्तप्रत्यये, उद् श्वि त इति जाते, इट् प्राप्ते, ''श्वीदितो निष्ठायाम्'' इति इण्निषेधे, ''वचिस्वपियजादीनां किति'' इति वकारस्य उकारे सम्प्रसारणे, उद् श् उ इ त इति जाते, ''सम्प्रसारणाच्च'' इति पूर्वरूपे, उद् श् उ त इति जाते, ''हलः'' इति उकारस्य दीर्घे उद् शू त इति जाते, ''ओदितश्च'' इति तकारस्य नकारे, उद् शू न इति जाते, ''स्तोः श्चुना श्चुः'' इति दस्य जकारे श्चुत्वे उज् शू न इति जाते, ''खरि च'' इति जकारस्य चकारे चर्त्वे उच् शू न इति जाते, ''शश्छोऽटि'' इति विकल्पेन छत्वे, उच्छून इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'उच्छूनः' इति रूपं सिद्धम्।

**शुष्कः**– 'शुष शोषणे' धातोः अकर्मकत्वात् कर्तरि क्तप्रत्यये, अनुबन्धलोपे, शुष् त इति जाते, ''शुषः कः'' इति तकारस्य ककारे, शुष् क इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'शुष्कः' इति रूपं सिद्धम्।

**पक्वः**– डुपचष् पाके (पच्) धातोः ''निष्ठा'' इति सूत्रेण क्तप्रत्यये, अनुबन्धलोपे, पच् त इति जाते, ''पचो वः'' इति तकारस्य वकारे, पच् व इति जाते, ''चोः कुः'' इति चकारस्य ककारे (कुत्वे), पक् व इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'पक्वः' इति रूपं सिद्धम्।

**क्षामः**– क्षै क्षये अकर्मकधातोः ''आदैच उपदेशेऽशिति'' इति ऐकारस्य आत्वे, ''गत्यर्थाकर्मक-श्लिष-शीङ्-स्थास-वस-जन-रुह-जीर्यतिभ्यश्च'' इति सूत्रेण कर्तरि अर्थे क्तप्रत्यये, अनुबन्धलोपे, क्षा त इति जाते, इट्प्राप्ते, ''एकाचेति'' निषेधे, क्षा त इति जाते, ''क्षायो मः'' इति सूत्रेण तकारस्य मकारे, क्षा म इति जाते, प्रातिपदिकात् स्वादिकार्ये 'क्षामः' इति रूपं सिद्धम्।

827. **निष्ठायामिति**– अत्र ''णेरनिटि'' इति सूत्राद् णेरित्यस्य ''आतो लोप इटि च'' इति सूत्राच्च आल्लोप इत्यस्यानुवृत्तिः समायाति। ''णेरनिटि'' इति सूत्रेण अनिडाद्यार्धधातुके परे एव णेर्लोपो भवति, न तु इट् परे, अतः **सेटः निष्ठायाः परे णिलोपः स्यादेतदर्थमस्य सूत्रस्य प्रारम्भः कृतः।**

828. **दृढः स्थूलेति** – ''दृढः स्थूलबलयोरिति'' सूत्रं निपातनविधायकम्। अन्यादृशप्रयोगे प्राप्ते अन्यादृशकरणं निपातनम्।''



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

829. **दधातेर्हिः ( 7-4-42 ) ।। विधिसूत्रम् ।।**
तादौ किति। हितम्।

830. **दो दद्घोः ( 7-4-46 ) ।। विधिसूत्रम् ।।**
घु - संज्ञकस्य दा इत्यस्य दद् स्यात्तादौ किति। चर्त्वम्। दत्तः।

831. **लिटः कानज्वा ( 3-2-106 ) ।। विधिसूत्रम् ।।**

832. **क्वसुश्च ( 3-2-107 ) ।। विधिसूत्रम् ।।**
लिटः कानच् क्वसुश्च वा स्तः। तङानावात्मनेपदम्। चक्राणः।

---

829. **दधातेर्हिः** इति प्रकृतसूत्रे ''द्यति-स्यति-मा-स्थाम् इत् ति किति'' इति तादिकितः इत्यस्यानुवृतिः समायाति। अतः सूत्रस्यार्थो भवति - ''**धा**'' - **धातोः स्थाने ह्यादेशः स्यात्तादि कित्परे इति।**

**रूपसिद्धिः**

**भावितः, भावितवान्** - भू सत्तायां धातोः ''हेतुमति च'' इति णिच्-प्रत्यये, भू इ इति जाते, ''अचो ञ्णिति'' इति सूत्रेण वृद्धौ, भौ इ इति जाते, ''एचोऽयवायावः'' इति औकारस्य आवादेशे भ् आव् इ इति जाते, ''सनाद्यन्ता धातवः'' इति सूत्रेण धातुसञ्ज्ञायां, भावि इति सकर्मकाद्धातोः ''निष्ठा'' इति क्तप्रत्ययेऽनुबन्धलोपे, भावि त इति जाते, ''आर्धधातुकस्येड्वलादेः'' इति सूत्रेण इऽागमे, अनुबन्धलोपे, भावि इ त इति जाते, ''निष्ठायां सेटि'' इति सूत्रेण णिलोपे, भाव् इ त इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'भावितः' इति रूपं सिद्धम्।

**भावितवान्**- क्तवतुप्रत्यये कृते, इडागमेऽनुबन्धलोपे भावि इ तवत् इति जाते, णिलोपे, भाव् इ तवत् इति जाते, प्रातिपदिकसञ्ज्ञायां सु प्रत्यये, अनुबन्धलोपे, भावितवत् स् इति जाते, ''अत्वसन्तस्य चाऽधातोः'' इति सूत्रेण उपधादीर्घे भावितवात् स् इति जाते, ''उगिदचां सर्वनामस्थानेऽधातोः'' इति सूत्रेण नुमागमे, अनुबन्धलोपे भावितवान् त् स् इति जाते, हल्ङ्यादिसलोपे, संयोगान्ततकारस्य लोपे, 'भावितवान्' इति रूपं सिद्धम्।

**हितम्**- डुधाञ् धारण-पोषणयोः (धा) धातोः ''निष्ठा'' इति सूत्रेण क्तप्रत्यये, अनुबन्धलोपे, धा त इति जाते, इट् प्राप्ते, इण्निषेधे, ''घुमास्थागापाजहातिसां हलि'' इति ईत्वे प्राप्ते, ''दधातेर्हि'' इति धा स्थाने हि आदेशे, हित इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'हितम्' इति रूपं सिद्धम्।

830. **दो दद्घोरिति** - दाधातोः षष्ठ्येकवचने दः इति रूपं, दद् इति प्रथमान्तम्। घु इत्यस्य षष्ठ्येकवचने घोः इति रूपं जायते। अत एव सूत्रस्यार्थो भवति यद् **घुसञ्ज्ञकस्य दा-धातोः स्थाने दद् इत्यादेशः स्यात्तादि-किति परे।**

831. **लिटः कानज्वेति**- अत्र सूत्रे 'छन्दसि' इत्यस्य 'भूते' इत्यस्य च अनुवृत्तिः समायाति। ततः सूत्रस्यार्थो भवति - **छन्दसि भूते लिटः स्थाने कानजादेशः स्यादिति।**

832. **क्वसुश्चेति**- क्वसुश्चेत्यस्मिन् सूत्रे 'छन्दसि' भूते इति पदद्वयम् अनुकृष्यते। **छन्दसि भूतार्थे लिटः कानच् क्वसुश्चादेशः स्यादिति सूत्रार्थः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

833. **म्वोश्च ( 8-2-65 ) ।। विधिसूत्रम् ।।** मान्तस्य धातोर्नत्वं म्वोः परतः। जगन्वान्।

834. **लटः शतृशानचावप्रथमासमानाधिकरणे ( 3-2-124 ) ।। विधिसूत्रम् ।।** अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः। शबादिः। पचन्तं चैत्रं पश्य।

835. **आने मुक् ( 7-2-82 ) ।। विधिसूत्रम् ।।** अदन्ताङ्गस्य मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणात् प्रथमासमानाधिकरणेऽपि क्वचित्। सन् द्विजः।

---

833 **म्वोश्चेति- म् च व् च म्वौ, तयोः=म्वोः, इरेतरद्वन्द्वः। मान्तस्य धातोर्नत्वं स्याद् म्वोः परतः इति सूत्रार्थः।**

**रूपसिद्धिः**

**दत्तः**:- अत्र दा (डुदाञ् दाने) धातोः ''निष्ठा'' इति सूत्रेण क्तप्रत्ययेऽनुबन्धलोपे ''दाधाघ्वदाप्'' इति सूत्रेण 'दा' धातोः घुसञ्ज्ञायां ''दो दद्घोः'' इति सूत्रेण दा स्थाने दद् इत्यादेशे, दद् त इति जाते, ''खरि च'' इति दकारस्य (चर्त्वे) तकारे दत्त इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'दत्तः' इति रूपं निष्पन्नम्।

**चक्राणः** – 'डुकृञ् करणे' धातोः कर्तृविवक्षायां भूतसामान्ये ''छन्दसि लिट्'' इति लिट् प्रत्यये, ''लिटः कानज्वा'' इति लिटः कानजादेशेऽनुबन्धलोपे, कृ आन इति जाते। स्थानिवद्भावात् ''लिटि धातोरनभ्यासस्य इति धातोः द्वित्वे, कृ कृ आन इति जाते ''पूर्वोऽभ्यासः'' इति अभ्याससञ्ज्ञायाम्, ''उरत्'' इति पूर्व-अभ्याससञ्ज्ञकस्य ऋकारस्य अत्वे, रपरत्वे, कर् कृ आन इति जाते, ''हलादिशेषः'' इति रेफलोपे, क कृ आन इति जाते, ''सार्वधातुकार्धधातुकयोः'' इति ऋकारस्य अकारे गुणे प्राप्ते, कानचः कित्त्वात् ''क्ङिति च'' इति निषेधे, ''इको यणचि'' इति ऋकारस्य र् यणि कृते, च क् र् आन इति जाते, ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति नस्य णत्वे, च क् र् आ ण इति जाते, कृदन्तत्वात् चक्राण इत्यस्य प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'चक्राणः' इति रूपं सिद्धम्।

**जगन्वान्**- गम् (गम्लृ गतौ)- धातोः ''छन्दसि भूते'' इति लिट् प्रत्यये, गम् लिट् इति जाते, ''क्वसुश्च'' इति लिटः क्वसु इत्यादेशेऽनुबन्धलोपे, गम् वस् इति जाते, स्थानिवद्भावात् ''लिटि धातोरनभ्यासस्य'' इति धातोः द्वित्वे, गम् गम् वस् इति जाते, ''पूर्वोऽभ्यासः'' इति पूर्वस्य अभ्याससञ्ज्ञायां, ''हलादिशेषः'' इति अभ्यासमकारस्य लोपे, ग गम् वस् इति जाते, ''कुहोश्चु'' इति पूर्वगकारस्य जकारे (चुत्वे) ज गम् वस् इति जाते, ''म्वोश्च'' इति मस्य नत्वे जगन्वस् इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सुप्रत्यये, जगन्वस् स् इति जाते, ''उगिदचाम्.'' इत्यादिना नुमागमेऽनुबन्धलोपे, जगन्वन् स् स् इति जाते, ''सान्तमहतः संयोगस्य'' इति उपधादीर्घे, जगन्वान् स् स् इति जाते, हल्ङ्यादिलोपे संयोगान्तलोपे च कृते ''जगन्वान्'' इति रूपं सिद्धम्।

834. **लटः शतृशानचाविति**- लटः शतृ – शानचौ अप्रथमासमानाधिकरणे इति सूत्रच्छेदः। शता च शानच् च शतृशानचौ, इतरेतरद्वन्द्वः। न प्रथमा अप्रथमा, नञ् समासः। **अप्रथमासमानाधिकरणे लटः स्थाने शतृ-शानचौ प्रत्ययौ वा स्तः इति सूत्रार्थः।**

**रूपसिद्धिः**

**पचन्तं चैत्रं पश्य**- इत्यत्र पच् (डुपचष्) धातोः ''वर्तमाने लट्'' इति लट् प्रत्ययेऽनुबन्धलोपे, पच् ल् इति जाते, ''लटः शतृ.'' इत्यादिना सूत्रेण लट्स्थाने शतृ आदेशे, अनुबन्धलोपे पच् अत् इति जाते, ''तिङ् शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसञ्ज्ञायां, ''कर्तरि शप्'' इति शपागमे, अनुबन्धलोपे, पच् अ अत् इति जाते, ''अतो गुणे'' इति (अ+अ) पररूपे अ कृते, पचत् इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सूत्रेण अम्-प्रत्यये, पचत् अम् इति जाते, ''उगिदचामिति'' नुमागमेऽनुबन्धलोपे, पचन् त् अम् इति जाते, ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे, पचं तम् इति जाते, ''अनुस्वारस्य ययि परसवर्णः'' इति अनुस्वारस्य नकारे परसवर्णे 'पचन्तम्' इति रूपं सिद्धम्।

835. **आने इति** – अङ्गस्याधिकारे ''आने मुक्'' इति सूत्रस्य पाठः वर्तते। ''अतो येयः'' इति सूत्राच्च अत् इत्यस्यानुवृत्तिः समायाति। अतः सूत्रार्थो वेविद्यते-**अदन्ताङ्गस्य मुमागमः स्याद् आने परे।**

**रूपसिद्धिः**

**पचमानं चैत्रं पश्य**- अत्र पच् (डुपचष्) – धातोः ''वर्तमाने लट्'' इति लट् प्रत्ययेऽनुबन्धलोपे, ''लटः शतृशानचा.'' इत्यादिना लटः शानज्-आदेशेऽनुबन्धलोपे, पच् आन इति जाते, सार्वधातुकसञ्ज्ञायां, शपागमेऽनुबन्धलोपे, पच् अ आन इति जाते, ''आने मुक्'' इति मुगागमेऽनुबन्धलोपे, पचम् आन इति जाते, प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना अम्-प्रत्यये, पचमान अम् इति जाते, ''अमि पूर्वः'' इति पूर्वरूपे, 'पचमानम्' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

836. **विदेः शतुर्वसुः ( 7-1-36 ) ।। विधिसूत्रम् ।।**
वेत्तेः परस्य शतुर्वसुरादेशो वा। विदन्। विद्वान्।

837. **तौ सत्( 3-2-127 ) ।। विधिसूत्रम् ।।**
तौ शतृशानचौ सत्सञ्ज्ञौ स्तः।

838. **लृटः सद्वा ( 3-3-14 ) ।। विधिसूत्रम् ।।**
लृटः शतृशानचौ वा स्तः। व्यवस्थितविभाषेयम्। तेन अप्रथमा समानाधिकरणे प्रत्ययोत्तरपदयोः सम्बोधने लक्षणहेत्वोश्च नित्यम्। करिष्यन्तं करिष्यमाणं पश्य।

---

836. **विदेरिति**– ''विदेः शतुर्वसुः'' इत्यस्मिन् सूत्रे विदेरिति पञ्चम्यन्तं पदम्। शतुरिति पदं षष्ठ्यन्तम्। वसुरित्यत्र प्रथमाविभक्तिः। सूत्रार्थो वर्तते यद् **विद्-धातोः परे शतृप्रत्ययस्य स्थाने विकल्पेन वसुरादेशः स्यादिति।**

837. **तौ सत् इति**– तत् शब्दः भवति बुद्धिस्थस्य परामर्शकः, अतः बुद्धिस्थपरामर्शकत्वात् तौ इति पदेन शतृशानचौ प्रत्ययौ गृह्येते। **तयोः ( शतृ-शानच्-प्रत्यययोः ) सत्-सञ्ज्ञा स्यादिति सूत्रार्थः।**

838. **लृटः सद्वेति**– लृटः स्थाने सत्सञ्ज्ञकौ प्रत्ययौ विकल्पेन स्याताम्।

**रूपसिद्धिः**

**सन् द्विजः**– 'अस् भुवि' धातोः ''वर्तमाने लट्'' इति लटि, अनुबन्धलोपे, अस् ल् इति जाते, ''लटः शतृ.'' इत्यादिना सूत्रेण लटः स्थाने शतृ-आदेशेऽनुबन्धलोपे, अस् अत् इति जाते, सार्वधातुकसञ्ज्ञायां, ''कर्तरि शप्'' इति शबागमे, ''अदिप्रभृतिभ्यः शपः'' इति शब्लुकि, ''श्नसोरल्लोपः'' इति अस् इत्यस्य अलोपे, स् अत् इति जाते, प्रातिपदिकत्वात् ''स्वौजस. इत्यादिना सुप्रत्यये, अनुबन्धलोपे, सत् स् इति जाते, ''उगिदचां.'' इत्यादिना नुमागमेऽनुबन्धलोपे, सन् त् स् इति सलोपे, संयोगान्त-तलोपे 'सन्' इति रूपं सिद्धम्।

**विद्वान्, विदन्**– विद् धातोः ''वर्तमाने लट्'' इति लट् लकारेऽनुबन्धलोपे, ''लटः शतृशानचावप्रथमासमानाधि-करणे'' इति लटः शत्रादेशे, अनुबन्धलोपे, विद् अत् इति जाते, ''विदेः शतुर्वसुः'' इति सूत्रेण शतृ-स्थाने वस्वादेशेऽनुबन्धलोपे, विद् वस् इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां, सौ, ''उगिदचां सर्वनामस्थानेऽधातोः'' इति सूत्रेण नुमागमेऽनुबन्धलोपे, विद् वन् स् स् इति जाते, ''सान्तमहतः संयोगस्य'' इति सूत्रेण उपधादीर्घे, विद्वान् स् स् जाते, हल्ङ्यादिना सलोपे संयोगान्तलोपे च 'विद्वान्' इति रूपं सिद्धम्। वस्वाभावपक्षे शतृप्रत्ययेऽनुबन्धलोपे, शपि, शपो लुकि 'विदत्' इति जाते, प्रातिपदिकत्वात् सुप्रत्ययेऽनुबन्धलोपे, नुमागमेऽनुबन्धलोपे, सलोपे, विदन् त् इति जाते, संयोगान्त-तलोपे 'विदन्' इति रूपं सिद्धम्।

**करिष्यन्तं करिष्यमाणं वा पश्य** – अत्र कृ धातोः लृट् लकारे ''लृटः सद्वा'' इति सूत्रेण विकल्पेन शतृप्रत्ययेऽनुबन्धलोपे, कृ अत् इति जाते,'' आर्धधातुकसञ्ज्ञायां ''स्यतासीलृलुटोः'' इति सूत्रेण स्य-प्रत्यये, ''ऋद्धनोः स्ये'' इति इडागमे, कृ इ स्य अत् इति जाते, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण ऋकारस्य-अ गुणे, रपरत्वे, कर् इ स्य अत् इति जाते, ''आदेश-प्रत्यययोरिति'' सस्य षत्वे, करिष्य अत् इति जाते, ''अतो गुणे'' इति अकार-अकारयोः स्थाने अकारे पररूपे, करिष्यत् इति जाते, कृदन्तवात् प्रातिपदिकसञ्ज्ञायां द्वितीयायाः एकवचने अम् प्रत्यये, करिष्यत् अम् इति जाते, ''उगिदचां सर्वनामस्थानेऽधातोः'' इति नुमागमेऽनुबन्धलोपे, करिष्यन् त् अम् इति जाते, ''नस्यानुस्वारे'', परसवर्णे 'करिष्यन्तम्' इति रूपं सिद्धम्। शत्रभावपक्षे शानच् प्रत्ययेऽनुबन्धलोपे, मुमागमेऽनुबन्धलोपे करिष्यम् आन इति जाते, नस्य णत्वे, करिष्यमाण इति जाते, प्रातिपदिकत्वात् स्वादिकार्ये 'करिष्यमाणम्' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

839. **आक्वेस्तच्छील - तद्धर्म - तत्साधुकारिषु ( 3-2-134 ) ।। अधिकारसूत्रम् ।।**
क्विपमभिव्याप्य वक्ष्यमाणा: प्रत्ययास्तच्छीलादिषु कर्तृषु बोध्या:।

840. **तृन् ( 3-2-135 ) ।। विधिसूत्रम् ।।**
कर्ता कटान्।

841. **जल्पभिक्षकुट्टलुण्टवृङ: षाकन् ( 3-2-155 ) ।। विधिसूत्रम् ।।**

842. **ष: प्रत्ययस्य ( 1-3-6 ) ।। सञ्ज्ञासूत्रम् ।।**
प्रत्ययस्यादि: ष: इत्सञ्ज्ञ: स्यात्। जल्पाक:। भिक्षाक:। कुट्टाक:। लुण्टाक:। वराक:। वराकी।

843. **सनाशंस भिक्ष उ: ( 3-2-168 ) ।। विधिसूत्रम् ।।**
चिकीर्षु:। आशंसु:। भिक्षु:।

---

839. **आक्वेरिति**- आ इति अव्ययम्। स (धात्वर्थ:) शीलं = स्वभावो यस्य स तच्छील:, बहुव्रीहिसमास:। स (धात्वर्थ:) धर्म: = आचार: = कुलाचारो यस्य स तद्धर्मा इति बहुव्रीहि:। साधु (सम्यक्प्रकारेण) करोतीति साधुकारी। तस्य साधुकारी तत्साधुकारी, षष्ठीतत्पुरुष:। तच्छीलश्च तद्धर्मा च तत्साधुकारी च तच्छीलतद्धर्म-तत्साधुकारिण:, तेषु तच्छील-तद्धर्म-तत्साधुकारिषु। इतरेतरद्वन्द्व:।

840. **तृन् इति- धातो: तृन्प्रत्यय: स्यात्ताच्छील्यादिषु अर्थेषु।**
**कर्ता कटान्**- कटान् करोति तच्छील: इत्यर्थे कृधातो: ''तृन्'' इति सूत्रेण तृन् - प्रत्ययेऽनुबन्धलोपे, आर्धधातुकसञ्ज्ञायां ''सार्वधातुकार्धधातुकयो:'' इति सूत्रेण गुणे, रपरत्वे, कर्तृ इति जाते कृदन्तत्वात् प्रातिपदिकसंज्ञायां, सुप्रत्ययेऽनुबन्धलोपे, सर्वनामस्थानसंज्ञायां ''ऋदुशनस्पुरुदंसोऽनेहसां च'' इति सूत्रेण अनङादेशेऽनुबन्धलोपे ''सर्वनामस्थाने चाऽसम्बुद्धौ'' इति सूत्रेण उपधादीर्घे, सलोपे नलोपे च कृते कर्ता इति रूपस्य सिद्धिर्जायते।

841. **जल्पभिक्षेति- जल्पश्च, भिक्षश्च, कुट्टश्च, लुण्टश्च, वृङ् च, तस्मात् जल्पभिक्षकुट्टलुण्टवृङ:, समाहारद्वन्द्व:। जल्प, भिक्ष, कुट्ट, लुण्ट, वृङ, एभ्य: पञ्चभ्य: धातुभ्य: षाकन्प्रत्यय: स्यादिति सूत्रार्थ:।**

842. **ष: प्रत्ययस्येति- प्रत्ययस्यादौ य: ष:, तस्य इत्सञ्ज्ञा स्यादिति सूत्रस्यार्थ:।**

**रूपसिद्धि:**

**जल्पाक:**- 'जल्प व्यक्तायां वाचि धातो:' ''जल्पभिक्षकुट्टलुण्टवृङ: षाकन्'' इति सूत्रेण षाकन्प्रत्ययेऽनुबन्धलोपे, जल्पाक इति जाते, कृदन्तत्वात् प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'जल्पाक:' इति रूपं सिद्धम्।

**भिक्षाक:**- भिक्ष्+षाकन् (आक)। [भिक्ष भिक्षायामलाभे लाभे च]

**कुट्टाक:**- कुट्ट्+षाकन् (आक)। [कुट्ट, छेदनभर्त्सनयो:]

**लुण्टाक:**- लुण्ट्+षाकन् (आक)। [लुण्ट स्तेये]

**वराक:**- वृङ्+षाकन् (आक)। [वृङ सम्भक्तौ]

**वराकी:**- वृङ्+षाकन् (आक)+ङीष्। [षिद्गौरादिभ्यश्च]

843. **सनाशंसेति**- सन् च आशंसश्च भिक्ष् च सनाशंसभिक्ष्, तस्मात् = सनाशंसभिक्ष:। समाहारद्वन्द्वसमास:। अत्र **सन्नन्ताद् आङ्पूर्वकात् शंस्धातो: भिक्षधातोश्च उप्रत्यय: स्यात्ताच्छील्यादिषु अर्थेषु इति सूत्रार्थ:।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

844. **भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् ( 3-2-177 ) ।। विधिसूत्रम्** ।। विभ्राट्। भाः।

844. **भ्राजभास इति- भ्राजश्च भासश्च धुर्विश्च द्युतश्च ऊर्जिश्च पृ च जुश्च ग्रावस्तुश्च तस्मात्** = **भासभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः, समाहारद्वन्द्वः। भ्राज्, भास्, धुर्वि, द्युत्, ऊर्जि, पृ, जु, ग्रावस्तु एभ्यः धातुभ्यः क्विप्प्रत्ययः स्यात्तच्छीलादिषु अर्थेषु।** क्विप् इत्यत्र हलन्त्यमिति पकारेत्सञ्ज्ञकः। ककारेत्सञ्ज्ञकः 'लशक्वतद्धिते' इति सूत्रेण, इकारस्येत्सञ्ज्ञा ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेण, वकारस्य लोपश्च ''वेरपृक्तस्य'' इति सूत्रेण भवति, एवं क्विप्प्रत्ययस्य सर्वापहारलोपो भवति।

**चिकीर्षुः**:- सन्नन्तात् चिकीर्षधातोः (डुकृञ्+सन्) ''**सनाशंस भिक्ष उः**'' इति सूत्रेण उप्रत्यये, चिकीर्ष उ इति जाते, ''**अतो लोपः**'' इति सूत्रेण अलोपे, चिकीर्षु इति जाते, ''कृत्तद्धितेति'' प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'चिकीर्षुः' इति रूपं सिद्धम्।

**आशंसुः**:- आङ्-उपसर्गपूर्वकात् 'शसि इच्छायाम्' धातोः ''इदितो नुम्-धातोः'' इति नुमागमे, ''नश्चापदान्तस्य झलि'' इति नस्यानुस्वारे, आशंस् इति जाते, तच्छीलादिकर्तृविवक्षायां, ''सनांशसभिक्ष उः'' इति सूत्रेण उ-प्रत्यये, आशंसु इति जाते, प्रातिपदिकत्वात् स्वादिकार्ये ''आशंसुः'' इति रूपं सिद्धम्।

**भिक्षुः**:- 'भिक्ष भिक्षायामलाभे लाभे च' धातोः ''सनाशंसभिक्ष उः'' इति सूत्रेण उ-प्रत्यये, भिक्ष् उ इति जाते, प्रातिपदिकात् स्वादिकार्ये ''भिक्षुः'' इति रूपं सिद्धम्।

**विभ्राट्**- 'वि' इत्युपसर्गपूर्वकाद् भ्राजृ-दीप्तौ इत्यस्माद्धातोरनुबन्धलोपे, विभ्राज् इति जाते, ''भ्राजभास.'' इत्यादिना सूत्रेण क्विप्प्रत्यये, क्विपः सर्वापहारलोपे, ''कृत्तद्धितेति'' प्रातिपदिकसञ्ज्ञायां सुप्रत्ययेऽनुबन्धलोपे, ''व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राजच्छशां षः'' इति सूत्रेण जकारस्य षकारे, विभ्राष् स् इति जाते, ''झलां जशोऽन्ते'' इति षस्य डत्वे (जश्त्वे), विभ्राड् स् इति जाते, ''वाऽवसाने'' इति सूत्रेण विकल्पेन डकारस्य टकारे सलोपे 'विभ्राट्' इति रूपं सिद्धम्। पक्षे विकल्पाभावे विभ्राड् इति रूपं निष्पन्नम्।

**भाः**:- भासृ दीप्तौ धातोः क्विप्-प्रत्यये, सर्वापहारलोपे, प्रातिपदिकसञ्ज्ञायां सुप्रत्यये, भास् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण सलोपे, भास् इति जाते, सस्य रुत्वे विसर्गे 'भाः' इति रूपं सिद्धम्।

**धूः**:- धुर्व् (धुर्वी हिंसायाम्) धातोः क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, धुर्व् इति जाते ''राल्लोपः'' इति सूत्रेण वलोपे, धुर् इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, अनुबन्धलोपे, धुर् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'' इति सलोपे, धुर् इति जाते, ''र्वोरुपधाया दीर्घ इकः'' इत्युपधादीर्घे, धूर् इति जाते, रेफस्य विसर्गे 'धूः' इति रूपं सिद्धम्।

**विद्युत्**- 'वि' पूर्वकाद् द्युत्-दीप्तौ धातोः क्विप्-प्रत्यये, सर्वापहारलोपे, कित्त्वाल्लघूपधगुणाभावे, विद्युत् इति जाते, प्रातिपदिकात् सुप्रत्यये, अनुबन्धलोपे, विद्युत् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्'' सलोपे, 'विद्युत्' इति रूपं सिद्धम्।

**ऊर्क्**- ऊर्ज् बलप्राणनयोः धातोः ''भ्राजभास.'' इत्यादिना सूत्रेण क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, प्रातिपदिकसञ्ज्ञायां सुप्रत्ययेऽनुबन्धलोपे, ऊर्ज् स् इति जाते, ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सलोपे, ऊर्ज् इति जाते, संयोगान्तजलोपे प्राप्ते, ''रात्सस्य'' इति निषेधे, ''चोः कुः'' इति जस्य गत्वे (कुत्वे), ऊर्ग् इति जाते, ''वाऽवसाने'' इति सूत्रेण विकल्पेन गकारस्य ककारे चर्त्वे 'ऊर्क्' इति रूपं पक्षे विकल्पाभावे 'ऊर्ग्' इति रूपं सिद्धम्।

**पूः**:- पृधातोः ''भ्राजभास.'' इति क्विप्-प्रत्यये, पृ क्विप् इति जाते, क्विपः सर्वापहारलोपे, ''उदोष्ठ्यपूर्वस्य'' इति सूत्रेण ऋकारस्य उत्वे, रपरत्वे, पुर् इति जाते, प्रातिपदिकात् सुप्रत्यये, अनुबन्धलोपे, पुर् स् इति जाते, ''र्वोरुपधायाः दीर्घ इकः'' इति सूत्रेण दीर्घे पूर् स् इति जाते, सलोपे, रेफस्य विसर्गे 'पूः' इति रूपं सिद्धम्।

**जूः**:- जु इति (वेगितायां गतौ) सौत्र धातोः ''भ्राजभास.'' इत्यादिना सूत्रेण क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, जु इति जाते, दृशिग्रहणस्य अपकर्षाज्जवतेः दीर्घः ('अन्येभ्योऽपि दृश्यते' इति 'दृश्यते' पदस्य अपकर्षणात् मन्यते यत् कानिचित् कार्याणि लोके तु दृश्यन्ते परन्तु शास्त्रविहीतानि न भवन्ति)। अतः अत्रापि दीर्घे जू इति जाते, ''प्रातिपदिकत्वात् सुप्रत्पये, अनुबन्धलोपे, जू स् इति जाते, सस्य रुत्वे विसर्गे 'जूः' इति रूपं सिद्धम्।

**ग्रावस्तुत्**- ग्रावाणं स्तौति तच्छीलः इति विग्रहे ग्रावन् अम् पूर्वकात् स्तु धातोः ''भ्राजभास.'' इत्यादिना सूत्रेण क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, ग्रावन् अम् स्तु इति जाते, कृद्योगे कर्मणः षष्ठ्यां कृते, ग्रावन् अस् (ङस्) स्तु इति जाते, समासे, सुब्लुकि, अन्तर्वर्तिनीं विभक्तिमाश्रित्य ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे, गाव स्तु इति जाते, ''ह्रस्वस्य पिति कृति तुक्'' इति तुगागमे, अनुबन्धलोपे, ग्रावस्तुत् इति जाते, प्रातिपदिकात् सुप्रत्यये, अनुबन्धलोपे, ग्रावस्तुत् स् इति जाते, सलोपे 'ग्रावस्तुत्' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

845. **राल्लोपः ( 6-4-21 ) ।। विधिसूत्रम् ।।**
रेफाच्छ्वोर्लोपः क्वौ झलादौ क्ङिति। धूः। विद्युत्। ऊर्क्। पूः। दृशिग्रहणस्यापकर्षाज्जवतेर्दीर्घः। जूः। ग्रावस्तुत्।
**( वा. ) क्विब् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च।** वक्तीति वाक्।

846. **च्छ्वोः शूडनुनासिके च ( 6-4-19 ) ।। विधिसूत्रम् ।।**
सतुक्कस्य छस्य वस्य च क्रमात् ''श'', 'ऊठ्' इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति। पृच्छतीति प्राट्। आयतं स्तौतीति आयतस्तूः। कटं प्रवते कटप्रूः। जूरुक्तः। श्रयति हरिं श्रीः।

847. **दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ( 3-2-182 ) ।। विधिसूत्रम् ।।**
दाबादेः ष्ट्रन् स्यात् करणेऽर्थे। दात्यनेन दात्रम्। नेत्रम्।

---

845. **राल्लोप इति**– ''राल्लोपः'' इत्यस्मिन् सूत्रे ''छ्वोः शूडनुनासिके च'' इति सूत्रात् छ्वोः इत्यस्य ''अनुदात्तोपदेश'' इति सूत्राच्च झलि क्ङिति इत्यस्यानुवृत्तिः समायाति। अतः **रेफाच्छ्वोः लोपः स्यात् क्वौ झलादौ क्ङिति इति सूत्रार्थः।**

**क्विब्वचि इति– वच् प्रच्छ् आयतस्तु कटप्रु जु श्रि एभ्यः धातुभ्यः क्विप्प्रत्ययः अचश्च दीर्घः, असम्प्रसारणं च स्यादिति वार्तिकार्थः।**

846. **छ्वोरिति**– च्छ् च व् च च्छ्वौ, तयोः = च्छ्वोः। इतरेतरद्वन्द्वः। **सतुक्कस्य छस्य वस्य च स्थाने क्रमात् 'श', 'ऊठ्' इत्यादेशौ स्तः अनुनासिके क्वौ झलादौ च क्ङिति इति सूत्रार्थः।**

**रूपसिद्धिः**

**वाक्**– वच् धातोः ''क्विब्वचि.'' इत्यादिना क्विप् प्रत्यये, तस्य सर्वापहारलोपे, ''क्विब्वचि.'' इत्यादिना वार्तिकेन उपधादीर्घे सम्प्रसारणस्य च निषेधे वाच् इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये ''चोः कुः'' इति कुत्वे 'वाक्' इति रूपं सिद्धम्।

**प्राट्**– प्रच्छ् धातोः ''क्विब्वचि.'' इत्यादिना वार्तिकेन क्विप्-प्रत्यये, दीर्घेऽसम्प्रसारणे च कृते, प्राच्छ् क्विप् इति जाते, क्विपः सर्वापहारलोपे, प्राच्छ् इति जाते, ''छ्वोः शूडनुनासिके च'' इति च्छ् स्थाने श्-आदेशे, प्राश् इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, हल्ङ्यादिलोपे, ''व्रश्चभ्रस्ज.'' इत्यादिना शस्य षत्वे, प्राष् इति जाते, ''झलां जशोऽन्ते'' इति षस्य डत्वे (जश्त्वे), प्राड् इति जाते, ''वाऽवसाने'' इति विकल्पेन डस्य टत्वे (चर्त्वे) 'प्राट्' इति रूपं पक्षे विकल्पाभावे (चर्त्वाभावे) 'प्राड्' इति रूपं सिद्धम्।

**आयतस्तूः**– ''आयतं (सविस्तरं) स्तौति तच्छीलः'' इति विग्रहे, आयत अम् पूर्वकात् स्तुधातोः ''क्विब्वचि. इत्यादिना वार्तिकेन क्विप्-प्रत्यये, धातोः दीर्घे, क्विपः सर्वापहारलोपे, वार्तिकोक्तसामर्थ्यात् समासे, 'आयतस्तू' इति जाते, प्रातिपदिकात् स्वादिकार्ये 'आयतस्तूः' इति रूपं सिद्धम्।

**कटप्रूः**– कटं प्रवते (श्मशानं गच्छति तच्छीलः) इति विग्रहे, कट अम् पूर्वकात् प्रु धातोः ''क्विब्वचि.'' इत्यादिना वार्तिकेन क्विप्-प्रत्यये, दीर्घे, क्विपः सर्वापहारलोपे, वार्तिकसामर्थ्यात् समासे, कटप्रू इति जाते, कित्त्वादार्धधातुकगुणनिषेधे, प्रातिपदिकात् स्वादिकार्ये 'कटप्रूः' इति रूपं सिद्धम्।

**श्रीः**– श्रयति हरिं तच्छीलेति विग्रहे, श्रि (श्रिञ् सेवायाम्) धातोः ''क्विब्वचि.'' इत्यादिना क्विप्-प्रत्यये, दीर्घे, क्विपः सर्वापहारलोपे, श्री इति जाते, प्रातिपदिकात् स्वादिकार्ये, 'श्रीः' इति रूपं सिद्धम्।

847. **दाम्नीतिः**– दाप् च नीश्च शसश्च युश्च युजश्च स्तुश्च तुदश्च सिश्च सिचश्च मिहश्च पतश्च दशश्च नह् च एषां समाहारः, तस्मात् दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः। समाहारद्वन्द्वः। शस, युज, तुद, सिच, मिह, पत दश एषु अकारः उच्चारणार्थः। **दाप्, नी, शस्, यु, युज्, स्तु, तुद्, सि, सिच्, मिह्, पत्, दश्, नह् एभ्यः त्रयोदशधातुभ्यः करणेऽर्थे ष्ट्रन्-प्रत्ययः स्यादिति सूत्रार्थः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

848. **तितुत्रतथसिसुसरकसेषु च ( 7-2-9 ) ।।निषेधसूत्रम् ।।** एषां दशानां कृत्प्रत्ययानामिण्न। शस्त्रम्। योत्रम्। योक्त्रम्। स्तोत्रम्। तोत्त्रम्। सेत्रम्। मेढ्रम्। पत्रम्। दंष्टा। नद्ध्री।

849. **अर्ति-लू-धू-सू-खन-सह-चर इत्रः ( 3-2-184 ) ।। विधिसूत्रम् ।।**

अरित्रम्। लवित्रम्। धुवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्।

850. **पुवः सञ्ज्ञायाम् ( 3-2-185 ) ।। विधिसूत्रम् ।।** पवित्रम्।

---

848. **तितुत्र इति**– तिश्च तुश्च त्रश्च तश्च थश्च सिश्च सुश्च सरश्च कश्च सश्च एषाम् इतरेतरद्वन्द्वः, ततः सप्तमी। **ति तु त्र त थ सि सु सर क स एभ्यः दशकृतप्रत्ययेभ्यः इट् न स्यात्।**

849. **अर्तिलू इति**– अर्तिश्च लूश्च धूश्च सूश्च खनश्च सहश्च चर् च एषां समाहारद्वन्द्वः। ततः पञ्चमी। **ऋ लू धू सू खन सह चर् एभ्यः सप्तधातुभ्यः इत्रप्रत्ययः स्यात्।**

850. **पुवः सञ्ज्ञायामिति**– पुवः इति पदेन पूङ्पूञोरुभयोर्ग्रहण करणे इत्र चानुवर्तते। ततः **पूङ् धातोः पूञ् धातोश्च इत्र प्रत्ययःस्यात् करणेऽर्थे, इति सूत्रार्थः सम्पद्यते।**

**रूपसिद्धिः**

**दात्रम्**– दाति अनेन इत्यर्थे दाप् धातोः ''दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे'' इति सूत्रेण ष्ट्रन्-प्रत्ययेऽनुबन्धलोपे, दा ष्ट्र इति जाते, षकारस्य इत्सञ्ज्ञायां, तस्य लोपे, टस्य तत्वे जाते, दात्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'दात्रम्' इति रूपं सिद्धम्।

**नेत्रम्**– 'नीयते अनेन इति अर्थे' (णीञ् प्रापणे) धातोः ''दाम्नीशस.'' इत्यादिना सूत्रेण ष्ट्रन्-प्रत्ययेऽनुबन्धलोपे, नी त्र इति जाते, ''आर्धधातुकं शेषः'' इति सूत्रेण आर्धधातुकसञ्ज्ञायां, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण ईकारस्य एकारे गुणे, ने त्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'नेत्रम्' इति रूपं सिद्धम्।

**शस्त्रम्**– शसति (हिंसति) अनेनेति अर्थे, शसु हिंसायाम् इत्यस्माद् धातोः ''दाम्नीशस.'' इत्यादिना सूत्रेण ष्ट्रन् प्रत्ययेऽनुबन्धलोपे, शस् त्र इति जाते, आर्धधातुकसञ्ज्ञायाम् इडागमे प्राप्ते, '' 'तितुत्रतथसि.'' इत्यादिना सूत्रेण इण्निषेधे 'शस्त्र' इति जाते, कृदन्तत्वात् प्रातिपदिक-सञ्ज्ञायां स्वादिकार्ये 'शस्त्रम्' इति रूपं सिद्धम्।

**योत्रम्**– युवन्त्यनेन इति अर्थे यु मिश्रणे धातोः ''दाम्नीशस.'' इत्यादिना सूत्रेण ष्ट्रन्, प्रत्ययेऽनुबन्धलोपे, यु त्र इति जाते, इडागमे प्राप्ते, इण्निषेधे, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण गुणे, योत्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये, 'योत्रम्' इति रूपं सिद्धम्।

**योक्त्रम्**– युञ्जन्त्यनेनेति अर्थे युजिर्-योगे धातोः''दाम्नी. इत्यादिना सूत्रेण ष्ट्रन्-प्रत्ययेऽनुबन्धलोपे, युज् त्र इति जाते, इट् प्राप्ते, निषेधे, लघूपधगुणे, योज् त्र इति जाते, ''चोः कुः'' इति कुत्वेन जकारस्य गकारे (कुत्वे), योग् त्र इति जाते, ''खरि च'' इति गकारस्य ककारे चर्त्वे, योक्त्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'योक्त्रम्' इति रूपं सिद्धम्।

**स्तोत्रम्**– स्तुवन्ति अनेनेत्यर्थे स्तु (ष्टुञ् स्तुतौ) धातोः''दाम्नी. इत्यादिना सूत्रेण ष्ट्रन्-प्रत्ययेऽनुबन्धलोपे, स्तु त्र इति जाते, गुणे, इट् प्राप्ते, इण्निषेधे, स्त्रो त्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'स्तोत्रम्' इति रूपं सिद्धम्।

**तोत्त्रम्**– ''तुदन्त्यनेनेति'' अर्थे तुद्व्यथने धातोः''दाम्नी.'' इत्यादिना सूत्रेण ष्ट्रन् प्रत्ययेऽनुबन्धलोपे, तुद् त्र इति जाते, लघूपधगुणे, तोद् त्र इति जाते, ''खरि च'' इति चर्त्वे, तोत्त्र इति जाते, इट् प्राप्ते, ''एकाच उपदेशेऽनुदात्तात्'' इति निषेधे, प्रातिपदिक-सञ्ज्ञायां स्वादिकार्ये 'तोत्त्रम्' इति रूपं सिद्धम्।

**सेत्रम्**– सिन्वन्ति अनेनेति अर्थे सि (षिञ् बन्धने) धातोः ष्ट्रन्-प्रत्ययेऽनुबन्धलोपे, सि त्र इति जाते, गुणे, सेत्र इति जाते, इट्प्राप्ते, ''एकाच उपदेशे.'' इत्यादिना इण्निषेधे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'सेत्रम्' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सेक्त्रम्**– सिञ्चन्त्यनेनेति अर्थे सिच् (षिच क्षरणे) धातोः ष्ट्रन्प्रत्ययेऽनुबन्धलोपे, सिच् त्र इति जाते, लघूपधगुणे, कुत्वे, सेक् त्र इति जाते, इट् प्राप्ते, एकाचेति निषेधे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'सेक्त्रम्' इति रूपं सिद्धम्।

**मेढ्रम्**– मेहन्त्यनेनेत्यर्थे मिह् (मिह सेचने) धातोः ष्ट्रन्–प्रत्ययेऽनुबन्धलोपे, मिह् त्र इति जाते, लघूपधगुणे, मेह् त्र इति जाते, ''हो ढः'' इति हस्य ढत्वे, मेढ् त्र इति जाते, ''झषस्तथोर्धोऽधः'' इति तकारस्य धकारे, मेढ् ध्र इति जाते, ''ष्टुना ष्टुः'' इति सूत्रेण ष्टुत्वे, मेढ् ढ्र इति जाते, ''ढो ढे लोपः'' इति पूर्वढकारस्य लोपे मेढ्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'मेढ्रम्' इति रूपं सिद्धम्।

**पत्रम्**– पतन्ति अनेनेति अर्थे पत् (पत्लृ गतौ) धातोः ष्ट्रन् प्रत्ययेऽनुबन्धलोपे, पत् त्र इति जाते, इट् प्राप्ते, ''तितुत्र.'' इत्यादिन इण्निषेधे, पत् त्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'पत्रम्' इति रूपं सिद्धम्।

**दंष्ट्रा**– दशन्त्यनयेति अर्थे दंश् (दंश दशने) धातोः ष्ट्रन्–प्रत्ययेऽनुबन्धलोपे, दंश् त्र इति जाते, ''व्रश्च.'' इति शस्य षत्वे दंष् त्र इति जाते, ष्टुत्वे, दंष्ट्र इति जाते, स्त्रीत्वे टाप्–प्रत्यये, सवर्णदीर्घे 'दंष्ट्रा' इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'दंष्ट्रा' इति रूपं सिद्धम्।

**नद्ध्री**– नह्यतेऽनयेति अर्थे नह् (णह बन्धने) धातोः ष्ट्रन्–प्रत्ययेऽनुबन्धलोपे, नह् त्र इति जाते, ''नहो धः'' इति हस्य धत्वे, नध् त्र इति जाते, ''झषस्तथोर्धोऽधः'' इति तस्य धत्वे, नध् ध्र इति जाते, ''झलां जश् झशि'' इति पूर्वधकारस्य दकारे (जश्त्वे) कृते, नद्ध्र इति जाते, ''षिद्गौरादिभ्यश्च'' इति ङीष् प्रत्ययेऽनुबन्धलोपे, ''यचि भम्'' इति भसञ्ज्ञायां, ''यस्येति च'' इति अलोपे, 'नद् ध्री' इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये, नद्ध्री इति रूपं सिद्धम्।

**अरित्रम्**– (नौकाचालनदण्डः)– ऋच्छति इर्यति वाऽनेनेति अर्थे ऋ गतिप्रापणयोः धातोः ''अर्ति–लू–धू–सू–खन–सह–चर इत्रः'' इति इत्र प्रत्यये, ऋ इत्र इति जाते, ''सार्वधातुकार्धधातुकयोः'' इति गुणे, रपरत्वे, अरित्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'अरित्रम्' इति रूपं सिद्धम्।

**लवित्रम्**– लुनात्यनेनेति अर्थे इत्र प्रत्यये, ''सार्वधातुकार्धधातुकयोः'' इति गुणे, लो इत्र इति जाते, ''एचोऽयवायावः'' इति ओकारस्य अवादेशे, लवित्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'लवित्रम्' इति रूपं सिद्धम्।

**धुवित्रम्**– धुवति अनेन अग्निमिति अर्थे 'धू विधूनने' धातोः इत्र प्रत्यये, गुणे प्राप्ते, ''गाङ्कुटादिभ्योऽञ्णिन्ङित्'' इति निषेधे, ''अचिश्नुधातुभ्रुवां य्वोरियङुवङौ'' इति ऊकारस्य उवङादेशे, धुवित्र इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'धुवित्रम्' इति रूपं सिद्धम्।

**सवित्रम्**– सुवति (प्रेरयति) अनेनेति अर्थे सू (षू प्रेरणे) धातोः इत्र प्रत्यये, गुणे, अवादेशे, सवित्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये, 'सवित्रम्' इति रूपं सिद्धम्।

**खनित्रम्**– खनति अनेनेति अर्थे खन् (खनु अवदारणे) धातोः इत्र प्रत्यये, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'खनित्रम्' इति रूपं सिद्धम्।

**सहित्रम्**– सहतेऽनेनेति अर्थे सह् (षह् मर्षणे) धातोः इत्र प्रत्यये, सहित्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'सहित्रम्' इति रूपं सिद्धम्।

**चरित्रम्**– चरति अनेनेति अर्थे चर् (चर गतिभक्षणयोः) धातोः इत्रप्रत्यये, चरित्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'चरित्रम्' इति रूपं सिद्धम्।

**पवित्रम्**– पवते पुनाति वा अनेनेति अर्थे ''पू (पूङ् पवने, पूञ् पवने) धातोः'' ''पुवः सञ्ज्ञायाम्'' इति सूत्रेण इत्र प्रत्यये, पू इत्र इति जाते, गुणे, अवादेशे, पवित्र इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'पवित्रम्' इति रूपं सिद्धम्।

।।इति पूर्वकृदन्तम्।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासार्थ – प्रश्नाः

### वस्तुनिष्ठात्मकप्रश्नाः

1. 'कारकः' इत्यत्र प्रत्ययोऽस्ति –
   (क) तृच् (ख) अकच्
   (ग) अकः (घ) ण्वुल्
2. तृजन्तरूपं किम्?
   (क) कर्ता (ख) कर्त्री
   (ग) कर्तृ (घ) सर्वाणि
3. कुम्भकारः इत्यत्र कः प्रत्यय?
   (क) कार (ख) अच्
   (ग) अण् (घ) अञ्
4. चरेष्टः इति सूत्रेण प्रत्ययो भवति –
   (क) एष्ट (ख) टक्
   (ग) ट (घ) ष्ट
5. शुष्कः इत्यत्र प्रत्ययोऽस्ति –
   (क) कः (ख) ट
   (ग) क्त (घ) अच्
6. 'हितम्' इत्यत्र धातुरस्ति –
   (क) ओहाक् (ख) डुधाञ्
   (ग) हि (घ) क-खौ
7. 'पचन्तम्' इति प्रत्ययः अस्ति –
   (क) अत् (ख) शतृ
   (ग) तम् (घ) अन्तम्
8. 'मन्त्री' इत्यत्र प्रत्ययः अस्ति –
   (क) इन् (ख) इनि
   (ग) णिनि (घ) ई
9. गृहम् इत्यत्र धातुः कः?
   (क) गृह् (ख) ग्रह्
   (ग) क-खौ (घ) द्वावपि न
10. 'पवित्रम्' इत्यत्र प्रत्ययोऽस्ति –
   (क) त्र (ख) इत्र
   (ग) ष्ट्रन् (घ) त्रम्

### लघूत्तरात्मकप्रश्नाः

11. 'ण्वुल्तुचौ' इति सूत्रेण कस्मिन्नर्थे प्रत्ययौ भवतः?
12. युवोः कौ आदेशौ भवतः।
13. नन्द्यादेः कः प्रत्ययः?
14. बुधः इत्यत्र धातुप्रत्ययौ कौ?
15. 'महीध्रः' इत्यत्र केन कः प्रत्ययः?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

16. 'कुरुचरः' इति सूत्रेण टप्रत्ययः केन भवति?
17. सुप्यजातौ ताच्छील्ये कः प्रत्ययः?
18. करणे यजः इति सूत्रस्य सोदाहरणम् अर्थं लिखत।
19. सप्तम्यां जनेः कः प्रत्ययः?
20. 'प्रजा' इत्यत्र प्रकृति-प्रत्ययौ लेखनीयौ।
21. कौ निष्ठासञ्ज्ञौ?
22. 'निष्ठा' इति सूत्रस्य सोदाहरणम् अर्थं लिखत।
23. 'भिन्नः' इत्यत्र नत्व केन?
24. 'पक्वः' इत्यत्र प्रकृतिप्रत्ययौ कौ?
25. 'ग्लानः' इत्यत्र तकारस्य नत्वं केन?
26. 'जीनः' इत्यत्र प्रकृति-प्रत्ययौ लेखनीयौ।
27. 'उच्छूनः' इत्यत्र कःप्रत्ययः केन नियमेन भवति?
28. 'चक्राणः' इत्यत्र कः प्रत्ययः?
29. क्वसुप्रत्ययान्तं पदं लिखत।
30. 'लटः शतृशानचावप्रथमासमाधिकरणे' इति सूत्रस्य अर्थं लिखत।
31. 'विद्वान्' इत्यत्र प्रकृति-प्रत्ययौ लेख्यौ।
32. कौ सत्-सञ्ज्ञौ? लिखत।
33. षाकन्-प्रत्ययान्त-रूपाणि लिखत।
34. 'नेत्रम्' इत्यत्र प्रकृति-प्रत्ययौ लेखनीयौ।
35. 'चरित्रम्' इत्यत्र प्रत्ययोऽस्ति।

**निबन्धात्मकप्रश्नाः**

36. विंशति-तृजन्त-रूपाणां त्रिषु लिङ्गेषु सारणी लेखनीया।
37. क्तप्रत्ययान्तरूपाणां त्रिषु लिङ्गेषु सारणी लेखनीया। (50 शब्दानाम्)।
38. 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
39. 'अन्येभ्योऽपि दृश्यन्ते' इति सूत्रस्य सोदाहरणं व्याख्या कार्या।
40. 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति सूत्रस्य सोदाहरणम् अर्थं लिखत।
41. क्तवतुप्रत्ययान्तशब्दानां स्त्रीलिङ्गे पुल्लिङ्गे च सारणी लेखनीया (50 शब्दानाम्)
42. दशशत्रन्तपदानां त्रिषु लिङ्गेषु सारणी लेखनीया।
43. 'क्विब्वचि.' इत्यादिवार्तिकं पूरयित्वा सोदाहरणं व्याख्या कार्या।
44. केचन दशप्रयोगाः ससूत्रं साधनीयाः।
    चेतव्यः लूनः, क्षामः, प्रज्ञः, प्रियः, कर्ता, यशस्करी, सुशर्मा, राजयुध्वा, सरोजम्, विद्वान्, पचमानम्, भिक्षुः, पूः, श्रीः, दात्रम्, अरित्रम्, प्राप्तित्रम्।
45. पूर्वकृदन्तस्थ-प्रत्ययान्त-पदानां प्रकृतिप्रत्ययसहिता सारणी निर्मेया।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ उत्तरकृदन्तप्रकरणम्

852. **तुमुन्-ण्वुलौ क्रियायां क्रियार्थायाम् ( 3-2-185 ) ।। विधिसूत्रम् ।।**
क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्त:। मान्तत्वाद् अव्ययत्वम्। कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति।

853. **कालसमयवेलासु तुमुन् ( 3-3-167 ) ।। विधिसूत्रम् ।।**
कालार्थेषूपपदेषु तुमुन् स्यात्। काल: समयो वेला वा भोक्तुम्।

854. **भावे ( 3-3-18 ) ।। विधिसूत्रम् ।।**
सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात्। पाक:।

---

852. **तुमुण्वुलाविति**- तुमुन् च ण्वुल् च तुमुण्ण्वुलौ, ष्टुत्वम्, इतरेतरद्वन्द्व:। क्रिया अर्थ: यस्या: सा क्रियार्था, तस्यां= क्रियार्थायां, बहुव्रीहिसमास:। **क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातो: तुमुन्ण्वुलौ प्रत्ययौ स्त:।** तुमुन् इत्यत्र नकार: इत्सञ्ज्ञक:, उकार उच्चारणार्थ:। अत: तुमुन् इति प्रत्ययस्य तुम् इत्यवशिष्यते। ण्वुल् इत्यत्र णलावित्सञ्ज्ञकौ, वु इति अवशिष्यते। तत: वु इत्यस्य स्थाने 'युवोरनाकौ' इति सूत्रेण अकादेशो भवति। तुमुन्नन्तशब्दा: 'कृन्मेजन्त:' इति सूत्रेण अव्ययसञ्ज्ञका: भवन्ति। अत: 'अव्ययादाप्सुप:' इति सूत्रेण सुब्लुग् भवति।

**रूपसिद्धि:**

**कृष्णं द्रष्टुं याति**- इत्यत्र 'दृशिर् प्रेक्षणे' धातो: ''तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्'' इति सूत्रेण भविष्यत्यर्थे तुमुन्-प्रत्यये, अनुबन्धलोपे, दृश् तुम् इति जाते, ''आर्धधातुकस्येड्वलादे:'' इति इडागमे प्राप्ते, ''एकाच उपदेशेऽनुदात्तात्'' इति निषेधे, दृश् तुम् इति जाते, ''सृजिदृशोर्झल्यमकिति'' इति सूत्रेण अमागमे, अनुबन्धलोपे, दृ अ श् तुम् इति जाते, ''इको यणचि'' इति ऋकारस्य रेफे (यणि) कृते द्रश् तुम् इति जाते, ''व्रश्चभ्रस्ज.'' इत्यादिना शस्य षत्वे, द्रष् तुम् इति जाते, ''ष्टुना ष्टु:'' इति सूत्रेण ष्टुत्वे टकारे कृते 'द्रष्टुम्' इति जाते, भाववाचकत्वात् (अत्ययकृतोभावे), औत्सर्गिकप्रथमैकवचने सुप्रत्यये ''कृन्मेजन्त:'' इति अव्ययसञ्ज्ञायाम्, ''अव्ययादाप्सुप:'' इति सूत्रेण सुलोपे 'द्रष्टुम्' इति रूपं सिद्धम्।

**कृष्णं दर्शको याति**- 'दृशिर्-प्रेक्षणे' धातो: ''तुमुण्ण्वुलौ.'' इत्यादिना ण्वुल्-प्रत्यये, अनुबन्धलोपे, दृश् वु इति जाते, ''युवोरनाकौ'' इति सूत्रेण अकादेशे, दृश् अक इति जाते, लघूपधगुणे, रपरत्वे, दर् श् अक इति जाते (दर्शक), प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'दर्शक:' इति रूपं सिद्धम्।

853. कालश्च समयश्च वेला च कालसमयवेला:, तासु कालसमयवेलासु। इतरेतरद्वन्द्व:। अत्र पर्यायशब्दानामुल्लेख: कालवाचकशब्दानामुपलक्षणार्थ:, तेन 'अवसर:' 'अनेहा' इत्यादिशब्दा: अपि ग्राह्या:। कालसमयवेलासु इति पदं सप्तम्यन्तम्। **काल, समय, वेला इत्येतेषु पदेषूपपदेषु धातोर्तुमुन्प्रत्ययो भवति इति सूत्रार्थ:।**

**भोक्तुम्**- 'भुज पालनाभ्यवहारयो:' धातो: ''कालसमयवेलासु'' इति सूत्रेण तुमुन्-प्रत्यये, अनुबन्धलोपे, भुज् तुम् इति जाते, इट् प्राप्ते, ''एकाचेति'' निषेधे, लघूपधगुणे, भोज् तुम् इति जाते, ''चो: कु:'' इति कुत्वे, भोग् तुम् इति जाते, ''खरि च इति सूत्रेण चर्त्वे,'' 'भोक्तुम्' इति जाते, भाववाचकत्वात् औत्सर्गिक-प्रथमैकवचने सुप्रत्यये, ''कृन्मेजन्त:'' इति अव्यय-सञ्ज्ञायाम्, ''अव्ययादाप्सुप:'' इति सुब्लुकि 'भोक्तुम्' इति रूपं सिद्धम्।

854. **भावे इति**- भावो नाम क्रिया। क्रियासामान्यमेव भाव इत्युच्यते। तिङ्वाच्यक्रिया एव साध्यक्रिया कथ्यते। कृत्प्रत्ययस्य वाच्यार्थ:। क्रियासिद्धावस्था प्राप्ता एवं क्रिया निगद्यते। अत: सूत्रार्थो भवति-**सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् प्रत्यय: स्यादिति।** धात्वर्थ: द्विविधि: भवति- (1) साध्यावस्थापन्न:। (2) सिद्धावस्थापन्न:। भवति, पठति पचति आदि तिङन्तेषु धात्वर्थ: (क्रिया) साध्यावस्थापन्नो भवति। पाक:, त्याग:, पठनम्, गमनम्, हसितम् इत्यादिकृदन्तेषु धात्वर्थ: सिद्धावस्थापन्नो भवति।

**रूपसिद्धि:**

**पाक:**- पच् (डुपचष् पाके) धातो: ''भावे'' इति सूत्रेण घञ्-प्रत्यये, अनुबन्धलोपे, पच् अ इति जाते, ''अत उपधाया:'' इत्युपधावृद्धौ, पाच् अ इति जाते, ''चजो: कु घिण्यतो:'' इति सूत्रेण कुत्वे, पाक् अ इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'पाक:' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

855. **अकर्तरि च कारके सञ्ज्ञायाम् ( 3-3-19 ) ।। विधिसूत्रम् ।।**

856. **घञि च भावकरणयोः ( 6-4-27 ) ।। विधिसूत्रम् ।।**
रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम्? रज्यत्यस्मिन्निति रङ्गः।

857. **निवासचितिशरीरोपसमाधानेष्वादेश्च कः ( 3-3-41 ) ।। विधिसूत्रम् ।।**
एषु चिनोतर्घञ् आदेश्च ककारः। उपसमाधानं राशीकरणम्। निकायः। कायः। गोमयनिकायः।

858. **एरच् ( 3-3-56 ) ।। विधिसूत्रम् ।।**
इवर्णान्तादच्। चयः। जयः।

---

855. **अकर्तरि चेति**- अकर्तरि, कारके, सञ्ज्ञायाम् एषु सप्तमीविभक्तिः। अतः **कर्तृभिन्ने कारकेऽर्थे धातोर्घञ् प्रत्ययः स्यात् सञ्ज्ञायामिति सूत्रार्थः।**

856. **घञि चेति**- घञि इति पदं सप्तम्यन्तम्। भावकरणयोरित्यत्र सप्तम्याः द्विवचनम्। **अतः सूत्रार्थः अस्ति- रञ्जधातोर्नकारस्य लोपः स्याद् घञ्प्रत्यये परे भावकरणयोः।** रज्यत्यस्मिन्निति रङ्गः इत्यत्र प्रकृत सूत्रस्य प्रवृत्तिः मा भूदेतदर्थं सूत्रे भावकरणयोः इति पदमावश्यकम्।
**रागः** - इत्यत्र रञ्ज्धातोः ''अकर्तरि च कर्तरि सञ्ज्ञायाम्'' इति सूत्रेण घञ्-प्रत्यये, अनुबन्धलोपे, रञ्ज् अ इति जाते, ''घञि च भावकरणयोः'' इति सूत्रेण रञ्जेर्नकारस्य लोपे, रज् अ इति जाते, ''अत उपधायाः'' इति सूत्रेण उपधावृद्धौ, ''चजोः कुः घिण्यतोः'' इति सूत्रेण कुत्वे राग इति जाते, प्रातिपदिकात् स्वादिकार्ये 'रागः' इति रूपं सिद्धम्।

857. **निवासेति**- निवासश्च चितिश्च शरीरं च उपसमाधानञ्च तेषु निवासचितिशरीरोपसमाधानेषु। इतरेतरद्वन्द्वः। **निवास, चिति, शरीर, उपसमाधान, एष्वर्थेषु चिञ्धातोर्घञ् प्रत्ययः स्याद् धातोरादेश्च ककारादेशः इति सूत्रार्थः।** प्रकृत सूत्रे प्रयुक्तस्य उपसमाधानपदस्यार्थो वर्तते राशीकरणम्।

858. **एरच् इति**- एः अच् इति पदच्छेदः। इ इत्यस्य पञ्चम्येकवचने एः इति रूपं जायते। अतः सूत्रस्यार्थः अस्ति- **इवर्णान्ताद्धातोः अच् प्रत्ययः स्यादिति।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

859. **ऋदोरप् ( 3-3-57 )** ।। **विधिसूत्रम्** ।। ऋवर्णान्तादुवर्णान्तादप्। करः। गरः। यवः। लवः। स्तवः। पवः। वा. **घञर्थे क विधानम्**। प्रस्थः। विघ्नः।

---

859. **ऋदोरिति**- ऋच्च उश्च ऋदुः, तस्माद् ऋदोः। समाहारद्वन्द्वे अपि सौत्रं पुंस्त्वम्। ऋद् इति दकार उच्चारणार्थः। **ऋवर्णान्ताद् उवर्णान्तात् च धातोः अप्-प्रत्ययः भवतीति सूत्रार्थः।** ऋवर्णान्तधातोरुदाहरणानि यथा करः, गरः, इत्यादीनि उवर्णान्तधातोरुदाहरणानि सन्ति-यवः, लवः, स्तवः, पवः इत्यादीनि। **घञर्थे क प्रत्ययस्य विधानं भवतीति वार्तिकार्थः।**

**रूपसिद्धिः**

**निकायः ( गृहम् )**- (निचीयन्ते संगृह्यन्ते धनधान्यादि अस्मिन्नर्थे) निपूर्वकात् 'चिञ् चयने' धातोः ''निवासचिति शरीरोपसमाधानेष्वादेश्च कः'' इति सूत्रेण घञ्-प्रत्यये चकारस्य कादेशे च अनुबन्धलोपे, नि कि अ इति जाते, ''अचोञ्णिति'' इति धातोः इकारस्य ऐकारे वृद्धौ, नि कै अ इति जाते, ''एचोऽयवायावः'' इति सूत्रेण ऐकारस्य आयादेशे नि क् आय् अ इति जाते, प्रातिपदिकात् स्वादिकार्ये 'निकायः' इति रूपं सिद्धम्।

**कायः ( शरीरम् )** - चीयतेऽन्नादिभक्षितेनेति कायः इत्यर्थे चिञ् धातोः घञ्-प्रत्यये, आदेः चकारस्य कादेशे, अनुबन्धलोपे, कि अ इति जाते, वृद्धौ, आयादेशे, काय इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'कायः' इति रूपं सिद्धम्।

**गोमयनिकायः**- गोमयानां निकायः इति षष्ठी-तत्पुरुषः। गोमय आम् नि पूर्वक चिञ्धातोः ''निवासचिति.'' इत्यादिना सूत्रेण घञ्-प्रत्यये, आदेः चकारस्य कादेशे, घञः अनुबन्धलोपे, गोमय आम् नि कि अ इति जाते, वृद्धौ, आयादेशे, गोमय आम् निकाय इति जाते, ''षष्ठी'' इति समासे, प्रातिपदिकात् सुपो लुकि, गोमय निकाय इति जाते, पुनः प्रातिपदिक-सञ्ज्ञायां स्वादि-कार्ये 'गोमयनिकायः' इति रूपं सिद्धम्।

**चयः**- चयनं चयः। 'चिञ् चयने' धातोः ''एरच्'' इति सूत्रेण अच्-प्रत्यये, अनुबन्धलोपे, चि अ इति जाते, ''आर्धधातुकं शेषः इति सूत्रेण आर्धधातुक-सञ्ज्ञायां, ''सार्वधातुकार्धधातुकयोः'' इति सूत्रेण गुणे, चे अ इति जाते, ''एचोऽयवायावः'' इति सूत्रेण एकारस्य अयादेशे, चय इति जाते, ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसञ्ज्ञायां, ''स्वौजस.'' इत्यादिना सूत्रेण सुप्रत्यये, अनुबन्धलोपे, चय स् इति जाते, सस्य रुत्वे विसर्गे च कृते 'चयः' इति रूपं सिद्धम्।

**जयः**- जयनं जयः। 'जि जये' धातोः ''एरच्'' इति अच् प्रत्यये, अनुबन्धलोपे, जि अ इति जाते, आर्धधातुकसञ्ज्ञायां, गुणे, जे अ इति जाते, अयादेशे, जय इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'जयः' इति रूपं सिद्धम्।

**करः**- करणं करः। 'कृ विक्षेपे' धातोः ''ऋदोरप्'' इति सूत्रेण अप्-प्रत्यये, अनुबन्धलोपे, कृ अ इति जाते, आर्धधातुकसञ्ज्ञायां, गुणे, रपरत्वे, कर इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'करः' इति रूपं सिद्धम्।

**गरः**- गरणं गरः। गृ निगरणे 'धातोः' ''ऋदोरप्'' इति अप्प्रत्ययेऽनुबन्धलोपे, गृ अ इति जाते, आर्धधातुकसञ्ज्ञायां, गुणे, रपरत्वे, गर इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'गरः' इति रूपं सिद्धम्।

**यवः**- यवनं यवः। 'यु मिश्रणामिश्रणयोः' धातोः अप्प्रत्ययेऽनुबन्धलोपे, यु अ इति जाते, आर्धधातुकसञ्ज्ञायां, गुणे, यो अ इति जाते, अवादेशे, 'यव' इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'यवः' इति रूपं सिद्धम्।

**लवः**- लवनं लवः। 'लूञ् छेदने' धातोः अप्-प्रत्यये, अनुबन्धलोपे लू अ इति जाते, आर्धधातुकसञ्ज्ञायां, गुणे, अवादेशो, ल् अव् अ इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'लवः' इति रूपं सिद्धम्।

**स्तवः**- स्तवनं स्तवः। 'ष्टुञ् स्तुतौ' धातोः ''धात्वादेः षः सः'' इति षस्य सत्वे, निमित्तापाये नैमित्तिकस्याप्यपायः इति टस्य तत्वे, स्तु इति जाते, अप् प्रत्यये, अनुबन्धलोपे, स्तु अ इति जाते, आर्धधातुकसञ्ज्ञायां, गुणे, अवादेशे स्त् अव् अ इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'स्तवः' इति रूपं सिद्धम्।

**पवः**- पवनं पवः। 'पूञ् पवने' धातोः अप् प्रत्यये, अनुबन्धलोपे, पू अ इति जाते, आर्धधातुक-सञ्ज्ञायां, गुणे, अवादेशे, पव इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'पवः' इति रूपं सिद्धम्।

**प्रस्थः**- प्रतिष्ठन्तेऽस्मिन् धान्यानि इति प्रस्थः। प्रपूर्वकात् स्था (ष्ठा गतिनिवृत्तौ) धातोः ''घञर्थे क विधानम्'' इति वार्तिकेन कप्रत्यये, अनुबन्धलोपे, प्र स्था अ इति जाते, ''आतो लोपः इटि च'' इति सूत्रेण आलोपे, प्रस्थ इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'प्रस्थः' इति रूपं सिद्धम्।

**विघ्नः**- विहन्यतेऽस्मिन्निति विघ्नः। विपूर्वकात् ''हनहिंसागत्योः'' धातोः कप्रत्ययेऽनुबन्धलोपे, विहन् अ इति जाते, ''गमहनजनखनघसां लोपः क्ङित्यनङि'' इति सूत्रेण उपधालोपे, वि ह्न् अ इति जाते, ''होहन्तेर्ञ्णिन्नेषु'' इति सूत्रेण हस्य कुत्वे घकारे, वि घ् न् अ इति जाते, विघ्न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'विघ्नः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

860. **ड्वितः क्त्रिः ( 3-3-88 ) ।।विधिसूत्रम् ।।**

861. **क्त्रेर्मम्नित्यम् ( 4-4-20 ) ।।विधिसूत्रम् ।।**
क्त्रिप्रत्ययान्तान्मप् स्यात्, निवृत्तेऽर्थे। पाकेन निर्वृत्तं पक्त्रिमम्। डुवप्-उप्त्रिमम्।

862. **ट्वितोऽथुच् ( 3-3-89 ) ।।विधिसूत्रम् ।।**
ट्वितोऽथुच् स्याद्भावे। टुवेपृ कम्पने-वेपथुः।

863. **यजयाचयतविच्छप्रच्छरक्षो नङ् ( 3-3-90 ) ।।विधिसूत्रम् ।।**
यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। रक्ष्णः।

864. **स्वपो नन् ( 3-3-91 ) ।।विधिसूत्रम् ।।**
स्वप्नः।

---

860. **ड्वितः इति**- ड्वितः इति पदं पञ्चम्यन्तम्। क्त्रिः इति पदं प्रथमान्तम्। **अतः ड्वित् इति धातोः क्त्रिप्रत्ययः स्यादिति सूत्रार्थः।**

861. **क्त्रेर्ममिति- क्त्रिप्रत्ययान्ताद् नित्यम्मप् स्याद् निवृत्तेऽर्थे।**
**पक्त्रिमम्**- पाकेन निर्वृत्तम् इति विग्रहे पच धातोः ''ड्वितः क्त्रिः'' इति क्त्रि-प्रत्ययेऽनुबन्धलोपे, पच् त्रि इति जाते, ''चोः कुः'' इति कुत्वे पक्त्रि इति जाते, ''क्त्रेर्मम्नित्यम्'' इति सूत्रेण मप्-प्रत्ययेऽनुबन्धलोपे, पक्त्रिम इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'पक्त्रिमम्' इति रूपं सिद्धम्।
**उप्त्रिमम्**- वपनेन निर्वृत्तम् उप्त्रिमम्। 'डुवप बीजसन्ताने' (वप्) धातोः ''ड्वितः क्त्रिः'' इति सूत्रेण क्त्रि प्रत्ययेऽनुबन्धलोपे, वप् त्रि इति जाते, ''वचिस्वपि-यजादीनां किति'' इति सूत्रेण सम्प्रसारणे, उ अ प् त्रि इति जाते, ''सम्प्रसारणाच्च'' इति सूत्रेण पूर्वरूपे, उप्त्रि इति जाते, मप् प्रत्यये, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'उप्त्रिमम्' इति रूपं सिद्धम्।

862. **ट्वितः इति**- ट्वितः इति पदं पञ्चम्यन्तम्। अथुच् इति पदं प्रथमान्तम्। एवञ्च ट्वितः इति पदम् उद्देश्यम्, अथुच् इति पदञ्च विधेयम्। **अतः सूत्रस्थार्थो भवति-ट्वित् धातोः अथुच्-प्रत्ययः स्याद् भावेऽर्थे।**

863. **यजयाचेति- यज् याच् यत् विच्छ् प्रच्छ् रक्ष् एभ्यः धातुभ्यः नङ्प्रत्ययः भवतीति सूत्रार्थः।**

864. **स्वप इति**- स्वपः इति पदं पञ्चम्यन्तम्। नन् इति पदं प्रथमान्तं विधेयञ्च। ततः सूत्रस्यार्थः भवति-**स्वप् धातोः नन् प्रत्ययः स्यादिति।**

**रूपसिद्धिः**

**वेपथुः**- वेपनं वेपथुः। टुवेपृ कम्पने धातोः ''ट्वितोऽथुच्'' इति सूत्रेण अथुच्-प्रत्ययेऽनुबन्धलोपे, वेप् अथु इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'वेपथुः' इति रूपं सिद्धम्।
**यज्ञः**- यजनं यज्ञः। 'यज देवपूजासंगतिकरणदानेषु' धातोः ''यजयाचयतविच्छप्रच्छरक्षो नङ्'' इति सूत्रेण नङ् प्रत्ययेऽनुबन्धलोपे, यज् न इति जाते, ''स्तोः श्चुना श्चुः'' इति सूत्रेण नकारस्य ञकारे श्चुत्वे, जञोर्ज्ञ कृते यज्ञ इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'यज्ञः' इति रूपं सिद्धम्।
**याच्ञा**- याचनं याच्ञा। 'टुयाचृ याच्ञायां' धातोः नङ् प्रत्यये, श्चुत्वे, याच् इति जाते, स्त्रीत्वविवक्षायां टापि, सवर्णदीर्घे, याच्ञा इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'याच्ञा' इति रूपं सिद्धम्।
**यत्नः**- यतनं यत्नः। 'यती प्रयत्ने' धातोः नङ् प्रत्यये, अनुबन्धलोपे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'यत्नः' इति रूपं सिद्धम्।
**विश्नः**- विच्छनं विश्नः। 'विच्छ गतौ' धातोः नङ् प्रत्यये, अनुबन्धलोपे, विच्छ् न इति जाते, ''च्छ्वोः शूडनुनासिके च'' इति च्छ् स्थाने श् आदेशे, विश्न इति जाते, लघूपधगुणे प्राप्ते, क्ङिति चेति निषेधे, श्चुत्वे प्राप्ते, शादिति निषेधे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'विश्नः' इति रूपं सिद्धम्।
**प्रश्नः**- प्रच्छनं प्रश्नः। 'प्रच्छ ज्ञीप्सायाम्' इत्यस्माद् धातोः नङ् प्रत्यये, 'विश्नः' इतिवत् कार्ये प्रश्नः इति रूपं सिद्धम्।
**रक्ष्णः**- रक्षणं रक्ष्णः। 'रक्ष पालने' धातोः नङ् प्रत्यये, अनुबन्धलोपे, रक्ष् न इति जाते, ''रषाभ्यां नो णः समानपदे'' इति सूत्रेण नस्य णत्वे, 'रक्ष्ण' इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये रक्ष्णः इति रूपं सिद्धम्।
**स्वप्नः**- स्वपनं स्वप्नः। 'ञिष्वप् शये' धातोः ''स्वपो नन्'' इति सूत्रेण नन् प्रत्ययेऽनुबन्धलोपे, स्वप् न इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'स्वप्नः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

865. **उपसर्गे घोः किः ( 3-3-92 ) ।।विधिसूत्रम् ।।**
प्रधिः। उपधिः।

866. **स्त्रियां क्तिन् ( 3-3-94 ) ।।विधिसूत्रम् ।।**
स्त्रीलिङ्गे भावे क्तिन् स्यात्। घञोऽपवादः। कृतिः। स्तुतिः।
**वा. ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः** (वार्तिकः) तेन नत्वम्। कीर्णिः। गीर्णिः। लूनिः। धूनिः।
**वा. सम्पदादिभ्यः क्विप्** -
सम्पत्। विपत्। आपत्।
**वा. क्तिन्नपीष्यते** – सम्पत्तिः। विपत्तिः। आपत्तिः।

---

865. **उपसर्गे इति**– उपसर्ग–उपपदपूर्वकाद् घुसञ्ज्ञकाद् दा–धा–धातोः किप्रत्ययः स्यादिति सूत्रार्थः।
866. **स्त्रियामिति**– स्त्रियामिति पदं सप्तम्यन्तम्। क्तिन् इति पदं विधेयम्। सूत्रस्यार्थोः वर्तते–**धातोः क्तिन् प्रत्ययो भवति भावे स्त्रीलिङ्गे।** अयं क्तिन्प्रन्ययः घञ्प्रत्ययस्यापवादः।
वा. **ऋल्वादिभ्य इति**– ऋदन्तधातुभ्यः ल्वादिभ्यश्च क्तिन् प्रत्यये कृते सति निष्ठावत् कार्याणि भवन्ति।
वा. **सम्पदादिभ्य इति**– सम्पदादिभ्यः भावे, सञ्ज्ञाविषयककर्तृभिन्नकारके क्विप् प्रत्ययो भवतीति वार्तिकार्थः।
वा. **क्तिन्निति**– सम्पदादिभ्यः शब्देभ्यः क्तिन्नपि भवतीति वातिकार्थः।
**प्रधिः**– प्रपूर्वकाद् 'डुधाञ् धारणपोषणयोः' धातोः ''उपसर्गे घोः कि'' इति सूत्रेण कि–प्रत्यये, अनुबन्धलोपे, प्रधा इ इति जाते, ''आतोलोप.'' इत्यादिना सूत्रेण आलोपे, प्रध् इ इति जाते, प्र इत्यस्य धि इत्यनेन समासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'प्रधिः' इति रूपेण सिद्धम्।
**उपधिः**– उपधीयते (आरोप्यते) अनेनेत्युपधिः। उप पूर्वकाद् डुधाञ् धातोः कि प्रत्यये, अनुबन्धलोपे, उप धा इ इति जाते, आलोपे, उपधि इति जाते, उप इत्यस्य धि इत्यनेन समासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'उपधिः' इति रूपं सिद्धम्।
**कृतिः**– करणं कृतिः। 'डुकृञ् करणे' धातोः ''स्त्रियां क्तिन्'' इति सूत्रेण क्तिन्–प्रत्यये, अनुबन्धलोपे, कृ ति इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये कृतिः इति रूपं सिद्धम्।
**स्तुतिः**– स्तवनं स्तुतिः। 'ष्टुञ् स्तुतौ' धातोः क्तिन्–प्रत्यये, अनुबन्धलोपे, स्तु ति इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'स्तुतिः' इति रूपं सिद्धम्।
**कीर्णिः**– कृधातोः क्तिन्–प्रत्ययेऽनुबन्धलोपे, कृ ति इति जाते, कित्त्वाद् गुण–निषेधे, ''ऋत इद्धातोः'' इति सूत्रेण ऋकारस्य इत्वे, रपरत्वे, किर् ति इति जाते, ''हलि च'' इति दीर्घे, कीर् ति इति जाते, ''ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः'' इति निष्ठावद्भावे, ''रदाभ्यां निष्ठातो न पूर्वस्य च दः'' इति सूत्रेण तस्य नत्वे, कीर् नि इति जाते, ''रषाभ्यां नो णः समानपदे'' इति नस्य णत्वे, कीर्णि इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'कीर्णिः' इति रूपं सिद्धम्।
**गीर्णिः**– 'गॄ निगरणे' धातोः क्तिन् प्रत्यये, अनुबन्धलोपे, गॄ ति इति जाते, कित्त्वाद् गुणनिषेधे, ऋतः इत्वे, रपरत्वे, गिर् ति इति जाते, ''हलि चेति'' दीर्घे, निष्ठावद्भावे, ''रदाभ्यां निष्ठातो न पूर्वस्य च दः'' इति नत्वे, णत्वे, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'गीर्णिः' इति रूपं सिद्धम्।
**लूनिः**– लू (लूञ् छेदने) धातोः क्तिन् प्रत्यये, अनुबन्धलोपे लू ति इति जाते, निष्ठावद्भावे, ''ल्वादिभ्यः'' इति नत्वे, लू नि इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये लूनिः इति रूपं सिद्धम्।
**धूनिः**– धूञ् कम्पने धातोः क्तिन्–प्रत्ययेऽनुबन्धलोपे, धू ति इति जाते, निष्ठावद्भावे, ''ल्वादिभ्यः'' इति नत्वे, धू नि इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'धूनिः' इति रूपं सिद्धम्।
**सम्पत्**– सम् पूर्वकात् पदगतौ धातोः ''सम्पदादिभ्यः क्विप्'' इति क्विप् प्रत्यये, क्विपः सर्वापहारलोपे, सम्पद् इति जाते, प्रातिपदिकात् स्वादिकार्ये सम्पद् इति जाते, ''वाऽवसाने'' इति विकल्पेन दकारस्य तकारे, 'सम्पत्' इति रूपं पक्षे विकल्पाभावे 'सम्पद्' इति रूपद्वयं सिद्धम्।
**विपत्**– वि पूर्वकात् पदगतौ धातोः क्विप्–प्रत्यये, सर्वापहारलोपे, प्रातिपदिकात् स्वादिकार्ये, वैकल्पिकचर्त्वे 'विपत्' इति रूपं पक्षे विकल्पाभावे 'विपद्' इति रूपद्वयं सिद्धम्।
**आपत्**– आङ् पूर्वकात् पदगतौ धातोः क्विप्–प्रत्यये, क्विपः सर्वापहारलोपे, प्रातिपदिकात् स्वादिकार्ये, वैकल्पिकचर्त्वे, 'आपत्' इति रूपं पक्षे विकल्पाभावे 'आपद्' इति रूपद्वयं सिद्धम्।
**सम्पत्तिः**– सम् पूर्वकात् 'पद्गतौ' धातोः ''क्तिन्नपीष्यते'' इति वार्तिकेन क्तिन्–प्रत्ययेऽनुबन्धलोपे, सम्पद् ति इति जाते, ''खरि च'' इति चर्त्वे, सम्पत्ति इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'सम्पत्तिः' इति रूपं सिद्धम्।
**विपत्तिः**– वि पूर्वकात् पदगतौ क्तिन् प्रत्ययेऽनुबन्धलोपे, वि पद् ति इति जाते, खरि चेति चर्त्वे, विपत् ति इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'विपत्तिः' इति रूपं सिद्धम्।
**आपत्तिः**– आङ् पूर्वकात् 'पदगतौ' धातोः क्तिन् प्रत्यये, अनुबन्धलोपे आ पद् ति इति जाते, चर्त्वे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'आपत्तिः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

867. **ऊतियूतिजूतिसातिहेतिकीर्तयश्च ( 3-3-97 ) ।। विधिसूत्रम् ।।**
एते निपात्यन्ते।

868. **ज्वरत्वरस्रिव्यविमवामुपधायाश्च ( 6-4-20 ) ।। विधिसूत्रम् ।।**
एषामुपधावकारयोरूठ् स्यादनुनासिके क्वौ झलादौ क्ङिति च। अतः क्विप्। जूः। तूः। स्रूः। ऊः। मूः।

869. **इच्छा ( 3-3-101 ) ।। विधिसूत्रम् ।।**
इषेर्निपातोऽयम्।

870. **अ प्रत्ययात् ( 3-3-102 ) ।। विधिसूत्रम् ।।**
प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या।

---

867. **ऊतियूतीति**- ऊति, यूति, जूति, साति, हेति, कीर्ति, इति सूत्रोक्ताः एते शब्दाः निपातनाद् निष्पन्नाः भवन्ति। ऊतिश्च यूतिश्च जूतिश्च सातिश्च हेतिश्च कीर्तिश्च-ऊतियूतिजूतिसातिहेतिकीर्तयः, इतरेतरद्वन्द्वः। निपातनाच्च अन्यादृशप्रयोगे प्राप्ते अन्यादृशकरणम्।

868. **ज्वर-त्वरिति**- ज्वरश्च त्वरश्च स्रिविश्च अविश्च मव् च - ज्वरत्वर-स्रिव्यविमवः, तेषाम् = ज्वर-त्वर-स्रिव्यविमवाम्, इतेरतरद्वन्द्वः। ज्वरादिषु अन्त्य-अकारः इकारश्च उच्चारणार्थः। **ज्वर्, त्वर्, स्रिव्, अव्, मव् इत्येषां धातूनामुपधावकारयोरूठ् स्यादनुनासिके क्वौ झलादौ क्ङिति इति सूत्रार्थः।**

869. **इच्छेति**- इष् धातोः स्त्रीत्वविशिष्टे भावेऽर्थे शप्रत्ययः यक् इत्यस्य च अभावः निपातनाद् भवति।

870. **अ प्रत्ययादिति**- प्रत्ययाद् इति पदं पञ्चम्यन्तम्। 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' इति परिभाषाबलात् प्रत्ययपदेन प्रत्ययान्तस्य ग्रहणं भवति। अतः सूत्रस्यार्थोः **भवति-प्रत्ययान्तेभ्यो धातुभ्यः अकारप्रत्ययः स्यात् स्त्रीलिङ्गे।**

**रूपसिद्धिः**

**जूः**- ज्वरणं जूः (रुग्णता)। ज्वर् धातोः ''सम्पदादिभ्यः क्विप्'' इति सूत्रेण क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, ज्वर् इति जाते, ''ज्वरत्वर.'' इत्यादिना सूत्रेण उपधा-अकारवकारयोः स्थाने 'ऊठ्' आदेशेऽनुबन्धलोपे, ज् ऊ र् = जूर् इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, अनुबन्धलोपे, जूर् स् इति जाते, सुलोपे, ''खरवसानयोर्विसर्जनीयः'' इति रेफस्य विसर्गे 'जूः' इति रूपं सिद्धम्।

**तूः**- त्वरणं तू (शीघ्रता, वेगः)। त्वर् धातोः क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, त्वर् इति जाते, अकारवकारयोः ऊठ् आदेशे, अनुबन्धलोपे तूर् इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, अनुबन्धलोपे, सुलोपे, रेफस्य विसर्गे 'तूः' इति रूपं सिद्धम्।

**स्रूः**- स्रेवणं स्रू (गमनम्)। स्रिव् धातोः क्विप् प्रत्यये, क्विपः सर्वापहारलोपे, उपधा-इकारवकारयोः ऊठ् आदेशे, अनुबन्धलोपे, स् र् उ (स्रू) इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'स्रूः' इति रूपं सिद्धम्।

**ऊः**- अवनम् ऊः (रक्षणम्)। अव् धातोः क्विप्-प्रत्यये, क्विपः सर्वापहारलोपे, अव् इति जाते, अकारवकारयोः 'ऊठ्' आदेश, अनुबन्धलोपे, 'ऊ' इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'ऊः' इति रूपं सिद्धम्।

**मूः**- मवनं मू (बन्धनम्)। मव् धातोः क्विप् प्रत्यये, क्विपः सर्वापहारलोपे, मव् इति जाते, अकार-वकारयोः ऊठ् आदेशे, अनुबन्धलोपे, मू इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'मू' इति रूपं सिद्धम्।

**इच्छा**- इष् धातोः (इषु इच्छायाम्) ''इच्छा'' इति सूत्रेण शप्रत्यये, यक् इत्यस्य च अभावे, अनुबन्धलोपे, इष् अ इति जाते, सार्वधातुकत्वाद् ''इषुगमियमां छः'' इति सूत्रेण षस्य छत्वे, इछ् अ इति जाते, ''छे च'' इति तुगागमे, अनुबन्धलोपे, इ त् छ् अ इति जाते, तकारस्य चकारे श्चुत्वे इच्छ इति जाते, ''अजाद्यतष्टाप्'' इति टाप् प्रत्यये, अनुबन्धलोपे, सवर्णदीर्घे, इच्छा इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'इच्छा' इति रूपं सिद्धम्।

**चिकीर्षा**- (कर्तुमिच्छा)। सन्नन्तात् चिकीर्षधातोः ''अ प्रत्ययात्'' इति सूत्रेण अप्रत्यये, चिकीर्ष अ इति जाते, ''अतो लोपः'' इति सूत्रेण सनोऽकारलोपे, चिकीर्ष् अ इति जाते, स्त्रीत्वविवक्षायाम्, ''अजाद्यतष्टाप्'' इति सूत्रेण टाप् प्रत्यये, अनुबन्धलोपे, सवर्णदीर्घे, चिकीर्षा इति जाते, प्रातिपदिकत्वात् स्वादिकार्ये 'चिकीर्षा' इति रूपं सिद्धम्।

**पुत्रकाम्या**- (आत्मनः पुत्रस्य एषणम्)। पुत्र शब्दात् ''काम्यच्च'' इति सूत्रेण काम्यच्-प्रत्ययेऽनुबन्धलोपे, पुत्रकाम्य इति जाते, धातुसञ्ज्ञायाम् ''अप्रत्ययात्'' इति अप्रत्यये, पुत्र काम्य अ इति जाते, ''अतो लोपः'' इति अलोपे, पुत्रकाम्य इति जाते, टाप् प्रत्यये, सवर्णदीर्घे, प्रातिपदिकत्वात् स्वादिकार्ये 'पुत्रकाम्या' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

871. **गुरोश्च हलः ( 3-3-103 ) ।।विधिसूत्रम् ।।**
गुरुमतो हलन्तात् स्त्रियामकारः प्रत्ययः स्यात्। ईहा।

872. **ण्यास-श्रन्थो युच् ( 3-3-107 ) ।।विधिसूत्रम् ।।**
अकारस्यापवादः। कारणा। हारणा।

873. **नपुंसके भावे क्त ( 3-3-114 ) ।।विधिसूत्रम् ।।**

874. **ल्युट् च ( 3-3-115 ) ।।विधिसूत्रम् ।।**
हसितम्। हसनम्।

875. **पुंसि सञ्ज्ञायां घः प्रायेण ( 3-3-118 ) ।।विधिसूत्रम् ।।**

---

**गुरोश्चेति**- अत्र सूत्रे धातोः इत्यस्यानुवृत्तिः समायाति। एवञ्च हल्पदेन तदन्तविधिः गृह्यते, अतः हल्पदस्यार्थः अस्ति हलन्त इति। हलन्तधातुः कदापि गुरुः नैव भवितुमर्हति, अतः एव गुरोः इति पदस्यार्थो भवति-गुरुमतः इति। अत्र स्त्रियामित्यस्य अ इत्यस्यापि चानुवृत्तिः समायाति। अतः सूत्रार्थो भवति-**गुरुमतो हलन्ताद् धातोः स्त्रियामकारप्रत्ययः स्यादिति।**

**रूपसिद्धिः**

**ईहा**- ईह् धातोः ''गुरोश्च हलः'' इति अकार-प्रत्यये, ईह् अ इति जाते, ''अजाद्यतष्टाप्'' इति टाप्-प्रत्ययेऽनुबन्धलोपे, सवर्णदीर्घे, ईहा इति जाते, प्रातिपदिकात् स्वादिकार्ये, 'ईहा' इति रूपं सिद्धम्। एवमेव ईक्षा, प्रतीक्षा, खेला, शिक्षा, भिक्षा, भाषा, परिभाषा, हिंसा, लज्जा, वाञ्छा, क्रीडा, शङ्का इत्यादयः प्रयोगाः अपि सिध्यन्ति।

872. **ण्यासेति**- ण्यन्ताद् आस् धातोः श्रन्थ् धातोश्च भावे स्त्रीलिङ्गे च अप्रत्ययः स्यादिति सूत्रार्थः।

873. **नपुंसके इति**- नपुंसकत्वविशिष्ट-भावेऽर्थे क्तप्रत्ययः स्यादिति सूत्रार्थः।

874. **ल्युडिति**- नपुंसकविशिष्टभावेऽर्थे धातोः ल्युट्प्रत्ययः स्यात्।

875. **पुंसीति**- पुंल्लिङ्गविशिष्टसञ्ज्ञायां धातोः घः प्रत्ययः स्यात् करणेऽधिकरणे चार्थे।

**रूपसिद्धिः**

**कारणा**- डुकृञ् धातोः ''हेतुमति च'' इति णिच् प्रत्ययेऽनुबन्धलोपे, कृ इ इति जाते, वृद्धौ, रपरत्वे, 'कारि' इति जाते, ''ण्यासश्रन्थो युच्'' इति युच् प्रत्ययेऽनुबन्धलोपे, कारि यु इति जाते, ''युवोरनाकौ'' इति युस्थाने अनादेशे कारि अन इति जाते, ''णेरनिटि'' इति णि (इ) लोपे कारन इति जाते, स्त्रीत्वविवक्षायां टाप्-प्रत्यये, अनुबन्धलोपे, सवर्णदीर्घे कारना इति जाते, नस्य णत्वे कारणा इति जाते, प्रातिपदिक-सञ्ज्ञायां स्वादिकार्ये 'कारणा' इति रूपं सिद्धम्।

**हारणा**- 'हृञ् हरणे' धातोः णिच् प्रत्यये, वृद्धौ, रपरत्वे, हारि इति जाते, युच् प्रत्यये, अनुबन्धलोपे, अनादेशे हारि अन इति जाते, णिलोपे, हारन इति जाते, नस्य णत्वे, टापि, सवर्णदीर्घे 'हारणा' इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'हारणा' इति रूपं सिद्धम्।

**हसितम्**- 'हसे हसनम्' इत्यस्माद्धातोः ''नपुंसके भावे क्तः'' इति सूत्रेण क्त-प्रत्ययेऽनुबन्धलोपे, हस् त इति जाते, आर्धधातुकसञ्ज्ञायाम् इडागमेऽनुबन्धलोपे, हसित इति जाते, ''कृत्तद्धितेति'' प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'हसितम्' इति रूपं सिद्धम्।

**हसनम्**- 'हसे हसने' धातोः ''ल्युट् च'' इति ल्युट्-प्रत्यये, अनुबन्धलोपे, हस् यु इति जाते, अनादेशे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'हसनम्' इति रूपं सिद्धम्। एवमेव गमनं, पठनं, चलनं, धावनम् इत्यादयः प्रयोगाः ज्ञातव्याः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

876. **छादेर्घेऽद्व्युपसर्गस्य ( 6-4-96 ) ।। विधिसूत्रम् ।।**
द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे परे। दन्ताश्छाद्यन्तेऽनेन इति दन्तच्छदः। आकुर्वन्त्यस्मिन् इति आकरः।

877. **अवे तॄस्त्रोर्घञ् ( 3-3-120 ) ।। विधिसूत्रम् ।।**
अवतारः कूपादेः। अवस्तारो जवनिका।

878. **हलश्च ( 3-3-121 ) ।। विधिसूत्रम् ।।**
हलन्ताद्घञ्। घापवादः। रमन्ते योगिनोऽस्मिन्निति रामः। अपमृज्यतेऽनेन व्याध्यादिरिति अपामार्गः।

879. **ईषद्दुः सुषु कृच्छ्राऽकृच्छ्रार्थेषु खल् ( 3-3-126 ) ।। विधिसूत्रम् ।।**
करणाधिकरणयोरिति निवृत्तम्। एषु दुःख-सुखार्थेषूपपदेषु खल्। तयोरेवेति भावे कर्मणि च। कृच्छ्रे-दुष्करः कटो भवता अकृच्छ्रे ईषत्करः। सुकरः।

---

876. **छादेर्घे इति**- छादेरिति इका निर्देशो न तु णिचा। छाद् इत्यस्य इत्यर्थः। द्वौ उपसर्गौ यस्य सः द्व्युपसर्गः (बहुव्रीहिः) न द्व्युपसर्गः-अद्व्युपसर्गः (नञ्) समासः। **द्विरथवा-अधिक-उपसर्गरहितस्य छादेः ह्रस्वः घे परे इति सूत्रार्थः।**

**रूपसिद्धिः**

**दन्तच्छदः**- दन्ताः छाद्यन्तेऽनेन इति (अधरः) विग्रहे 'दन्त' उपपदपूर्वकात् छादिधातोः ''पुंसि सञ्ज्ञायां घः प्रायेण'' इति सूत्रेण घप्रत्यये, अनुबन्धलोपे, कृद्योगे कर्मणः षष्ठ्यां कृते, दन्त आम् छादि अ इति जाते, ''उपपदसमासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, दन्त छादि अ इति जाते, ''णेरनिटि'' इति णिलोपे, दन्त छाद् अ इति जाते, ''छादेर्घे.'' इत्यादिना उपधाह्रस्वे, दन्त छद इति जाते, तुगागमे, श्चुत्वे, दन्तच्छद इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'दन्तच्छदः' इति रूपं सिद्धम्।

**आकरः**- आकुर्वन्ति अस्मिन् इति विग्रहे, आङ् पूर्वकात् कृधातोः ''पुंसि सञ्ज्ञायां घः प्रायेण'' इति सूत्रेण घप्रत्ययेऽनुबन्धलोपे, आर्धधातुकसञ्ज्ञायां गुणे, रपरत्वे 'आकर' इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'आकरः' इति रूपं सिद्धम्।

877. **अवे इति**- तॄ च स्तॄ च तॄस्त्रौ, तयोः = तॄस्त्रोः। इतरेतरद्वन्द्वः। पञ्चम्यर्थे षष्ठी। **अवपूर्वकात् तॄधातोः स्तॄधातोश्च घञ्प्रत्ययः भवति पुंस्त्वविशिष्टसञ्ज्ञायाम् इत्यर्थः।**

878. **हलश्चेति- पुंस्त्वविशिष्टसञ्ज्ञायां हलन्तधातुभ्यः घञ् प्रत्ययः भवति करणेऽधिकरणे च।**

879. **ईषदिति- ईषद् दुस् सु इत्युपपदात् कृधातोः खल् प्रत्ययः भवति कृच्छ्रे ( दुःखे ), अकृच्छ्रे ( सुखे ), भावे कर्मणि चेति सूत्रार्थः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

880. **आतो युच् ( 3-3-128 ) ।। विधिसूत्रम् ।।** खलोऽपवादः। ईषत्पानः सोमो भवता। दुष्पानः। सुपानः।

881. **अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा ( 3-4-18 ) ।। विधिसूत्रम् ।।**
प्रतिषेधार्थयोरलं खल्वोरुपपदयोः क्त्वा स्यात्। प्राचां ग्रहणं पूजार्थम्। अमैवाव्ययेन इति नियमाद् नोपपदसमासः। दो दद्घोः। अलं दत्त्वा। घुमास्थेतीत्वम्। पीत्वा खलु। अलं खल्वोः किम्? मा कार्षीत्। प्रतिषेधयोः किम्? अलङ्कारः।

---

880. **आत इति**- खल् प्रत्ययस्यापवादः। अतः सूत्रार्थः भवति-**ईषद् दुस् सु इत्युपपदाद् आदन्ताद् धातोः युच् प्रत्ययः स्यात् कृच्छ्रे ( दुःखे ), अकृच्छ्रे ( सुखे ) अर्थे भावे कर्मणि च।**

**रूपसिद्धिः**

**अवतारः**- अवतरन्त्यनेनेति अवतारः। अवपूर्वकात् 'तृ' प्लवन-सन्तरणयोः धातोः ''अवे तृस्त्रोर्घञ्'' इति सूत्रेण करणे घञ् प्रत्यये, अनुबन्धलोपे, अव तृ अ इति जाते, ''अचो ञ्णिति'' इति ऋकारस्य आकारे वृद्धौ, रपरत्वे, अवतार इति जाते, उपपदसमासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'अवतारः' इति रूपं सिद्धम्।

**अवस्तारः**- अवस्तीर्यन्तेऽनेनेति अवस्तारः। अवपूर्वकात् 'स्तृञ् आच्छादने' धातोः घञ् प्रत्यये, अनुबन्धलोपे अव स्तृ अ इति जाते, वृद्धौ, रपरत्वे, अवस्तार इति जाते, उपपदसमासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'अवस्तारः' इति रूपं सिद्धम्।

**रामः**- रमन्ते योगिनोऽस्मिन् इत्यर्थे रमु क्रीडायां धातोः ''हलश्च'' इति घञ् प्रत्यये, अनुबन्धलोपे, उपधा वृद्धौ, रपरत्वे, राम इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये, रामः इति रूपं सिद्धम्।

**अपामार्गः**- अपमृज्यते (दूरीक्रियते) व्याध्यादिरनेनेति अपामार्गः (औषधनाम)। अपपूर्वकाद् मृज् (मृजू शुद्धौ) धातोः ''हलश्चेति'' घञ् प्रत्ययेऽनुबन्धलोपे, अप मृज् अ इति जाते, ''मृजेर्वृद्धिः'' इति वृद्धौ, रपरत्वे, अप मार्ज् अ इति जाते, ''चजोः कु: घिण्ण्यतोः'' इति कुत्वे, अप मार्ग इति जाते ''उपसर्गस्य घञ्यमनुष्ये बहलम्'' इति पकारोत्तर-अकारस्य दीर्घे स्वादिकार्ये 'अपामार्गः' इति रूपं सिद्धम्।

**दुष्करः**- दुःकरोति इति विग्रहे दुस् पूर्वकात् कृधातोः ''ईषद्दुः सुषु कृच्छ्राकृच्छ्रार्थेषु'' इति खल् प्रत्यये, अनुबन्धलोपे, दुस् कृ अ इति जाते, ''आर्धधातुकं शेषः'' इत्यार्धधातुकसञ्ज्ञायां, गुणे, रपरत्वे, दुस् कर इति जाते, उपपदसमासे, सस्य रुत्वे विसर्गे, दुःकर इति जाते, ''इदुदुपधस्य चाऽप्रत्ययस्य'' इति विसर्गस्य षत्वे दुष्कर इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'दुष्करः' इति रूपं सिद्धम्।

**ईषत्करः**- सुखेन क्रियते इति विग्रहे ईषत् पूर्वकात् कृ धातोः खल् प्रत्ययेऽनुबन्धलोपे, आर्धधातुकसञ्ज्ञायां, गुणे, रपरत्वे, ईषत् कर इति जाते, उपपदसमासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'ईषत्करः' इति रूपं सिद्धम्।

**सुकरः**- सुखेन क्रियते इति विग्रहे सु-उपपदात् कृ धातोः खल् प्रत्ययेऽनुबन्धलोपे, आर्धधातुकसञ्ज्ञायां, गुणे, रपरत्वे, सु कर इति जाते, उपपद समासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'सुकरः' इति रूपं सिद्धम्।

**ईषत्पानः** (ईषत्पानः सोमो भवता)- ईषद् उपपदात् 'पा पाने' धातोः ''आतो युच्'' इति युच्-प्रत्यये, अनुबन्धलोपे, अनादेशे, ईषत् पा अन इति जाते, सवर्णदीर्घे, उपपदसमासे, ईषत्पान इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'ईषत्पानः' इति रूपं सिद्धम्।

**दुष्पानः**- (दुष्पानः सोमो भतवा)। दुस् पूर्वकात् 'पा पाने' धातोः युच् प्रत्ययेऽनुबन्धलोपे अनादेशे, सवर्णदीर्घे, सस्य रुत्वे विसर्गे दुःपान इति जाते, ''इदुदुपधस्य चाऽप्रत्ययस्य'' इति विसर्गस्य षत्वे दुष्पान इति जाते, उपपदसमासे प्रातिपदिकात् स्वादिकार्ये 'दुष्पानः' इति रूपं सिद्धम्।

**सुपानः**- (सुपानः सोमो भवता) सुष्ठु पीयते इत्यर्थे सुपूर्वकात् 'पा पाने' धातोः युच् प्रत्ययेऽनुबन्धलोपे, अनादेशे, सवर्णदीर्घे, सुपान इति जाते, उपपदसमासे, प्रातिपदिकात् स्वादिकार्ये 'सुपानः' इति रूपं सिद्धम्।

881. **अलंखल्वोरिति**- अलं च खलु च अलंखलू, तयोः = अलंखल्वोः, इतरेतरद्वन्द्वः। सूत्रे प्रयुक्तमलमिति पदं खलु इति पदञ्च प्रतिषेधार्थकम्। प्राचामिति पदस्य प्रयोगः पूजार्थकः। अलं-खल्वोरुपपदयोः धातोः क्त्वाप्रत्ययः स्यादिति। अमैवाव्ययेन इति नियमाद् अलं खलु इति पदाभ्यां सह उपपदसमासः न भवति। 'मा' कार्षीत् इत्यत्र ''अलं खल्वोरिति'' सूत्रस्य प्रवृत्तिः मा भूद् एतदर्थं प्रकृतसूत्रे प्रतिषेधयोरिति पदमावश्यकम्।

**रूपसिद्धिः**

**अलं 'दत्त्वा'**- अलं पूर्वकाद् दाधातोः ''अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा'' इति सूत्रेण क्त्वा प्रत्यये, अनुबन्धलोपे, अलं दा क्त्वा इति जाते, ''दो दद्घोः'' इत्यनेन दा इत्यस्य स्थाने ''दद्'' इत्यादेशे, ''खरि च'' इति चर्त्वे, दत् त्वा इति जाते, प्रातिपदिकसञ्ज्ञायां सुप्रत्यये, ''क्त्वातोसुन्कसुनः'' इति सूत्रेण अव्ययसञ्ज्ञायाम्, ''अव्ययादाप्सुपः'' इति सूत्रेण सुब्लुकि 'दत्त्वा' इति रूपं सिद्धम्।

**'पीत्वा' खलु**- पाधातोः ''अलं-खल्वोः प्रतिषेधयोः प्राचां क्त्वा'' इति सूत्रेण क्त्वाप्रत्ययेऽनुबन्धलोपे, ''घुमास्थागापाजहातिसां हलि'' इति सूत्रेण आकारस्य ईकारे, पीत्वा इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, अव्ययसञ्ज्ञायां सुब्लुकि 'पीत्वा' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

882. **समान कर्तृकयोः पूर्वकाले ( 3-4-21 ) ।। विधिसूत्रम् ।।**
समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति। द्वित्वमतन्त्रम्। भुक्त्वा पीत्वा व्रजति।

883. **न क्त्वा सेट् ( 1-2-18 ) ॥ अतिदेशसूत्रम् ॥**
सेट् क्त्वा किन्न स्यात्। शयित्वा। सेट् किम्-कृत्वा।

884. **रलो व्युपधाद्धलादेः संश्च ( 1-2-26 ) ॥ अतिदेश सूत्रम् ॥**
इवर्णोवर्णोपधाद्धलादेः रलन्तात् परौ क्त्वा-सनौ सेटौ वा कितौ स्तः। द्युतित्वा, द्योतित्वा। लिखित्वा, लेखित्वा। व्युपधात् किम्? सेवित्वा। हलादेः किम्? एषित्वा, सेट् किम्? भुक्त्वा।

885. **उदितो वा ( 7-2-56 ) ॥ विधिसूत्रम् ॥**
उदितः परस्य क्त्व इड् वा स्यात्। शमित्वा-शान्त्वा। देवित्वा-द्यूत्वा। दधातेर्हिः, हित्वा।

886. **जहातेश्च क्त्वि ( 7-4-43 ) ॥ विधिसूत्रम् ॥**
हित्वा। हाङस्तु हात्वा।

887. **समासेऽनञ्पूर्वे क्त्वो ल्यप् ( 7-1-37 ) ॥ विधिसूत्रम् ॥**
अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। अनञ् किम्? अकृत्वा

---

882. **समानकर्तृकयोरिति**- समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद् धातोः क्त्वा स्यात्। समानः कर्ता ययोस्तौ समानकर्तृकौ, तयोः = समानकर्तृकयोः बहुव्रीहिसमासः। कर्ता यत्र कार्यद्वयं करोति तत्र पूर्वकालिका या क्रिया तद्वाचकाद्धातोः क्त्वाप्रत्ययः भवतीति सूत्रार्थः। यथा-देवदत्तः भुक्त्वा व्रजति। अत्र वाक्ये देवदत्तस्य द्वे क्रिये वर्तेते भोजनं गमनञ्चेति। तत्र पूर्वकालिका या भोजनरूपा क्रिया, तद्वाचकाद् भुज्धातोः क्त्वाप्रत्ययो भवति। द्वित्वमतन्त्रम् अर्थात् प्रकृतसूत्रे समानकर्तृकयोरित्यत्र द्वित्वमविवक्षितम्।

883. **न क्त्वेति**- इटा सह वर्त्तते इति सेट्, बहुव्रीहिसमासः। **सेट् क्त्वा किन्न भवतीति सूत्रार्थः।**

**रूपसिद्धिः**

**भुक्त्वा**- इत्यत्र 'भुज पालनाभ्यवहारयोः' इत्यस्माद् धातोः ''समानकर्तृकयोः पूर्वकाले'' इति क्त्वाप्रत्यये, अनुबन्धलोपे, भुज् त्वा इति जाते, ''चोः कुः'' इति सूत्रेण जकारस्य गकारे, भुग् त्वा इति जाते, ''खरि च'' इति गकारस्य ककारे (चर्त्वे) भुक्त्वा इति जाते, प्रातिपदिकसञ्ज्ञायां सुप्रत्यये, अव्ययसञ्ज्ञायां सुब्लुकि 'भुक्त्वा' इति रूपं सिद्धम्।

**शयित्वा**- इत्यत्र 'शीङ् स्वप्ने' धातोः ''समानकर्तृकयोः पूर्वकाले'' इति क्त्वा प्रत्ययेऽनुबन्धलोपे, शी त्वा इति जाते, आर्धधातुकसञ्ज्ञायामिडागमे, अनुबन्धलोपे शी इ त्वा इति जाते, ''न क्त्वा सेट्'' इति सूत्रेण क्त्वा इत्यस्य अकिद्वद्भावे, ''सार्वधातुकार्धधातुकयोः'' इति गुणे, ''एचोऽयवायावः'' इति सूत्रेण अयादेशे श् अय् इत्वा (शयित्वा) इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, अव्ययसञ्ज्ञायां सुब्लुकि 'शयित्वा' इति रूपं सिद्धम्।

884. **रलो व्युपधादिति**- उश्च इश्च वी, वी उपधे यस्य स व्युपधः, तस्मात् = व्युपधात्, द्वन्द्वगर्भो बहुव्रीहिः। हल् आदिर्यस्य स हलादिः, तस्माद् हलादेः, बहुव्रीहिसमासः। **इवर्णोपधाद् उवर्णोपधाद् वा हलादेः रलन्तात् परौ क्त्वा-सनौ सेटौ विकल्पेन कितौ भवतः इति सूत्रार्थः।** यथा-द्युतित्वा-द्योतित्वा। यत्र किद्वद्भावः भवति, तत्र 'क्ङिति च' इति सूत्रेण गुणनिषेधानन्तरं द्युतित्वा इति रूपस्य निष्पत्तिर्भवति। कित्त्वाभाव-पक्षे गुणविहिते सति 'द्योतित्वा' इति रूपस्य सिद्धिर्भवति।

885. **उदितो वेति**- उदितो धातोः परस्य क्त्व इड् वा स्यात्। शमित्वा-शान्त्वा।

886. **जहातेश्चेति**- हा (ओ हाक्) धातोर्हि इत्यादेशः स्यात् क्त्वाप्रत्यये परे इति सूत्रार्थः। यथा-हित्वा।

887. **समासेऽनञिति**- अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशो भवति। अनञ् इत्यस्मिन् पदेऽनञ् इत्यस्यार्थः पर्युदासवशाद् नञ्-भिन्नः नञ्सदृशः अव्ययः इत्यर्थः वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

888. **आभीक्ष्ण्ये णमुल् च ( 3-4-22 )** आभीक्ष्ण्ये पूर्वविषये णमुल् स्यात् क्त्वा च।

889. **नित्य-वीप्सयोः ( 8-1-14 ) ।।विधिसूत्रम् ।।**

आभीक्ष्ण्ये द्योत्ये वीप्सायां च पदस्य द्वित्वं स्यात्। आभीक्ष्ण्यं तिङन्तेष्वव्ययसञ्ज्ञकेषु कृदन्तेषु। स्मारं-स्मारं नमति शिवम्। स्मृत्वा-स्मृत्वा। पायं-पायम्। भोजं-भोजम्। श्रावं-श्रावम्।

---

888. **आभीक्ष्ण्ये इति**- आभीक्ष्ण्ये इति पदं सप्तम्यन्तम्। णमुलिति पदं विधेयम्। अत्र चकार-पदेन क्त्वाप्रत्ययस्य ग्रहणं भवति। **अतः आभीक्ष्ण्ये अर्थे द्योत्ये समानकर्तृकाद्धातोः पूर्वविषये णमुल्प्रत्ययः स्यात् क्त्वा चेति सूत्रार्थः।**

**रूपसिद्धिः**

**द्युतित्वा-द्योतित्वा**- 'द्युत दीप्तौ' धातोः ''समानकर्तृकयोः पूर्वकाले'' इति क्त्वा प्रत्यये, आर्धधातुकसञ्ज्ञायाम्, इडागमे, ''न क्त्वा सेट्'' इति सूत्रेण प्राप्तं कित्त्वाभावं प्रबाध्य ''रलो व्युपधाद्धलादेः संश्च'' इति सूत्रेण क्त्वा इत्यस्य विकल्पेन किद्वद्भावे, ''पुगन्तलघूपधस्य च'' इति सूत्रेण गुणे प्राप्ते ''क्ङिति च'' इति सूत्रेण निषेधे, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये अव्ययसञ्ज्ञायाम्, ''अव्ययादाप्सुपः'' इति सुब्लुकि, 'द्युतित्वा' इति रूपं सिद्धम्। कित्त्वाभावपक्षे गुणविहिते सति 'द्योतित्वा' इति रूपद्वयं सिद्धम्।

**लिखित्वा, लेखित्वा**- 'लिख अक्षरविन्यासे' इति धातोः क्त्वाप्रत्यये अनुबन्धलोपे, लिख् त्वा इति जाते, आर्धधातुकसञ्ज्ञायाम्, इडागमे, अनुबन्धलोपे, लिख् इ त्वा इति जाते, विकल्पेन किद्वद्भावे, लघूपधगुणनिषेधे, स्वादिकार्ये इति 'लिखित्वा' इति रूपम्। पक्षे विकल्पाभावे (कित्त्वाभावे) गुणे 'लेखित्वा' इति रूपद्वयं सिद्धम्।

**शमित्वा-शान्त्वा**- 'शमु उपशमे' इत्यस्माद्धातोः क्त्वाप्रत्यये, अनुबन्धलोपे, शम् त्वा इति जाते, आर्धधातुकसञ्ज्ञायाम्, ''उदितो वा'' इति सूत्रेण विकल्पेन इडागमे, शम् इत्वा इति जाते, स्वादिकार्ये 'शमित्वा' इति रूपम्। पक्षे विकल्पाभावे ''अनुनासिकस्य क्विझलोः क्ङिति'' इति सूत्रेण उपधादीर्घे, शाम् त्वा इति जाते, ''नश्चापदान्तस्य झलि'' इति सूत्रेण मकारस्य अनुस्वारे, परसवर्णे 'शान्त्वा' इति रूपद्वयं सिद्धम्।

**देवित्वा-द्यूत्वा**- 'दिवु' इत्यस्माद्धातोः क्त्वा प्रत्ययेऽनुबन्धलोपे, दिव् त्वा इति जाते, आर्धधातुकसञ्ज्ञायाम् ''उदितो वा'' इति सूत्रेण विकल्पेन इडागमेऽनुबन्धलोपे, दिव् इ त्वा इति जाते, ''न क्त्वा सेट्'' इति सूत्रेण 'क्त्वा' इत्यस्य अकिद्वद्भावे, लघूपधगुणे स्वादिकार्ये 'देवित्वा' इति रूपम्। पक्षे इडभावे दिव् त्वा इति जाते, ''च्छ्वोः शूडनुनासिके च'' वकारस्य ऊठ्-आदेशे, दि ऊ त्वा इति जाते, ''इको यणचि'' इति सूत्रेण इकारस्य यकारे (यणि) 'द्यूत्वा' इति जाते, प्रातिपदिकात् स्वादिकार्ये 'द्यूत्वा' इति रूपद्वयं सिद्धम्।

**हित्वा**- 'डुधाञ् धारण-पोषणयोः' इत्यस्माद्धातोः क्त्वा प्रत्यये, अनुबन्धलोपे, इट् प्राप्ते ''एकाच उपदेशेऽनुदात्तात्'' इति निषेधे, धा त्वा इति जाते, ''दधातेर्हिः'' इति सूत्रेण धा स्थाने 'हि' आदेशे, हित्वा इति जाते, प्रातिपदिकात् स्वादिकार्ये 'हित्वा' इति रूपं सिद्धम्।

**हित्वा**- 'ओहाक् त्यागे' धातोः क्त्वा प्रत्ययेऽनुबन्धलोपे, हा त्वा इति जाते, ''जहातेश्च क्त्वि'' इति सूत्रेण 'हा' स्थाने 'हि' आदेशे, हित्वा इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'हित्वा' इति रूपं सिद्धम्।

**हात्वा**- 'ओहाङ् गतौ' इत्यस्याद्धातोः क्त्वाप्रत्यये, अनुबन्धलोपे, हात्वा इति जाते, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये 'हात्वा' इति रूपं सिद्धम्।

**प्रकृत्य**- प्रपूर्वकात् कृधातोः ''समानकर्तृकयोः पूर्वकाले'' इति सूत्रेण क्त्वा-प्रत्यये, ''कुगतिप्रादयः'' इति सूत्रेण समासे, ''समासेऽनञ्पूर्वे क्त्वो ल्यप्'' इति सूत्रेण ल्यपि, अनुबन्धलोपे, प्र कृ य इति जाते, ''ह्रस्वस्य पिति कृति तुक्'' इति तुगागमे, अनुबन्धलोपे, 'प्रकृत्य' इति जाते, प्रातिपदिकसञ्ज्ञायां सुप्रत्यये, अव्ययसञ्ज्ञायां, ''अव्ययादाप्सुपः'' इति सुब्लुकि 'प्रकृत्य' इति रूपं सिद्धम्।

889. **नित्यवीप्सयोरिति**- आभीक्ष्ण्ये (पौनःपुन्ये) वीप्सायाञ्च अर्थे द्योत्ये पदस्य द्वित्वं भवतीति सूत्रार्थः। यथा-स्मारं-स्मारं नमति शिवमिति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८९०. **अन्यथैवं- कथमित्थंसु सिद्धाप्रयोगश्चेत् ( 3-4-7 ) ।। विधिसूत्रम् ।।**
एषु कृञो णमुल् स्यात् सिद्धोऽप्रयोगोऽस्य एवम्भूतश्चेत् कृञ्। व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः। अन्यथाकारम्। एवङ्कारम्। कथङ्कारम्। इत्थङ्कारं भुङ्क्ते। सिद्धेति किम्? शिरोऽन्यथा कृत्वा भुङ्क्ते।

---

८९०. **अन्यथैवमिति- अन्यथा, एवम् कथम्, इत्थम् इत्युपपदपूर्वकात् कृञ्धातोः णमुल्- प्रत्ययः स्यात् सिद्धोऽप्रयोगोऽस्य एवम्भूतश्चेत् कृञ् अर्थाद् व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः।**

**रूपसिद्धिः**

**स्मारं-स्मारं नमति शिवम्**- स्मृधातोः ''आभीक्ष्ण्ये णमुल् च'' इति सूत्रेण णमुल्-प्रत्ययेऽनुबन्धलोपे, ''अचोञ्णिति'' इति सूत्रेण वृद्धौ रपरत्वे, स्मारम् इति जाते, प्रातिपदिकात् सुप्रत्यये, ''कृन्मेजन्तः'' इत्यव्ययसञ्ज्ञायाम् ''अव्ययादाप्सुपः'' इति सूत्रेण सुब्लुकि, ''नित्यवीप्सयोः'' इति सूत्रेण स्मारम् इत्यस्य द्वित्वे, स्मारम् स्मारम् इति जाते, ''मोऽनुस्वारः'' इति सूत्रेण मकारस्य अनुस्वारे, 'स्मारं स्मारम्' इति रूपं सिद्धम्।

**पायं-पायम्**- पा धातोः णमुल् प्रत्ययेऽनुबन्धलोपे, पा अम् इति जाते, ''आतो युक् चिण्कृतोः'' इति सूत्रेण युगागमेऽनुबन्धलोपे, पायम् इति जाते, स्वादिकार्ये, द्वित्वे पायम् पायम् इति जाते, पूर्वमकारस्य अनुस्वारे 'पायं पायम्' इति रूपं सिद्धम्।

**भोजं-भोजम्**- भुज् धातोः णमुल्-प्रत्ययेऽनुबन्धलोपे, लघूपधगुणे, भोजम् इति जाते, स्वादिकार्ये, द्वित्वे, भोजम् भोजम् इति जाते, मस्यानुस्वारे ''भोजं भोजम्'' इति रूपं सिद्धम्।

**श्रावं-श्रावम्**- श्रु श्रवणे धातोः णमुल् प्रत्ययेऽनुबन्धलोपे, श्रु अम् इति जाते, ''अचोञ्णिति'' इति वृद्धौ, श्रौ अम् इति जाते, आवादेशे, श्रावम् इति जाते, स्वादिकार्ये, द्वित्वे, मकारस्य अनुस्वारे 'श्रावं श्रावम्' इति रूपं सिद्धम्।

**अन्यथाकारम्**- अन्यथापूर्वकात् कृ धातोः ''अन्यथैवं कथमित्थंसु सिद्धाप्रयोगश्चेत्'' इति सूत्रेण णमुल्प्रत्यये, अनुबन्धलोपे, अन्यथा कृ अम् इति जाते, वृद्धौ, रपरत्वे 'अन्यथाकारम्' इति जाते, उपपदसमासे प्रातिपदिकसञ्ज्ञायां सुप्रत्यये, अव्ययसञ्ज्ञायाम् ''अव्ययादाप्सुपः'' इति सुब्लुकि 'अन्यथाकारम्' इति रूपं सिद्धम्।

**एवङ्कारम्**- 'एवम्' पूर्वकात् कृ धातोः णमुल् प्रत्ययेऽनुबन्धलोपे, एवम् कृ अम् इति जाते, वृद्धौ, रपरत्वे, एवम् कारम् इति जाते, समासे, प्रातिपदिकसञ्ज्ञायां स्वादिकार्ये, अनुस्वारे, परसवर्णे 'एवङ्कारम्' इति रूपं सिद्धम्।

**कथङ्कारम्**- 'कथम्' पूर्वकात् कृ धातोः णमुल् प्रत्यये, अनुबन्धलोपे, कथम् कृ अम् इति जाते, वृद्धौ, रपरत्वे, समासे, प्रातिपदिकात् स्वादिकार्ये, अनुस्वारे, परसवर्णे 'कथङ्कारम्' इति रूपं सिद्धम्।

**इत्थङ्कारम्**- 'इत्थम्' पूर्वकात् कृ धातोः णमुल् प्रत्यये, अनुबन्धलोपे, वृद्धौ, रपरत्वे, इत्थम् कारम् इति जाते, समासे, प्रातिपदिकात् स्वादिकार्ये, अनुस्वारे, परसवर्णे 'इत्थङ्कारम्' इति रूपं सिद्धम्।

।। इत्युत्तरकृदन्त-प्रकरणम् ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभयासार्थप्रश्ना:

### वस्तुनिष्ठप्रश्ना: –

1. द्रष्टुमित्यत्र प्रत्ययो वर्तते –
   (क) अम्  (ख) अण्
   (ग) तुमुन्  (घ) ण्वुल्
2. पाक: इत्यत्र प्रत्ययोऽस्ति –
   (क) सु  (ख) घञ्
   (ग) अच्  (घ) अक्
3. एरच् इति सूत्रेण प्रत्ययो भवति –
   (क) रच्  (ख) एरच्
   (ग) अच्  (घ) इच्
4. स्वप्न: इत्यत्र प्रत्ययोऽस्ति –
   (क) नन्  (ख) नङ्
   (ग) अच्  (घ) अण्
5. 'हसनम्' इत्यत्र प्रत्ययो वर्तते –
   (क) अन्  (ख) अम्
   (ग) नम्  (घ) ल्युट्
6. राम: इत्यत्र घञ्-प्रत्यय: केन सूत्रेण भवति –
   (क) अवे तृस्त्रोर्घञ्  (ख) हलश्च
   (ग) भावे  (घ) अकर्तरि च कारके
7. सुपान: इत्यत्र प्रत्ययो वर्तते –
   (क) युच्  (ख) ल्युट्
   (ग) अन्  (घ) घञ्
8. "अलंखल्वो: प्रतिषेधयो: प्राचां क्त्वा" इति सूत्रे प्राचाम् इति पदमस्ति –
   (क) प्रतिषेधार्थकम्  (ख) पूजार्थकम्
   (ग) पर्याप्त्यर्थकम्  (घ) प्राचीनार्थवाचकम्
9. भुक्त्वा इत्यत्र धातुरस्ति –
   (क) भुजो (भुज्)  (ख) भुक्
   (ग) भक्ष  (घ) भू
10. कथङ्कारम् इत्यत्र प्रत्ययोऽस्ति –
   (क) अम्  (ख) रम्
   (ग) कारम्  (घ) णमुल्

### लघूत्तरात्मकप्रश्ना: –

11. 'तुमुण्ण्वुलौ क्रियायां क्रियार्थायाम्' इति सोदाहरणं सूत्रस्यार्थो लेख्य:।
12. 'पाक:' इत्यत्र कस्मिन् अर्थे घञ्-प्रत्ययो भवति?
13. ऋदन्तादुवर्णान्ताद् धातो: क: प्रत्ययो भवति?
14. 'विघ्न:' इत्यत्र कप्रत्यय: कस्मिन् अर्थे भवति?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

15. 'उप्त्रिमम्' इत्यत्र धातुप्रत्ययौ कौ?
16. 'वेपथुः' इत्यत्र कः प्रत्ययः केन सूत्रेण भवति?
17. 'याच्ञा' इत्यत्र कः धातुः कश्च प्रत्ययः?
18. 'कृतिः' इत्यत्र कः धातुः कश्च प्रत्ययः?
19. 'कीर्णिः' इत्यत्र केन नत्वम्?
20. 'सम्पत्' इत्यत्र कः प्रत्ययः?
21. 'जूः' इत्यत्र कः प्रत्ययः कश्च धातुः?
22. 'कारणा' इत्यत्र धातुप्रत्ययौ कौ?
23. 'हसितम्' इत्यत्र कस्मिन्नर्थे कः प्रत्ययः?
24. ल्युट् चेति सूत्रं कस्मिन्नर्थे कं प्रत्ययं विदधाति?
25. अवतारः इत्यत्र केन नियमेन घञ्-प्रत्ययः भवति?
26. हलश्चेति कीदृशाद्धातोः घञ्-प्रत्ययं करोति?
27. खल्प्रत्ययविधायकं सूत्रं लिखत।
28. 'सुपानः' इत्यत्र युच् प्रत्ययः कस्यापवादः?
29. 'समानकर्तृकयोः पूर्वकाले' इति सूत्रस्य सोदाहरणम् अर्थं लिखत।
30. 'लेखित्वा' इत्यत्र गुणविधायकं सूत्रं किम्?
31. 'शान्त्वा' इत्यत्र कः धातुः कश्च प्रत्ययः?
32. 'हित्वा' इत्यत्र प्रकृति-प्रत्ययौ लेख्यौ।
33. 'प्रकृत्य' इत्यत्र ल्यबादेशः केन भवति?
34. 'भोजं भोजम्' इत्यत्र कः प्रत्ययः केन भवति?

**निबन्धात्मकप्रश्नाः -**

35. पाठ्यपुस्तके उत्तरकृदन्तस्थ-प्रत्ययानां प्रत्ययान्त शब्दानाञ्च प्रकृतिप्रत्ययसहिता सारणी लेखनीया।
36. तुमुन्-प्रत्ययान्तानां विंशतिशब्दानां सारणीं लिखत।
37. भावार्थे के के प्रत्ययाः कैः नियमैः भवन्ति एकीकृत्य लिखत।
38. विंशतिः-अप् प्रत्ययान्त-शब्दाः लेखनीयाः।
39. क्तिन्नन्त-शब्दानां स्फोरकाणि (चार्ट्) निर्मापयत।
40. पञ्चाशत् ल्युडन्तशब्दाः लेखनीयाः।
41. विंशतिक्त्वाप्रत्ययान्तशब्दानां सारणीं निर्मापयत।
42. दशल्यबन्त-शब्दाः लेखनीयाः।
43. केषाञ्चित् पञ्चसूत्राणां व्याख्या कार्या।
    1. हलश्च
    2. स्त्रियां क्तिन्
    3. भावे
    4. ल्युट् च
    5. समानकर्तृकयोः पूर्वकाले
    6. अवे तृस्त्रोर्घञ्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

7. रलो व्युपधाद्धलादेः संश्च
8. समासेऽनञ्पूर्वे क्त्वो ल्यप्

44. केचन दशप्रयोगाः साधनीयाः।

1. द्रष्टुम्
2. दर्शकः
3. रामः
4. जयः
5. उप्त्रिमम्
6. वेपथुः
7. यज्ञः
8. स्वप्नः
9. स्तुतिः
10. चिकीर्षा
11. कारणा
12. हसनम्
13. सुकरः
14. भुक्त्वा
15. प्रकृत्य
16. स्मारं स्मारम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथोणादयः

**कृ-वा-पा-जि-मि-स्वदि-साध्यशूभ्य उण् ( 1-1 ) ।।उणादिसूत्रम् ।।**

करोतीति कारुः। वातीति वायुः। पायुर्गुदम्। जायुरोषधम्। मायुः पित्तम्। स्वादुः। साध्नोति परकार्यमिति साधुः। आशु शीघ्रम्।

**उणादयो बहुलम् ( 3-3-1 ) ।।विधिसूत्रम् ।।**

एते वर्त्तमाने सञ्ज्ञायां च बहुलं स्युः। केचिदविहिता अप्यूह्याः।

सञ्ज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।

कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।।

---

**कृवापा. इति- कृ, पा, पा, जि, मि, स्वद्, साध्, अशू एभ्यः धातुभ्यः उण् स्यादित्यर्थः।** 'कृदतिङ्' इत्यधिकाराद् उण्-प्रत्ययः कृत्सञ्ज्ञकः, अतः 'कर्तरि कृत्' इति कर्तरि अर्थे उण्-प्रत्ययो भवति।

**रूपसिद्धिः**

**कारुः ( शिल्पी )**- करोतीति कारुः। इत्यत्र ''डुकृञ्-करणे'' धातोः ''कृवापाजिमिस्वदिसाध्यशूभ्य उण्'' इति सूत्रेण कर्तरि अर्थे उण् प्रत्यये, अनुबन्धलोपे, कृ उ इति जाते, ''अचोञ्णिति'' इति ऋकारस्य आवृद्धौ, रपरत्वे, कारु इति जाते, ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिक-सञ्ज्ञायां, स्वादिकार्ये 'कारुः' इति रूपं सिद्धम्।

**वायुः**- वातीति वायुः। इत्यत्र 'वा गतिगन्धनयोः' धातोः ''कृवापा.'' इत्यादिना सूत्रेण उण्-प्रत्यये, अनुबन्धलोपे, वा उ इति जाते, ''आतो युक् चिण्कृतोः'' इति युगागमे, अनुबन्धलोपे वाय् उ इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'वायुः' इति रूपं सिद्धम्।

**पायुः** (गुदस्थानम्) पिबत्यनेनेति पायुः। 'पा पाने' धातोः उण् प्रत्यये, अनुबन्धलोपे, युगागमेऽनुबन्धलोपे, पाय् उ इति जाते, प्रातिपादिकसञ्ज्ञायां, स्वादिकार्ये 'पायुः' इति रूपं सिद्धम्।

**जायुः**- जयति (अभिभवति) रोगान् इति जायुः (औषधम्) 'जि-अभिभवे' इत्यस्माद्धातोः उण्-प्रत्यये, अनुबन्धलोपे, जि उ इति जाते, ''अचोञ्णिति'' इति इकारस्य ऐकारे वृद्धौ, जै उ इति जाते, ''एचोऽयवायावः'' इति ऐकारस्य आयादेशे, ज् आय् उ इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'जायुः' इति रूपं सिद्धम्।

**मायुः ( पित्तम् )**- मिनोति प्रक्षिपति देह ऊष्माणमिति मायुः। 'डुमिञ् प्रक्षेपणे' इत्यस्माद्धातोः उण्-प्रत्यये, अनुबन्धलोपे, मि उ इति जाते, ''अचोञ्णिति'' इति इकारस्य वृद्धौ प्राप्ते, तं प्रबाध्य ''मीनातिमिनोति दीङां ल्यपि च'' इति सूत्रेण इकारस्य आत्वे, मा उ इति जाते, ''आतो युक् चिण्कृतोः'' इति सूत्रेण युगागमे, अनुबन्धलोपे, मायु इति जाते, प्रातिपदिक-सञ्ज्ञायां, स्वादिकार्ये 'मायुः' इति रूपं सिद्धम्।

**स्वादुः**- स्वदते = रोचते इति स्वादुः। 'ष्वद् आस्वादने' धातोः उण्-प्रत्यये, अनुबन्धलोपे, ''धात्वादेः षः सः'' इति सूत्रेण षस्य सत्वे, स्वद् उ इति जाते, णित्त्वाद् ''अत उपधायाः'' इति सूत्रेण उपधावृद्धौ, स्वादु इति जाते, प्रातिपदिकसञ्ज्ञायां, स्वादिकार्ये 'स्वादुः' इति रूपं सिद्धम्।

**साधुः**- साध्नोति परकार्यमिति साधुः। 'साध संसिद्धौ' धातोः कर्तरि अर्थे उण्-प्रत्यये, अनुबन्धलोपे, साधु इति जाते, प्रातिपदिक-सञ्ज्ञायां, स्वादिकार्ये 'साधुः' इति रूपं सिद्धम्।

**आशु**- अश्नुते = व्याप्नोति इति आशु (शीघ्रम्)। 'अशूङ् व्याप्तौ संङ्घाते च' धातोः उण् प्रत्यये, अनुबन्धलोपे, अश् उ इति जाते, ''अत उपधायाः'' इत्युपधावृद्धौ 'आशु' इति जाते, प्रातिपदिकसञ्ज्ञायां, सुप्रत्यये, नपुंसकलिङ्गे, ''स्वमोर्नपुंसकात्'' इति सूत्रेण सोर्लुकि, 'आशु' इति रूपं सिद्धम्।

**उणादय इति**- उण् आदिर्येषां ते = उणादयः, तद्गुणसंविज्ञानबहुव्रीहिसमासः। धातोः परे उणादयः वर्तमाने सञ्ज्ञायां वाच्ये बहुलतया भवन्ति इत्यर्थः।

**क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।**
**विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।।**

**सञ्ज्ञास्विति**- सञ्ज्ञाशब्देषु पूर्वभागे प्रकृत्याः (धातोः) परभागे प्रत्ययस्य च स्वयमेव कल्पना करणीया। पुनः प्रत्ययेऽपिशब्दानुरूपकार्यस्य आवश्यकतां विविच्य अनुबन्धाः योजनीयाः। यथा- प्रयोगे गुणवृद्ध्योरभावः अपेक्षितश्चेत् प्रत्ययः कित् ङिद् वा भवेत्। वृद्धिः करणीया चेत् प्रत्ययः ञित् णिद्वा करणीयः। एवमेव सम्प्रसारणटिलोपादि अन्यकार्याणि अपेक्षितानि चेत् तदनुरूपमेवानुबन्धाः कल्पनीयाः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यास प्रश्नाः

1. 'कारुः' इत्यत्र वृद्धिः भवति –

| | | | |
|---|---|---|---|
| (क) | वृद्धिरेचि सूत्रेण | (ख) | अचोञ्णिति सूत्रेण |
| (ग) | अत उपधायाः सूत्रेण | (घ) | वृद्धिरादैच् |

2. 'पायुः' इति पदे धातुः वर्तते –

| | | | |
|---|---|---|---|
| (क) | पा | (ख) | पिष् |
| (ग) | पाय् | (घ) | उण् |

3. जयति रोगान् इति –

| | | | |
|---|---|---|---|
| (क) | वायुः | (ख) | साधुः |
| (ग) | जायुः | (घ) | मायुः |

4. उण् प्रत्ययो भवति –

| | | | |
|---|---|---|---|
| (क) | कर्मणि | (ख) | कर्तरि |
| (ग) | करणे | (घ) | भावे |

5. बाहुलकं कतिविधम्? लिखत।
6. कारुः वायुः साधुः जायुः मायुः स्वादुः आयु इति रूपाणि साधयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ समास-प्रकरणम्
## तत्रादौ केवलसमासः।

समासः पञ्चधा। तत्र समसनं समासः। स च विशेषसञ्ज्ञाविनिर्मुक्तः केवलसमासः प्रथमः। प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः। प्रायेणोत्तरपदार्थ-प्रधानस्तत्पुरुषस्तृतीयः। तत्पुरुषभेदः कर्मधारयः। कर्मधारय-भेदो द्विगुः। प्रयेणान्यपदार्थ-प्रधानो बहुव्रीहिश्चतुर्थः। प्रायेणोभयपदार्थ-प्रधानो द्वन्द्वः पञ्चमः।

907. **समर्थ पदविधिः ( 2-1-1 ) ।। परिभाषासूत्रम् ।।**

पदसम्बन्धी यो विधिः स समर्थाश्रितो बोध्यः।

908. **प्राक्कडारात्समासः ( 2-1-3 ) ।।अधिकारसूत्रम् ।।**

कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते।

909. **सह सुपा ( 2-1-4 ) ।।अधिकारसूत्रं विधिसूत्रं च ।।**

सुप् सुपा सह वा समस्यते। समासत्वात् प्रातिपदिकत्वेन सुपो लुक्। परार्थाभिधानं वृत्तिः। कृत्-तद्धित-समासैकशेष-सनाद्यन्तधातुरूपाः पञ्चवृत्तयः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स च लौकिकोऽलौकिकश्चेति द्विधा। तत्र 'पूर्वं भूतः' इति लौकिकः। पूर्व अम् भूत सु इत्यलौकिकः। भूतपूर्वः। भूतपूर्वे चरडिति निर्देशात् पूर्वनिपातः।

(वा.) **इवेन समासो विभक्त्यलोपश्च।** वागर्थौ इव वागर्थाविव।

---

**समासः पञ्चधेति**- वक्ष्यमाणभेदेन पञ्चविधो भवति समासः। समसनं समासः। इह भावे घञ्प्रत्ययः। समसनं = संक्षेपः। समस्यतेऽनेकं पदम् अर्थात् संश्लिष्यते, अनेकपदस्य एकपदीभवनं वेति समासः। सम्पूर्वकस्य असु क्षेपणे इति धातोः एकीकरणात्मकः संश्लेषोऽर्थः स्यात्। अन्वर्थेयं सञ्ज्ञा।

**पञ्चधात्वमाह**- स च विशेषसञ्ज्ञेत्यादिना केवलसमासः प्रथम इति-सह सुपेति विहितः समास इत्याशयः।

**प्रायेणेति**- बहुलेषु लक्ष्येषु वर्णितं लक्षणं सङ्घटते तस्मात् प्रायेणेति पदं क्वचिद् अपवादभूतेषु लक्ष्येषु उक्तलक्षणं नापि सङ्घटते इति भावः। ननु कर्मधारय-दिग्वादीनामपि गणनया पञ्चधात्वं नेत्यत आह-तत्पुरुषभेद इति। तत्पुरुषः समाधिकरणः कर्मधारय इति सूत्रेण समानाधिकरणात्मकस्य तत्पुरुषस्य सञ्ज्ञा कर्मधारय इति विधानादिति भावः। कर्मधारयभेदो द्विगुरिति तद्धितार्थ इत्यनेन यत्र समास उक्तः स संख्यापूर्वो द्विगुः इति।

907. **समर्थः पदविधिरिति**- विधीयते इति विधिः = कार्यम्। पदस्य विधिः = पदविधिरिति शेषषष्ठीसमासः। समर्थः शब्दः समर्थाश्रितं लक्षयति। अत उक्तं पदसम्बन्धी यो विधिरिति। समर्थः शक्तोऽपि उच्यते। सामर्थ्यं द्विविधं भवति (1) व्यपेक्षारूपम् (2) एकार्थीभावरूपञ्च। समासस्तु एकार्थीभावे एव भवति, न व्यपेक्षायाम्। विशिष्टा अपेक्षा = व्यपेक्षा तु वाक्ये एव भवति। व्याख्यानादिह एकार्थीभावलक्षणसामर्थ्यं गृह्यते। राजपुरुष इत्यादौ राज-पुरुषपदयोः पृथगर्थौ न भासतेऽपितु राजसम्बध्यभिन्नः पुरुषः इत्यर्थो भवति। एष एव एकार्थीभावः।

908. **प्राक्कडारादिति**- अत्र प्राग्ग्रहणमावर्तते। तेन कडाराः कर्मधारय इत्यतः प्राक् प्रथमं समाससञ्ज्ञा भवति, ततः प्राक् समाससञ्ज्ञकाः भवन्तोऽव्ययीभावादिसञ्ज्ञका इत्यर्थः।

909. **सह सुपेति**- सुबामन्त्रित इत्यस्मात् सुबित्यनुवर्तते। तया सुबनुवृत्त्या सुबन्तं समस्यते इत्यर्थलाभे सिद्धेऽत्र सहग्रहणं योगविभागार्थम्। अतः सुबन्तं समर्थेन सह समस्यते इत्यर्थोऽपि स्यात्। तस्माद् अनुव्यचलत् पर्यभूषयद् इत्यादौ अनु परि इत्यादीनां तिङन्ते समासो भवति। यथा भूतपूर्वः।

इति केवलसमासः।

**रूपसिद्धिः**

**भूतपूर्वः**:- पूर्वं भूतः इति लौकिकविग्रहे पूर्व अम् भूत सु इत्यलौकिकविग्रहे 'सह सुपेति' समासे, ''कृत्तद्धितसमासाश्चेति'' प्रातिपदिकसञ्ज्ञायां, सुपो धातुप्रातिपदिकयोरिति सुपो लुकि, पूर्वभूत इति दशायां भूतपूर्वे चरडिति निर्देशाद् भूतशब्दस्य पूर्वनिपाते, भूतपूर्व इति जाते, एकदेशविकृतमनन्यवदिति परिभाषासहकारेण ङ्याप्प्रातिपदिकादिति सुप्रत्यये सस्य रुत्वे विसर्गे 'भूतपूर्वः' इति रूपं सिद्धयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(वा.) इवेन समास इति- इव इत्यव्ययेन सुबन्तं समस्यते, विभक्तेश्च लोपो न स्यादित्यर्थः। यथा वागर्थाविव।

**अथाव्ययीभावः।**

910. **अव्ययीभावः ( 2-1-5 ) ।।अधिकारसूत्रम् ।।**
अधिकारोऽयं प्राक् तत्पुरुषात्।

911. **अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्यर्थाऽभावाऽत्ययासम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्त-वचनेषु ( 2-1-6 ) ।। विधिसूत्रम् ।।**
विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह नित्यं समस्यते। प्रायेणाविग्रहो नित्यसमासः प्रायेणास्वपदविग्रहो वा। विभक्तौ हरि ङि अधि इति स्थिते-

912. **प्रथमानिर्दिष्टं समास उपसर्जनम् ( 1-2-43 ) ।। सञ्ज्ञासूत्रम् ।।**
समासशास्त्रे प्रथमा-निर्दिष्टम् उपसर्जनसञ्ज्ञं स्यात्।

913. **उपसर्जनं पूर्वम् ( 2-2-30 ) ।।विधिसूत्रम् ।।**
समासे उपसर्जनं प्राक् प्रयोज्यम्। इति 'अधेः' प्राक् प्रयोगः सुपो लुक्, एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः, अव्ययीभावश्च इत्यव्ययत्वात् सुपो लुक्। अधिहरि।

914. **अव्ययीभावश्च ( 2-4-18 ) ।।सञ्ज्ञासूत्रम् ।।**
अयं नपुंसकं स्यात्। गाः पातीति गोपास्तस्मिन्निति अधिगोपम्।

**रूपसिद्धिः**

**वागर्थाविव**- वागर्थौ इवेति लौकिकविग्रहे वागर्थ औ इव इत्यलौकिकविग्रहे इवेन समासो विभक्तेश्चालोपे कृते वागर्थौ इव इत्येवं स्थितौ समासे संहिताया नित्यत्वाद् ''एचोऽयवायावः'' इत्यावादेशे वागर्थाविवेति रूपं निष्पन्नम्।

**इति केवलसमास-प्रकरणम्**

910. **अव्ययीभाव इति**- अस्मादूर्ध्वम् अव्ययीभावस्याधिकारः। अनव्ययम् अव्ययीभावः। पूर्वं समाससंज्ञायां जातायामपि अव्ययीभावसंज्ञया तस्याः न बाधः।

911. **अव्ययमिति**- विभक्त्यर्थादिषु वर्तमानम् अव्ययं समर्थेन समस्यते सुबन्तेन चेति भावः।
**प्रायेणेति**- प्रायः यस्य समासस्य लौकिकविग्रहो न स्यात् स नित्यसमासः अथवा प्रायः यस्य स्वपदैर्लौकिकविग्रहो न भवति, स नित्यसमासः।
**विभक्तौ इति**- विभक्तिवचने इत्यर्थः। सप्तम्या अर्थे यद् अव्ययं तदिह विभक्तिवचनम्। यथा हरौ इति लौकिकविग्रहे, हरि ङि. अधि इत्यलौकिकविग्रहे अधि इत्यस्य सप्तम्यर्थोऽधिगम्यते।

912. **प्रथमानिर्दिष्टमिति**- इह समास-पदं समासविधायकशास्त्रे लाक्षणिकं, व्याख्यानात्।

913. **उपसर्जनं पूर्वमिति**- समास इत्यधिकृतं योग्यताबलेन इह सप्तम्यां विपरिणमते, अत आह समासे इति। समासे उपसर्जनसंज्ञस्य प्राक् प्रयोगः कार्यः।
**प्राक् प्रयोग इति**- अधि इत्यस्य प्राक् प्रयोग इत्यर्थः।
**सुपो लुगिति**- समासत्वात् कृत्तद्धितसमासाश्चेति सूत्रेण प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरित्यनेन ङि. इत्यस्य लुगिति भावः।
**प्रातिपदिकसंज्ञायामिति**- पूर्वं भूता या प्रातिपदिकसंज्ञा, तस्यामेव ङिप्रत्ययस्य लुकि सति एकदेशविकृतमनन्यवदिति न्यायेन स्वाद्युत्पत्तिः। सुपो लुगिति अव्ययादाप्सुप इत्यनेन विशिष्टाद् विहितस्य सुपो लुगित्यर्थः।

**रूपसिद्धिः**

**अधिहरि**- हरौ इति लौकिविग्रहे, हरि ङि अधि इत्यलौकिकविग्रहे अव्ययं विभक्तीत्यादिना समासे, समासत्वात् कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञायां, सुपो धातुप्रातिपदिकयोरिति सुपो लुकि, प्रथमानिर्दिष्टमिति सूत्रेण अधि इत्यस्योपसर्जनसंज्ञायाम्, उपसर्जनं पूर्वमिति पूर्वप्रयोगे, एकदेशविकृतमनन्यवद् इति न्यायेन अधिहरि इत्यस्य प्रातिपदिकत्वात् सुविभक्तौ अव्ययीभावश्चेति अव्ययसंज्ञायाम्, अव्ययादाप्सुपः इति सुपः सोर्लुकि अधिहरि इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

914. **अव्ययीभावश्चेति**– स नपुंसकमिति सूत्राद् नपुसंकमित्यनुवर्तते तदाह नपुंसकं स्यादिति। यथा अधिगोपम्।

915. **नाऽव्ययीभावादतोऽम्त्वपञ्चम्याः ( 3-4-83 ) ।। विधिसूत्रम् ।।**
अदन्तादव्ययीभावात् सुपो न लुक् तस्य पचमीं विना अमादेशः स्यात्।

916. **तृतीया-सप्तम्योर्बहुलम् ( 2-4-84 ) ।। विधिसूत्रम् ।।**
अदन्तादव्ययीभावात् तृतीया-सप्तम्योर्बहुलम् अम्भावः स्यात्। उपकृष्णम्, उपकृष्णेन्। मद्राणां समृद्धि सुमद्रम्। यवनानां व्यृद्धिर्दुर्यवनम्। मक्षिकाणामभावो निर्मक्षिकम्। हिमस्यात्ययोऽतिहिमम्।
निद्रा सम्प्रति न युज्यते इति अतिनिद्रम्। हरिशब्दस्य प्रकाशः इतिहरि। विष्णोः पश्चादनुविष्णु। योग्यता-वीप्सा-पदार्थानतिवृत्ति-सादृश्यानि यथार्थाः। रूपस्य योग्यमनुरूपम्। अर्थम् अर्थं प्रति प्रत्यर्थम्। शक्तिमनतिक्रम्य यथाशक्ति।

**रूपसिद्धिः**

**अधिगोपम्**– गाः पातीति गोपाः, तस्मिन्निति लौकिकविग्रहे गोपा ङि अधि इत्यलौकिकविग्रहे विभक्त्यर्थेऽव्ययं विभक्तीत्यादिना समासे, कृत्तद्धितेति प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति, सुपो लुकि, प्रथमानिर्दिष्टमिति अधीत्यस्य उपसर्जनसंज्ञायाम् उपसर्जनं पूर्वमिति पूर्वनिपाते अव्ययीभावश्चेति नपुंसकसंज्ञायां, ह्रस्वो नपुंसके प्रातिपदिकस्य इति ह्रस्वान्तादेशे नाव्ययीभावादतोऽम्त्वपञ्चम्याः इति सोरमि, अमि पूर्वः इति पूर्व रूपे अधिगोपमिति सिद्ध्यति रूपम्।

915. **नाव्ययीभावादिति**– अकारान्ताद् अव्ययीभावात् सुपो लुग् न भवति, पञ्चमीभिन्नस्य तस्य सुपः स्थाने अम् इत्यादेशो भवतीत्यर्थः।

916. **तृतीया-सप्तम्योरिति**– नाव्ययीभावादिति पूर्वसूत्रेण नित्यम् अम्प्राप्तः किन्तु तृतीयासप्तम्योरित्यनेन विकल्प्यते। यथा उपकृष्णम् उपकृष्णेन।

**रूपसिद्धिः**

**समीपेऽर्थे उपकृष्णम् उपकृष्णेन**– कृष्णस्य समीपमिति लौकिकविग्रहे, कृष्ण ङस् उप इति अलौकिकविग्रहे, अव्ययं विभक्तीत्यादिना समासे, प्रातिपदिकसंज्ञायां, सुपो लुकि, प्रथमा निर्दिष्टमित्युपसर्जनसंज्ञायाम्, उपसर्जनं पूर्वमिति पूर्वप्रयोगे, उपकृष्ण इत्यस्यात् सुप्रत्यये "अव्ययादाप्सुपः" इति सुपो लुकं बाधित्वा नाव्ययीभावादिति सोरमि, पूर्वरूपे, उपकृष्णमिति सिद्धम्। टा-विभक्तौ तृतीयासप्तम्योरिति विकल्पेन अमि उपकृष्णमिति सिद्ध्यति रूपम्। पक्षे अमभावे टाङसिङसामिति इनादेशे गुणे उपकृष्णेन इति सिद्धम्। सप्तम्यामपि उपकृष्णम्, उपकृष्णे इति ज्ञेयम्। तृतीयासप्तम्योर्बहुलमिति सूत्रे बहुलग्रहणात् केषुचित् प्रयोगेषु नित्यम् अम्भावः स्यात्। यथा सुमद्रम्, उन्मत्तगङ्गमित्यादि।

**समृद्ध्यर्थे सुमद्रम्**– मद्राणां समृद्धिरिति लौकिकविग्रहे, मद्र आम् सु इत्यलौकिकविग्रहे, समृद्ध्यर्थेऽव्ययं विभक्तीत्यादिना समासे, प्रातिपदिकसंज्ञायां सुपो लुकि, सु इत्यस्योपसर्जनसंज्ञायां, पूर्वप्रयोगे, सोरमि पूर्वरूपे सुमद्रम् इति सिद्धम्। तृतीया-सप्तम्योर्बहुलम् इति नित्यमम्भावे उक्तरूपं निष्पद्यते।

**व्यृद्ध्यर्थे- दुर्यवनम्**– यवनानां व्यृद्धिरिति लौकिकविग्रहे, यवन आम् दुर् इत्यलौकिकविग्रहे, व्यृद्ध्यर्थे अव्ययं विभक्तीत्यादिना समासे, प्रातिपदिकत्वात् सुपो लुकि, दुर् इत्यस्योपसर्जनत्वात् पूर्वप्रयोगे, सौ सोरमि, पूर्वरूपे, दुर्यवनमिति रूपं सिद्धम्। एवं सर्वत्र।

**अभावेऽर्थे निर्मक्षिकम्**– मक्षिकाणामभावः इति लौकिकविग्रहे, मक्षिका, आम् निर् इत्यलौकिकविग्रहे समासे, प्रतिपदिकत्वात् सुपो लुकि, उपसर्जनत्वात् पूर्वप्रयोगे, गोस्त्रियोरूपसर्जनस्येति ह्रस्वे, स्वादिकार्ये, सिद्धं निर्मक्षिकमिति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

917. **अव्ययीभावे चाकाले ( 6-3-81 ) ।। विधिसूत्रम् ।।**

सहस्य सः स्यादव्ययीभावे, न तु काले। हरेः सादृश्यं-सहरि।

ज्येष्ठस्यानुपूर्व्येणेति अनुज्येष्ठम्। चक्रेण युगपत् सचक्रम्। सदृशः संख्या ससखि। क्षत्राणां सम्पत्तिः सक्षत्रम्। तृणमप्यपरित्यज्य सतृणमत्ति। अग्निग्रन्थपर्यन्तमधीते साग्नि।

---

917. **अत्यये ( विनाशे ) अर्थे अतिहिमम्**- हिमस्यात्यय इति लौकिविग्रहे, हिम ङस् अति इत्यलौकिकविग्रहे, समासेऽतिहिममिति रूपं निष्पद्यते।

**असम्प्रत्यर्थे ( अनौचित्येऽर्थे ) अतिनिद्रम्**- निद्रा सम्प्रति न युज्यते इति लौकिकविग्रहे, निद्रा सु अति इत्यलौकिकविग्रहे, असम्प्रत्यर्थे समासे, प्रातिपदिकत्वात्सुपो लुकि, उपसर्जनत्वात् पूर्वप्रयोगे, ह्रस्वे सौ सिद्धं रूपमतिहिममिति।

**शब्दप्रादुर्भावार्थे इतिहरि**- हरिशब्दस्य प्रकाश इति लौकिकविग्रहे, हरि ङस् इति इत्यलौकिक विग्रहे, शब्द प्रकाशेऽर्थे इति इत्यस्य हरि ङस् इत्यनेन समासादिकार्ये कृते, सौ अव्ययादाप्सुपः इति लुकि, इतिहरि इति सिद्धम्।

**पश्चादर्थे अनुविष्णु**- विष्णोः ङस् अनु इत्यलौकिकविग्रहे, अव्ययं विभक्तीत्यादिना समासादिकार्ये, सौ सोर्लुकि अनुविष्णु इति सिद्धम्।

यथा शब्दस्य चत्वारोऽर्थाः- (1) योग्यता (2) वीप्सा (3) पदार्थानतिवृति = पदार्थानतिक्रमः (4) सादृश्यञ्चेति। एषां क्रमादुदाहरणानि यथा (1) अनुरूपम् (2) प्रत्यर्थम् (3) यथाशक्ति (4) सहरि च।

**तत्र योग्यतायाम् अनुरूपम्**- रूपस्य योग्यमिति लौकिकविग्रहे, रूप ङस् अनु इत्यलौकिकविग्रहे, योग्यतारूपयथार्थेऽव्ययं विभक्ति. इत्यादिना समासे तत्सम्बन्धिनि कार्ये कृते सौ सिद्धं रूपम्।

**वीप्सायां प्रत्यर्थम्**- वीप्सायाम् अर्थस्य द्वित्वम्। अर्थम् अर्थं प्रतीति लौकिकविग्रहे, अर्थ अम् प्रति इत्यलौकिकविग्रहे, समासे, सुपो लुकि, पूर्वप्रयोगे, यणि, प्रत्यर्थ इति स्थितौ, सौ सोरमि पूर्वरूपे, सिद्धं रूपं प्रत्यर्थमिति।

**विशेषः**- समासेन वीप्सायाः प्रकाशितत्वात् समासे द्विर्वचनं न भवति। अर्थाद् वीप्सायामेव प्रति इत्यस्य कर्मप्रवचनीयसंज्ञा स्याद् अतः प्रति इत्यनेन वीप्सा उक्ता एवेति ज्ञेयम्।

**पदार्थानतिवृत्तौ यथाशक्ति**- शक्तिमनतिक्रम्य इति लौकिविग्रहे, शक्ति अम् यथा इत्यलौकिकविग्रहे, पदार्थानतिवृत्तिरूपे यथार्थे समासादिकार्ये, सौ अव्ययादाप्सुपः इति सुपो लुकि, यथाशक्तीति रूपं सिद्धम्।

**अव्ययीभावे इति**- सहस्य सः संज्ञायामिति सूत्रात् सहस्य स इति चानुवर्तते। अत आह सहस्येत्यादि। कालभिन्नेऽव्ययीभावे सहस्य सः स्यादित्यर्थः। यथा सहरि।

**रूपसिद्धिः**

**सादृश्येऽर्थे- सहरि**- हरेः सादृश्यमिति लौकिकविग्रहे हरि ङस् सह इत्यलौकिकविग्रहे, अव्ययं विभक्तीत्यादिना समासे, प्रातिपदिकसंज्ञायां, सुपो लुकि, उपसर्जनत्वात् पूर्वप्रयोगे, सह हरि इति जाते, अव्ययीभावे चाकाले इति सहस्य स इत्यादेशे, सहरि इत्यस्माद् जातायाः विभक्तेः अव्ययादाप्सुप इत्यनेन लुकि, सहरि इति रूपं सिद्ध्यति।

**अनुज्येष्ठम्**- ज्येष्ठस्यानुपूर्व्येणेति लौकिकविग्रहे, ज्येष्ठ ङस् अनु इत्यलौकिकविग्रहे, आनुपूर्व्येऽर्थे अनोः समासे, अनुज्येष्ठ इत्यदन्तत्वाद् नाव्ययीभावादिति सोरमि, पूर्वरूपेऽनुज्येष्ठमिति सिद्धम्।

**सचक्रम्**- यौगपद्येऽर्थे चक्र टा सह इत्यस्य समासे, सहेत्यस्योपसर्जनत्वात् पूर्वप्रयोगे, "अव्ययीभावे चाकाले" इति सहस्य सादेशे, स्वादिकार्ये, सचक्रमिति निष्पन्नं रूपम्।

**ससखि**- सादृश्येऽर्थे सखि टा सह इत्यलौकिकविग्रहे, समासे, सादेशे सौ "अव्ययादाप्सुपः" इति सोर्लुपि ससखि इति निष्पद्यते रूपम्।

**सक्षत्रम्**- सम्पत्त्यर्थे क्षत्र आम् सह इत्यलौकिक विग्रहे, समासे, स्वादिकार्ये रूपं निष्पद्यते।

**सतृणम्**- तृणमपि अपरित्यज्येति लौकिकविग्रहे तृण टा सह इत्यलौकिकविग्रहे, सह इत्यस्य अपरित्यज्य सर्वमत्तीत्यर्थे समासे, स्वादिकार्ये, सतृणम् इति रूपं सिद्धम्।

**साग्नि**- अग्नि टा सह इत्यस्य समासे, सहस्य सादेशे, विभक्तिकार्ये, साग्नीति रूपं निष्पन्नम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

918. **नदीभिश्च ( 2-1-20 ) ।।विधिसूत्रम् ।।**
नदीभिः सह संख्या समस्यते।
(वा.) **समाहारे चायमिष्यते**। पञ्चगङ्गम्। द्वियमुनम्।

919. **तद्धिताः ( 4-1-76 ) ।। अधिकारसूत्रम् ।।**
आपञ्चमसमाप्तेरधिकारोऽयम्।

920. **अव्ययीभावे शरत्प्रभृतिभ्यः ( 5-4-107 ) ।।विधिसूत्रम् ।।**
शरदादिभ्यष्टच् स्यात् समासान्तोऽव्ययीभावे। शरदः समीपम् उपशरदम्। प्रतिविपाशम्। (ग.सू.) जराया जरस् च। उपजरसमित्यादि।

921. **अनश्च ( 5-4-108 ) ।।विधिसूत्रम् ।।**
अन्नन्ताद् अव्ययीभावात् टच् स्यात्।

---

918. **नदीभिश्चेति**- नदीवाचिभिः संख्या वा समस्यते।
(वा.) समाहारे चायमिति-समाहारे एव एष समासः इष्यते। द्विगुसमासस्य अपवाद एवायम् अव्ययीभावसमास इति फलितम्। यथा पञ्चगङ्गम्।

**रूपसिद्धिः**

**पञ्चगङ्गम्**- पञ्चानां गङ्गानां समाहार इति लौकिकविग्रहे, पञ्चन् आम् गङ्गा आम् इत्यलौकिकविग्रहे, नदीभिश्चेति समासे, प्रातिपदिकत्वात् सुपो लुकि, उपसर्जनत्वात् पूर्वप्रयोगे, पञ्चन् गङ्गा इति जाते, न लोपे, नपुंसकत्वे, ह्रस्वे पञ्चगङ्ग इत्यस्मात् सौ, सोरमि पूर्वरूपे, पञ्चगङ्गमिति रूपं निष्पद्यते।

**द्वियमुनम्**- द्वयोः यमुनयोः समाहारः इति लौकिकविग्रहे, द्वि ओस् यमुना ओस् इत्यलौकिकविग्रहे, तद्धितार्थोत्तरपदसमाहारे चेति द्विगुं प्रबाध्य नदीभिश्चेति अव्ययीभावसमासे, प्रातिपदिकत्वात् सुपो लुकि, एकविभक्ति चापूर्वनिपाते इति उपसर्जनसंज्ञायां, गोस्त्रियोरूपसर्जनस्येति ह्रस्वे, सौ सोरमि पूर्वरूपे, द्वियमुनमिति सिद्धम्।

919. **तद्धिता इति**- अधिकारोऽयमिति तेन उपराजम् इत्यादौ नस्तद्धिते इति टिलोपस्य सिद्धिः।

920. **अव्ययीभावे इति**- शरदादिगणपठितशब्देभ्यः समासान्तष्टच्प्रत्ययः स्यादव्ययीभावे इत्यर्थः। अत्र राजाहःसखिभ्यः इत्यस्माट्टजनुवर्तते। यथा उपशरदम् इत्यादि।

**उपशरदम्**- शरदः समीपमिति लौकिकविग्रहे, शरद् ङस् उप इत्यलौकिक विग्रहे, समासे, प्रातिपदिकत्वात् सुपो धातुप्रातिपदिकयोरिति सुपो लुकि, उपेत्यस्योपसर्जनसंज्ञायां, पूर्व प्रयोगे, अव्ययीभावे शरदिति समासांत-टच् प्रत्ययेऽनुबन्धलोपे, सौ, सोरमि, पूर्वरूपे, उपशरदम् इति सिद्धं रूपम्।

**प्रतिविपाशम्**- विपाशोऽभिमुखमिति लौकिकविग्रहे, विपाश् ङस् प्रति इत्यलौकिकविग्रहे, लक्षणेऽर्थे "लक्षणे नाभिप्रती आभिमुख्ये" इत्यव्ययीभावसमासे, प्रतिविपाश् इति स्थितौ, अव्ययीभावे शरदिति समासान्तटच्प्रत्यये, स्वादिकार्ये, प्रतिविपाशमिति रूपं निष्पन्नम्।

(ग.सू.) जराया जरस् चेति-शरदाद्यन्तर्गतं गणसूत्रमिदम्। यथा उपजरसम्।

**रूपसिद्धिः**

**उपजरसम्**- जरायाः समीपमिति लौकिकविग्रहे, जरा ङस् उप इत्यलौकिकविग्रहे, समासादिकार्ये, उपजरा इति जाते, जराया जरस् चेति जरसादेशे, समासान्तटचि, स्वादिकार्ये, उपजरसमिति रूपं सिद्धम्।

921. **अनश्चेति**- अव्ययीभाव इत्यनुवर्तते, पञ्चम्यां विपरिणमते च। अनः इति तस्य विशेषं तस्मात्तदन्तविधिः स्यात्। अव्ययीभावे शरत्प्रभृतिभ्य इत्यस्माट्टच्प्रत्ययोऽनुवर्तते। अत आह अन्नन्तादिति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

922. **नस्तद्धिते ( 6-4-144 ) ।।विधिसूत्रम् ।।**
नान्तस्य भस्य टेर्लोपस्तद्धिते। उपराजम्। अध्यात्मम्।

923. **नपुंसकादन्यतरस्याम् ( 5-4-109 ) ।।विधिसूत्रम् ।।**
अन्नन्तं यत् क्लीबं तदन्तादव्ययीभावात् टज् वा स्यात्। उपचर्मम् उपचर्म।

924. **झयः ( 5-4-111 ) ।।विधिसूत्रम् ।।**
झयन्तादव्ययीभावात् टज् वा स्यात्। उपसमिधम् उपसमित्।

---

922. **नस्तद्धिते**– टेरिति सूत्रमनुवर्तते। नः इति षष्ठ्यन्तं पदम्। भस्य इत्यधिकारः न इत्यनेन विशेष्यते, अतः तदन्तविधिः। यथा उपराजम्। अध्यात्मम् इति।

**रूपसिद्धिः**

**उपराजम्**– राज्ञः समीपमित्यर्थे, राजन् ङस् उप इत्यस्य अव्ययं विभक्तीति समासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, उप इत्यस्योपसर्जनत्वात् पूर्वप्रयोगे, उपराजन् इति जाते, अनश्चेति समासान्तटच्प्रत्यये, भसञ्ज्ञायां, नस्तद्धिते इति अनष्टेर्लोपे, सौ, उपराजमिति सिद्धम्।

**अध्यात्मम्**– आत्मनीति लौकिकविग्रहे, आत्मन् ङि अधि इत्यलौकिकविग्रहे, विभक्त्यर्थेऽव्ययमिति अव्ययीभावसमासे, प्रातिपदिकत्वात्सुपो धात्विति सुपो लुकि, टचि, भत्वान्नस्तद्धिते इति टिलोपे, स्वादिकार्ये, अध्यात्ममिति सिद्धम्।

923. **नपुंसकादिति**– नपुंसकग्रहणम् अन्नन्तस्य विशेषणम् अस्ति अत आह अन्नन्तं यत् क्लीबमिति। अन्नन्तेन अव्ययीभावविशेषणात्तदन्तविधिः स्यात्। टचो विकल्पत्वाद् भवति रूपद्वयम् उपचर्मन् उपचर्म च।

**रूपसिद्धिः**

**उपचर्मम् उपचर्म**– चर्मणः समीपमिति लौकिविग्रहे, चर्मन् ङस् उप इत्यलौकिक विग्रहे, समासे, प्रातिपदिकत्वात्सुब्लुकि, उपसर्जनत्वात्पूर्वप्रयोगे, उपचर्मन् इति स्थितौ, नपुंसकादन्यतरस्यामिति टच्प्रत्ययेऽनुबन्धलोपे, भत्वाट्टेर्लोपे, सोरमि, उपचर्ममिति टजभावे, अत्ययादाप्सुपः इति सुपो लुकि, नलोपः इति नलोपे, उपचर्म इति सिद्धम्।

924. **झय इति**– अन्यतरस्यामित्यस्यानुवृत्तिर्भवति। झय इति अव्ययीभावस्य विशेषणम्। विशेषणात् तदन्तविधिः स्यात् यथा उपसमित्।

**रूपसिद्धिः**

**उपसमिधम्, उपसमित्**– समिधः समीपमिति लौकिकविग्रहे समिध् ङस् उप इत्यलौकिकविग्रहे समीपेऽर्थे उप इत्यस्याव्ययं विभक्तीतिसमासे, प्रातिपदिकसंज्ञाया, सुपो लुकि, उपसर्जनसञ्ज्ञायां, पूर्वप्रयोगे, उपसमिध् इति जाते, 'झयः' इति समासान्त टच्प्रत्ययेऽनुबन्धलोपे, टचोऽकारेण अकारान्तत्वात् सु इत्यस्यामि, पूर्वरूपे, उपसमिधम् इति सिद्धम्। पक्षे टजभावे, सोर्लुकि, जश्त्वे चर्त्वे च कृते, उपसमित् इति निष्पन्नं रूपम्।

।।इत्यव्ययीभावः ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ तत्पुरुषसमासः

925. **तत्पुरुषः ( 2-1-22 ) ।। अधिकारसूत्रम् ।।**
अधिकारोऽयं प्राग्बहुव्रीहेः।

926. **द्विगुश्च ( 2-1-23 ) ।। सञ्ज्ञासूत्रम् ।।**
द्विगुरपि तत्पुरुषसंज्ञकः स्यात्।

927. **द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नैः ( 2-1-24 ) ।। विधिसूत्रम् ।।**
द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह समस्यते वा, स च तत्पुरुषः। कृष्णं श्रितः कृष्णश्रित इत्यादि।

928. **तृतीया तत्कृतार्थेन गुणवचनेन ( 2-1-30 ) ।। विधिसूत्रम् ।।**
तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थेन च सह वा प्राग्वत्। शङ्कुलया खण्डः शङ्कुलाखण्डः। धान्येनार्थः धान्यार्थः। तत्कृतेति किम्? अक्ष्णा काणः।

929. **कर्तृकरणे कृता बहुलम् ( 2-1-32 ) ।। विधिसूत्रम् ।।**
कर्तरि करणे च तृतीया कृदन्तेन बहुलं प्राग्वत्। हरिणा त्रातः हरित्रातः। नखैर्भिन्नः नखभिन्नः।
(प.) **कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्।** नखनिर्भिन्नः।

---

925. **तत्पुरुषः इति**- प्रतिज्ञाकृतपञ्चविधसमासमध्ये प्रायेणोत्तरपदार्थप्रधानं तत्पुरुषसंज्ञकं तृतीयं समासमाह तत्पुरुष इति। इत ऊर्ध्वं तत्पुरुषस्याधिकारः।

926. **द्विगुश्चेति**- द्विगुश्चापि तत्पुरुषसंज्ञः स्यादित्यर्थः।

927. **द्वितीया श्रितेति**- प्रत्ययग्रहणे तदन्तग्रहणम् इत्याशयेनाह द्वितीयान्तमिति। **श्रित, अतीत, पतित, गत, अत्यस्त, प्राप्त, आपन्न एभिः सप्तभिः सुबन्तैः सह द्वितीयान्तं पदं विकल्पेन समस्यते, स च तत्पुरुषसंज्ञो भवतीत्यर्थः।** यथा कृष्णश्रितः।

**रूपसिद्धिः**

**कृष्णश्रितः**- कृष्णं श्रितः इति लौकिकविग्रहे, कृष्ण अम् श्रित सु इत्यलौकिकविग्रहे, ''द्वितीया श्रितातीतेति'' समासे, प्रातिपदिकत्वात् सुपो लुकि, सूत्रे द्वितीया इत्यत्रापि प्रथमानिर्दिष्टत्वात् कृष्ण इत्यस्य उपसर्जनसंज्ञायाम्, ''उपसर्जनं पूर्वमिति'' पूर्व प्रयोगे, सौ तस्य रुत्वे, विसर्गे, कृष्णश्रितः इति रूपं सिद्ध्यति।

928. **तृतीया तत्कृतेति**- सुप् सुपेत्यनुवर्तते। तृतीयेति तद्विशेषणम्। सूत्रे तत्कृत इति लुप्ततृतीयाकं गुणवचनेन सह अन्वेति। अत उच्यते तृतीयान्तं पदं तृतीयान्तार्थकृतेन गुणवचनेन सह विकल्पेन समस्यते, स च तत्परुषसंज्ञको भवतीत्यर्थः। यथा- शङ्कुलाखण्डः। धान्यार्थः।

**रूपसिद्धिः**

**शङ्कुलाखण्ड**- शङ्कुलया खण्ड इति विग्रहे, शङ्कुला टा खण्ड सु इत्यलौकिकविग्रहे, आयुधविशेषवाचिनस्तृतीयान्त-शङ्कुलापदस्य गुणवाचिना खण्डशब्देन सह तृतीया तत्कृतार्थेन गुणवचनेनेति समासे, प्रातिपदिकत्वात् सुपो लुकि, उपसर्जनत्वात् पूर्वप्रयोगे, स्वादिकार्ये, उक्तरूपं सिद्धम्।

**धान्यार्थः**- धान्येनार्थः इत्यत्र हेतौ तृतीया, अत्र धान्य टा अर्थ सु इत्यलौकिविग्रहे, तृतीया तत्कृतार्थेनेति समासे, प्रातिपदिकसञ्ज्ञायां, सुब्लुकि, धान्य इत्यस्योपसर्जनत्वे, तस्य पूर्व-प्रयोगे, सवर्णदीर्घे सौ, सो रुत्वे विसर्गे, धान्यार्थः इति रूपं निष्पद्यते।

**तत्कृतेति किमिति**- अक्ष्णा काणः। यदि एतन्नोच्येत, तदा समासः स्यात्। तत्कृतपदसत्त्वे समासो न। यतो हि काणत्वम् अक्ष्णा न कृतम् अपि तु रोगादिना कृतम्।

929. **कर्तृकरणे इति**- सूत्रे समाहारद्वन्द्वसमासत्वात् सप्तम्येकवचनम् अत आह कर्तरि करणे चेति। कर्तरि करणे च तृतीयान्तं कृदन्तपदेन सह बहुलं समस्यते, स च तत्पुरुषसंज्ञः इत्यर्थः। यथा हरित्रातः। नखभिन्नः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

930. **चतुर्थी तदर्थार्थ बलि-हित-सुख-रक्षितैः ( 2-1-36 ) ।।विधिसूत्रम् ।।**
चतुर्थ्यन्तार्थाय यत् तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं वा प्राग्वत्।
यूपाय दारु यूपदारु। तदर्थेन प्रकृतिविकृतिभाव एवेष्टः, तेनेह न रन्धनाय स्थाली।
(वा.) **अर्थेन नित्यसमासो विशेष्य लिङ्गता चेति वक्तव्यम्।**
द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः। गोहितम्। गोसुखम्। गोरक्षितम्।

931. **पञ्चमी भयेन ( 2-1-37 ) ।।विधिसूत्रम् ।।**
चोराद् भयम्-चोरभयम्।

---

**रूपसिद्धिः**

**हरित्रातः**- हरिणा त्रात इति विग्रहे, हरि टा त्रात सु इत्यलौकिकविग्रहे, ''कर्तृकरणे कृता बहुलमिति'' समासे, समासत्वात् प्रातिपदिकसंज्ञायां, सुपो धातुप्रातिपदिकयोरिति सुपो लुकि, हरि इत्यस्योपसर्जनसंज्ञायां, पूर्वप्रयोगे, सौ, उक्तं रूपं सिद्धम्।

**नखभिन्न**- नखैर्भिन्न इति विग्रहे, नख भिस् भिन्न सु इत्यलौकिकविग्रहे, समासे, सुपो लुकि, उपजर्सनसंज्ञायां पूर्व प्रयोगे सौ, सोः रुत्वे विसर्गे 'नखभिन्नः' इति रूपं निष्पद्यते।

**( प. ) कृद्ग्रहणे इति**- कृद्ग्रहणे गतिपूर्वकस्य कारकपूर्वकस्य चापि ग्रहणं बोध्यम्। यथा नखै र्निभिन्नो नखनिर्भिन्न इत्यादौ निर्भिन्नशब्देन सह समासः।

**रूपसिद्धिः**

**नखनिर्भिन्नः**- नखैर्निर्भिन्नः इति विग्रहे, नख भिस् निर्भिन्न सु इत्यलौकिक विग्रहे, ''कृद्ग्रहणे गतिकारकस्यापि ग्रहणमिति'' परिभाषया निर्भिन्न इत्यस्य कृदन्तत्वाद् ग्रहणे सति ''कर्तृकरणे कृता बहुलमिति'' समासे, सुपो लुकि, स्वादिकार्ये, नखनिर्भिन्न इति रूपं निष्पन्नम्।

930. **चतुर्थी तदर्थेति**- तस्मै इदं तदर्थम्। तदर्थ, अर्थ, बलि, हित, सुख, रक्षित इत्येभिः शब्दैः चतुर्थ्यन्तं वा समस्यते, स च तत्पुरुषसंज्ञः स्यादित्यर्थः यथा यूपदारु इत्यादि।

**रूपसिद्धिः**

**यूपदारु**- यूपाय दारु इति लौकिकविग्रहे, यूप ङे दारु इत्यलौकिकविग्रहे, चतुर्थी तदर्थार्थेति समासे, प्रातिपदिकत्वात् सुपो लुकि, उपसर्जनसञ्ज्ञायां, पूर्वप्रयोगे, सौ यूपदारु इत्यस्य नपुंसकत्वात् सोः स्वमोर्नपुंसकादिति लुकि, यूपदारु इति सिद्धम्।

**तदर्थेनेति**- तदर्थेन प्रकृतिविकृतिभाव एवेष्टः भाष्यकारादीनाम् इति शेषः। तेन रन्धनाय स्थाली इत्यादौ न।

(वा.) अर्थेन नित्यसमास इति- विभाषाधिकाराद् विकल्पो भवत्यत एतद् वार्तिकम्। एवञ्च विशेष्यस्य यल्लिङ्गं तत्समस्तपदस्य इत्यपि ज्ञेयम्।

**द्विजार्थः** - द्विजाय अयमिति अस्वपदविग्रहे अन्यपदार्थस्य पुंल्लिङ्गत्वाद् द्विजार्थः इति पुंसि स्यात्।

**द्विजार्था** - द्विजाय इयमिति विग्रहे, अर्थेनेति समासे विशेष्यलिङ्गत्वे रूपं सिद्धम्।

**द्विजार्थम्**- द्विजाय इदमिति विग्रहे द्विजार्थमिति सिद्ध्यति।

**भूतबलिः** - भूतेभ्यो बलिः इति विग्रहे समासे सिद्धम्।

**गोहितम्**- गोभ्यो हितम् इति विग्रहे समासः।

**गोसुखम्**- गोभ्यः सुखमिति विग्रहे समासः।

**गोरक्षितम्**- गोभ्यो रक्षितमिति विग्रहे चतुर्थी तदर्थेति समासे, सुपो लुकि, सौ सोरमि पूर्वरूपे गोरक्षितमिति सिद्धम्।

931. **पञ्चमी भयेनेति**- पञ्चम्यन्तं भयमित्यनेन सह वा समस्यते, स च तत्पुरुष इति। यथा चोरभयम्।

**रूपसिद्धिः**

**चोरभयम्**- चोराद् भयमिति विग्रहे, चोर ङसि भय सु इत्यलौकिकविग्रहे, पञ्चमी भयेनेति समासे, सुपो लुकि, स्वादिकार्ये, चोरभयमिति सिद्धं रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

932. **स्तोकान्तिक-दूरार्थ-कृच्छ्राणि क्तेन ( 2-1-39 ) ।।विधिसूत्रम् ।।**

933. **पञ्चम्याः स्तोकादिभ्यः ( 6-3-2 ) ।।निषेधसूत्रम् ।।**
अलुगुत्तरपदे। स्तोकान्मुक्तः। अन्तिकादागतः। अभ्याशादागतः। दूरादागतः। कृच्छ्रादागतः।

934. **षष्ठी ( 2-2-8 ) ।।विधिसूत्रम् ।।**
सुबन्तेन प्राग्वत्। राजपुरुषः।

935. **पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे ( 2-2-1 ) ।।विधिसूत्रम् ।।**
अवयविना सह पूर्वादयः समस्यन्ते, एकत्वविशिष्टश्चेदवयवी। षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः। एकाधिकरणे किम्-पूर्वश्छात्राणाम्।

---

932. **स्तोकान्तिकेति**- अत्र अर्थशब्दः प्रत्येकमभिसम्बद्ध्यते, व्याख्यानात्। स्तोकार्थकाः, अन्तिकार्थकाः, दूरार्थकाः पञ्चम्यन्ताः, कृच्छ्रशब्दश्च क्तप्रत्ययान्तेन सह वा समस्यते, स च तत्पुरुष इत्यर्थः।

933. **पञ्चम्या इति** - अलुगुत्तरपदे (6-3-1)
इति सूत्रमनुवर्तते। अत उच्यते-स्तोकादिभ्यः परे पञ्चम्याः लुग् न भवति उत्तरपदे सतीत्यर्थः। यथा स्तोकान्मुक्तः।

**रूपसिद्धिः**

**स्तोकान्मुक्तः** - स्तोक ङसि मुक्त सु इत्यलौकिकविग्रहे, स्तोकान्तिक-दूरार्थकृच्छ्राणि क्तेनेति समासे, प्रातिपदिकसञ्ज्ञायां, सुपो धात्विति उभयोः सुपो लुकि प्राप्ते, पञ्चम्या स्तोकादिभ्यः इति पञ्चम्या अलुकि, स्तोकाद् मुक्त इति जाते, यरोऽनुनासिकेऽनुनासिको वा इति परसवर्णे नकारे, स्तोकान्मुक्तः इति रूपं सिद्धम्।

**अन्तिकादागतः** - अन्तिक ङसि आगत सु इत्यलौकिकविग्रहे, समासे, सुब्लुकि प्राप्ते, पञ्चम्या इति अलुकि, स्वादिकार्ये, रूपं सिद्धम्।

**अभ्याशादागतः** - अभ्याशशब्दः समीपपर्यायः। अभ्याश ङसि आगत सु इति अलौकिकविग्रहे स्तोकान्तिकेति समासे पञ्चम्याः अलुकि सौ रूपं निष्पन्नम्।

**दूरादागतः** - दूर ङसि आगत सु इत्यलौकिकविग्रहे, समासे, पञ्चम्याः अलुकि, सौ सिद्धम्।

**कृच्छ्रादागतः**- कृच्छ्र ङसि आगत सु इत्यलौकिकविग्रहे समासे सुब्लुकि प्राप्ते पञ्चम्याः अलुकि रूपं सिद्धम्।

934. **षष्ठीति**- षष्ठ्यन्तं सुबन्तेन सह समस्यते, स तत्पुरुष इत्यर्थः। यथा राजपुरुषः।

**रूपसिद्धिः**

**राजपुरुषः** - राजन् ङस् पुरुष सु इत्यलौकिकविग्रहे षष्ठीति समासे प्रातिपदिकत्वात् सुपो लुकि, राजन् पुरुष इत्यवस्थायाम् अन्तवर्तिनीं विभक्तिम् आश्रित्य प्रत्ययलोपे प्रत्ययलक्षणमिति नियमात् पदसञ्ज्ञायां, नलोपः इति नलोपे राजपुरुषः इति सिद्धम्।

935. **पूर्वापरेति**- एकदेशशब्दोऽवयवे रूढः। पूर्व अपर अधर उत्तरम् एकदेशिना एकाधिकरणे इतिच्छेदः। ननूर्ध्वकाय इतिवत् कर्मधारयसमासेनैव सिद्धे इदं सूत्रं व्यर्थमत आह षष्ठीसमासापवादः इति तथा कायपूर्व इत्याद्यनिष्ट-प्रयोगनिवृत्तये इदं सूत्रमिति भावः।

विशेषः- नन्वत्र लुका लुप्तत्वाद् न लुमताङ्गस्येति प्रत्ययलक्षणनिषेधः स्यादिति चेन्न। अङ्गकार्यं न-लोपरूपमिति दिक्।

**रूपसिद्धिः**

**पूर्वकायः** - पूर्व अम् काय ङस् इत्यलौकिकविग्रहे, षष्ठी इत्यनेन प्राप्तसमासं प्रबाध्य पूर्वापरेति समासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, पूर्व इत्यस्य उपसर्जनत्वात् पूर्वनिपाते, सौ पूर्वकायः इति सिद्धम्।

**अपरकायः** - अत्रापि समासे, सुपो लुकि, अपरस्य उपसर्जनत्वे, पूर्वप्रयोगे, स्वादिकार्ये सिद्धम्।

**एकाधिकरणे किमिति**-अवयवी एकत्वसंख्याविशिष्टः = एकवचनान्तः स्याद् इति कथनात् पूर्वश्छात्राणाम् इत्यादौ समासः न स्यात्। तत्रावयवं प्रति समुदायस्यावयवित्वेऽपि नैकत्वसंख्येति भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

936. **अर्धं नपुंसकम् ( 2-2-2 ) ।।विधिसूत्रम् ।।**
समांशवाची अर्धशब्दो नित्यं क्लीबे, स प्राग्वत्। अर्धं पिप्पल्याः अर्धपिप्पली।

937. **सप्तमी शौण्डैः ( 2-1-40 ) ।।विधिसूत्रम् ।।**
सप्तम्यन्तं शौण्डादिभिः प्राग्वत्। अक्षेषु शौण्डः अक्षशौण्डः। इत्यादि। द्वितीया तृतीयेत्यादियोगविभागाद् अन्यत्रापि द्वितीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः।

938. **दिक्संख्ये सञ्ज्ञायाम् ( 2-1-50 ) ।।नियमसूत्रम् ।।**
पूर्वेषुकामशमी। सप्तर्षयः। सञ्ज्ञायामेव इति नियमार्थं सूत्रम्। तेनेह न उत्तरा वृक्षाः। पञ्च ब्राह्मणाः।

939. **तद्धितार्थोत्तरपदसमाहारे च ( 2-1-51 ) ।।विधिसूत्रम् ।।**
तद्धितार्थे विषये उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्। पूर्वस्यां शालायां भवः पूर्वशाला इत्यादिसमासे जाते (वा.) **सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः।**

---

936. **अर्धं नपुंसकमिति**– अर्धशब्दो द्विविधः खण्डवाची समांशवाची च। तत्र समांशवाची नित्यनपुंसकः। अर्धमिति निर्देशेनैव सिद्धे पुनर्नपुंसकग्रहणं नित्यनपुंसकलाभार्थम्। तेन अन्त्य एवेह गृह्यते अत आह नित्यं क्लीबे स इति। यो नित्यं नपुंसकलिङ्गे विद्यमानः स इत्यर्थः। यथा – अर्धपिप्पली।

**रूपसिद्धिः**

**अर्धपिप्पली**– अर्धं पिप्पल्या इति विग्रहे, अर्ध सु पिप्पली ङस् इत्यलौकिकविग्रहे "अर्धं नपुंसकम्" इति समासे, प्रातिपदिकत्वात् सुपो लुकि, अर्धेत्यस्य उपसर्जनत्वात् पूर्वप्रयोगे, परवल्लिङ्गत्वात् स्त्रीत्वे, सौ, रूपं सिद्धम्।

937. **सप्तमी शौण्डैरिति**– शौण्ड, धूर्त, कितव, व्याड, प्रवीण, संवीत, अन्तर, अधिप, पटु, पण्डित, कुशल, चपल निपुण इति शौण्डादिः। एभिः शौण्डादिभिः सप्तम्यन्तं वा समस्यते, स च तत्पुरुष इत्यर्थः। यथा – अक्षशौण्डः।

**रूपसिद्धिः**

**अक्षशौण्डः**– अक्ष सुप् शौण्ड सु इत्यलौकिकविग्रहे, "सप्तमी शौण्डैः" इति समासे, प्रातिपदिकत्वात् सुब्लुकि, उपसर्जनत्वात् पूर्वप्रयोगे, विभक्तिकार्ये, अक्षशौण्डः इति सिद्धम्।

**द्वितीया तृतीयेत्यादीति**– द्वितीया श्रितातीत., तृतीया तत्कृतार्थेन. इत्यादिसूत्रेषु द्वितीया तृतीया इत्यादियोगविभागः कार्यः। तस्मात् श्रितातीतपतित – गतात्यस्तप्राप्तापन्नेत्यादिभ्योऽन्यत्रापि द्वितीयातृतीयादीनां विभक्तीनां प्रयोगवशात् समासः कार्यः।

938. **दिक्संख्ये इति**– दिक् च संख्या चेति दिक्संख्ये, समानाधिकरणेन सुबन्तेन सञ्ज्ञायामेव समस्येते तत्पुरुषे इति सूत्राशयः। इह विशेषणं विशेष्येण बहुलमित्येव सिद्धे सञ्ज्ञायामेवेति नियमार्थं सूत्रम्। यथा पूर्वेषुकामशमी। सप्तर्षयः।

**रूपसिद्धिः**

**पूर्वेषुकामशमी**– पूर्वा चासौ इषुकामशमी चेति "दिक्संख्ये" इति समासे, सुपो लुकि, गुणे, सौ सिद्धम्।

**सप्तर्षयः**– सप्त च ते ऋषयश्चेति विग्रहे, सप्तन् जस् ऋषि जस् इत्यलौकिकविग्रहे, दिक्संख्ये इति समासे, प्रातिपदिकासञ्ज्ञायां, सुपो लुकि, अन्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वाद् न लोपे, गुणे, रपरत्वे, जसि रूपं सिद्धम्।

**तेनेह नेति**– उतरा वृक्षा इत्यादौ सञ्ज्ञात्वाभावाद् वाक्यमेव। एवं पञ्च ब्राह्मणा इत्यत्रापि।

939. **तद्धितार्थोत्तरपदेति**– सूत्रे एकैव सप्तमी वैषयिक आधारेऽस्ति। अतः तद्धितार्थे विषये अर्थाद् भविष्यति तद्धिते समासः इत्यर्थः स्यात् न तु तद्धितार्थे वाच्ये इत्यर्थो भवतीति।

**समाहारः** = समूहः, भावे घञ्। दिकसंख्ये सञ्ज्ञायामिति सूत्राद् दिक्संख्ये अनुवर्तेते। अत आह दिक्संख्ये प्राग्वदिति। यथा पूर्वस्यां शालायां भव इत्यर्थे समासे कृते – (वा.) सर्वनाम्नो वृत्तिमात्रे इति पूर्वा इत्यस्य पुंवद्भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

940. **दिक्पूर्वपदादसञ्ज्ञायां ञः ( 4-2-107 ) ।।विधिसूत्रम् ।।**
अस्माद् भवार्थे ञः स्यादसञ्ज्ञायाम्।

941. **तद्धितेष्वचामादेः ( 2-1-117 ) ।।विधिसूत्रम् ।।**
ञिति णिति च तद्धितेष्वचाम् आदेरचो वृद्धिः स्यात्। यस्येति च। पौर्वशालः।
पञ्च गावो धनं यस्येति त्रिपदे बहुव्रीहौ।
(वा.) **द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्।**

942. **गोरतद्धितलुकि ( 5-4-92 ) ।।विधिसूत्रम् ।।**
गोऽन्तात् तत्पुरुषाट्टच् स्यात् समासान्तो, न तद्धितलुकि। पञ्च-गव-धनः।

943. **तत्पुरुषः समानाधिकरणः कर्मधारयः ( 1-2-42 ) ।।सञ्ज्ञासूत्रम् ।।**

944. **संख्यापूर्वो द्विगुः ( 2-1-52 ) ।।सञ्ज्ञासूत्रम् ।।**
तद्धितार्थेत्यत्रोक्तः त्रिविधः संख्यापूर्वो द्विगुसञ्ज्ञः स्यात्।

945. **द्विगुरेकवचनम् ( 2-4-1 ) ।।विधिसूत्रम् ।।**
द्विग्वर्थः समाहार एकवत् स्यात्।

---

940. **दिक्पूर्वपदादिति**- वृत्तौ अस्मादिति दिक्पूर्वपदादित्यर्थः।
ञःस्यादिति-ञप्रत्यये कृते ञ् इत्यस्य चुटू इत्यनेन इत्सञ्ज्ञायां, तस्य लोपे पूर्वशाला अ इति जाते।

941. **तद्धितेष्विति**- सूत्रे अचामिति निर्धारणे षष्ठी। पूर्वशाला अ इत्यादौ पकारोत्तरवर्तिनः ऊकारस्य आदिवृद्धिरिति भावः। यथा पौर्वशालः।

**रूपसिद्धिः**

**पौर्वशालः** - पूर्वा ङि शाला ङि इत्यलौकिकविग्रहे, तद्धितार्थविषये ''तद्धितार्थोत्तर-पदसमाहारे चेति'' समासे, दिक्पूर्वपदादसञ्ज्ञायां ञः इति ञप्रत्ययेऽनुबन्धलोपे, कृत्तद्धितसमासाश्चेति प्रातिपदिकसञ्ज्ञायां, सुपो धात्विति सुपो लुकि, पूर्वशाला अ इति स्थितौ, ''सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः'' इति वार्तिकेन पूर्वा इत्यस्य पुंवद्भावे, तद्धितेष्वचामादेरिति आद्यचो वृद्धौ पौर्वशाला अ इत्यवस्थायां, यचि भमिति भसञ्ज्ञायां, यस्येति च इत्याकारलोपे, विभक्तिकार्ये च कृते पौर्वशालः इति रूपं सिद्ध्यति।

**त्रिपदे बहुव्रीहाविति**- अनेकमन्यपदार्थे इति सूत्रे अनेकग्रहणादिति भावः।
(वा.) द्वन्द्व-तत्पुरुषयोरिति-वार्तिकमेतत्। उत्तरपदे परतः द्वन्द्व-तत्पुरुषयोः नित्यसमासवचनं कार्यमित्यर्थः।

942. **गोरतद्धितलुकीति**- तत्पुरुषस्य इत्यनुवर्तते, राजाहः सखिभ्यष्टजितिसूत्रात् समासान्तष्टच्प्रत्ययश्च। अत आह गोऽन्तादित्यादि। न तु तद्धितलुकीति यथा पञ्चगव-धनः।

**रूपसिद्धिः**

**पम्च-गव-धनः** - पञ्च गावो धनं यस्येति लौकिकविग्रहे पञ्चन् जस् गो जस् धन सु इत्यलौकिकविग्रहे, बहुव्रीहिसमासे, प्रातिपदिकत्वात् सुपो लुकि, द्वन्द्वतत्पुरुषयोरुत्तरपदे इति नित्यं पञ्चन् गो धन इत्यनयोस्तत्पुरुषे, अन्तर्वर्तिनीं विभक्तिमादाय नलोपः इत्यादिना न-लोपे पञ्च गो धन इति जाते, गोरतद्धितलुकि इति गोशब्दात् परे टच्प्रत्ययेऽनुबन्धलोपे, अवादेशे, विभक्ति कार्ये च कृते पञ्चगवधनः इति रूपं सिद्धम्।

943. **तत्पुरुषः समानाधिकरणः इति**- समानाधिकरणे यस्तत्पुरुषः सः कर्मधारय संज्ञकः स्यादित्यर्थः।

944. **संख्यापूर्वो द्विगुरिति**- तद्धितार्थ इत्यनेन यत्र समासस्तत्रैवेयं सञ्ज्ञा, न तु दिक्सङ्ख्ये सञ्ज्ञायामिति सूत्रविषयेऽपि।
**त्रिविधः संख्यापूर्व इति**- त्रिविधो हि संख्यापूर्वसमासः। (1) तद्धितार्थे विषये, (2) उत्तरपदे परतः (3) समाहारे वाच्ये च संख्यापूर्वो यः समासः, स द्विगुसंज्ञक इत्यर्थः। क्रमात्तदुदाहरणानि यथा (1) पञ्चकपालः, (2) पञ्चनावप्रियः (3) पञ्चमूली चेति ज्ञेयम्।

945. **द्विगुरेकवचनमिति**- समाहारे यो द्विगुस्तदर्थ एकवत् स्यादित्यर्थः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

946. **स नपुंसकम्( 2-4-17 ) ।।विधिसूत्रम् ।।**
समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात्। पञ्चानां गवां समाहारः पञ्चगवम्।

947. **विशेषणं विशेष्येण बहुलम्( 2-1-57 ) ।।विधिसूत्रम् ।।**
भेदकं भेद्येन समानाधिकरणेन बहुलं प्राग्वत्।
नीलम् उत्पलम् नीलोत्पलम्। बहुलग्रहणात् क्वचिन्नित्यम्। कृष्णसर्पः। क्वचिन्न रामो जामदग्न्यः।

948. **उपमानानि सामान्यवचनैः ( 2-1-55 ) ।।विधिसूत्रम् ।।**
घन इव श्यामः घनश्यामः।
(वा.) **शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्।**
शाकप्रियः पार्थिवः शाकपार्थिवः। देवपूजको ब्राह्मणः देवब्राह्मणः।

---

946. **स नपुंसकमिति**- इह द्विगोः समाहारद्वन्द्वस्य च परामर्शः। तदाह समाहार इत्यादि। यथा पञ्चगवम्।

**रूपसिद्धिः**

**पञ्चगवम्**- पञ्चानां गवां समाहारः इति लौकिकविग्रहे, पञ्चन् आम् गो आम् इत्यलौकिकविग्रहे, तद्धितार्थ इति समासे, प्रातिपदिकसञ्ज्ञायाम्, सुपो लुकि, अन्तर्वर्तिनीं विभक्तिमाश्रित्य नलोपे, गोरतद्धितलुकि इति समासान्त-टच्प्रत्ययेऽनुबन्धलोपे, एचोऽयवायाव इत्यवादेशे, पञ्चगव इत्यस्य द्विगुरेकवचनमिति एकवद्भावे, स नपुंसकमिति नपुंसकसञ्ज्ञायां, सुप्रत्यये, सोरमादेशेऽमि पूर्वः इति पूर्वरूपे, पञ्चगवमिति रूपं सिद्धम्।

947. **विशेषणं विशेष्येणेति**- विशेष्यते येन तद् विशेषणं, कर्तुः करण-त्वविवक्षायां ल्युट्। इतरस्माद् व्यावृत्तिं = भेदं करोति अत उक्तं भेदकमिति व्यावर्तकमित्यर्थः। यथा नीलोत्पलम्।

**रूपसिद्धिः**

**नीलोत्पलम्**- नीलमुत्पलमिति लौकिकविग्रहे, नील सु उत्पल सु इत्यलौकिकविग्रहे, विशेषणं विशेष्येणेति समासे, प्रातिपदिकत्वात् सुपो लुकि, आद्गुणः इति गुणे, परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति नपुंसकत्वे, सौ, सोरमि, पररूपे च कृते नीलोत्पलमिति सिद्धम्।

**बहुलग्रहणादिति**- विशेषणं विशेष्येण बहुलमिति सूत्रे बहुलग्रहणात् समासोऽयं क्वचिन्नित्यः समासः, क्वचिच्च सर्वथा समासाभावः स्यादिति ज्ञेयम्। यथा कृष्णसर्पः। क्वचिन्न रामो जामदग्न्य इति।

**कृष्णसर्पः**- कृष्णश्चासौ सर्पः इति लौकिकविग्रहे, नित्यसमासे, सुपो लुकि, सौ कृष्णसर्प इति रूपं सिद्धम्।

948. **उपमानानीति**- उपमीयतेऽनेनेति उपमानम्। उपमानोपमेययोः साधारणधर्मः सामान्यमित्युच्यते। समानो धर्मः सामान्यम्। तस्य वचनं सामान्यवचनम् इत्यर्थः। उपमानवाचीनि सामान्यवचनैः सह समस्यन्ते इत्यर्थः। यथा घनश्यामः।

**रूपसिद्धिः**

**घनश्यामः**- घन इव श्याम इति विग्रहे, घन सु श्याम सु इत्यलौकिकविग्रहे, उपमानानि सामान्यवचनैरिति समासे, सुपो लुकि, सौ घनश्याम इति सिद्धम्।

**विशेषः**- घनश्यामः इत्यत्र विशेषणं विशेष्येण इत्येव समासे सिद्धे इदं सूत्रं पूर्वनिपातार्थमिति।

(वा.) शाकपार्थिवादीनामिति- शाकप्रिय इत्यत्र बहुव्रीहि-समासं कृत्वा तस्य पार्थिवशब्देन सह समासः कार्यः। यथा शाकपार्थिवः। देवब्राह्मणः।

**रूपसिद्धिः**

**शाकपार्थिवः**- शाकप्रियः पार्थिवः इति लौकिकविग्रहे, शाकपार्थिवादीनामिति वार्तिकेन समासे, पूर्वपदान्तर्गतप्रिय इत्युत्तरपदस्य च लोपे, प्रातिपदिकत्वात् सुपो लुकि, स्वादिकार्ये, शाकपार्थिवः इति रूपं सिद्धम्।

**देवब्राह्मणः**- देवस्य पूजको देवपूजक इति षष्ठीसमासे कृते, ततो देवपूजकश्चासौ ब्राह्मणश्चेति समासे, पूर्वत्र षष्ठीसमासे यदुत्तरपदं पूजक इति तस्य शाकपार्थिवादीनामिति समासे लोपे च कृते विभक्ति कार्ये देवब्राह्मण इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

949. **नञ् ( 2-2-6 ) ।।विधिसूत्रम् ।।** नञ् सुपा सह समस्यते।

950. **न-लोपो नञः ( 6-3-73 ) ।।विधिसूत्रम् ।।**
नञो नस्य लोप उत्तरपदे। न ब्राह्मणः अब्राह्मणः।

951. **तस्मान्नुडचि ( 6-3-74 ) ।।विधिसूत्रम् ।।**
लुप्तनकाराद् नञ उत्तरपदस्याजादेर्नुडागमः स्यात्। अनश्वः। नैकधा इत्यादौ तु नशब्देन सह सुपा (2-1-4) इति समासः।

952. **कुगतिप्रादयः ( 2-2-18 ) ।।विधिसूत्रम् ।।**
एते समर्थेन नित्यं समस्यन्ते। कुत्सितः पुरुषः कुपुरुषः।

953. **ऊर्यादि-च्वि-डाचश्च ( 1-4-61 ) ।।सञ्ज्ञासूत्रम् ।।**
ऊर्यादयः, च्व्यन्ताः डाजन्ताश्च क्रियायोगे गतिसंज्ञाः स्युः। ऊरीकृत्य। शुक्लीकृत्य। पटपटाकृत्य। सुपुरुषः।
(वा.) **प्रादयो गताद्यर्थे प्रथमया**। प्रगत आचार्यः प्राचार्यः।
(वा.) **अत्यादयः क्रान्ताद्यर्थे द्वितीयया**। अतिक्रान्तो मालामिति विग्रहे।

---

949. **नञ् इति**-नञ् सुबन्तेन सह समस्यते इत्यर्थः।

950. **नलोपो नञ इति** - अलुगुत्तरपदे (6-3-1) इत्यधिकारादुत्तरपदे इति अनुवर्तते। नञ् इति प्रत्ययस्य न् इत्यस्य लोपः उत्तरपदे। यथा अब्राह्मणः।

**रूपसिद्धिः**

**अब्राह्मणः** - न ब्राह्मणः इति विग्रहे, न ब्राह्मण सु इत्यलौकिकविग्रहे, नञ् इति समासे, प्रातिपदिकसञ्ज्ञायां सुपो लुकि, नलोपो नञ इति नलोपे, सौ, अब्राह्मण इति सिद्धम्।

951. **तस्मान्नुडचीति**- अत्र अचीति षष्ठ्यर्थे सप्तमी व्याख्यानात्। तस्मादित्यनेन नञ् इति सूत्रगतो लुप्तनकारो नञ् इति पदं गृह्यते। उत्तरपदम् इत्यनुवृत्तं सद् अचीत्यनेन विशेष्यते। तदादिविधिर्भवति। यथा अनश्वः।

**रूपसिद्धिः**

**अनश्वः** - आरोपितोऽश्वः इत्यर्थे न अश्वः इति विग्रहे, न अश्व सु इत्यलौकिकविग्रहे, नञ् इति समासे, सुपो लुकि, नलोपो नञ इति नलोपे, अ अश्व इति जाते, ''तस्मान्नुडचि'' इति नुडागमे, स्वादिकार्येऽनश्व इति सिद्धम्।
**नैकधेति**- ननु न एकधा इत्यादौ समासे सुपो लुकि नलोपे नुटि च अनेकधा इति स्यान्न तु नैकधेत्याह ''नैकधेत्यादौ'' इति।

952. **कुगतिप्रादय इति**- कु इति पापार्थकमव्ययं ग्रह्यते, न तु पृथिवीवाचकं, गत्यादिसाहचर्यात्। तेन कुपुरुष इत्यादौ अव्ययपूर्वपरप्रकृतिस्वरः सिद्ध्यति। यथा कुपुरुषः।

**रूपसिद्धिः**

**कुपुरुषः** - कुत्सितः पुरुषः इति विग्रहे, कु पुरुष सु इत्यलौकिकविग्रहे, कुगतिप्रादयः इति समासे, प्रातिपदिकत्वात् सुपो लुकि, कु इत्यस्योपसर्जनत्वात् पूर्वप्रयोगे, स्वादिकार्ये, कुपुरुष इति रूपं सिद्धम्।

953. **ऊर्यादिच्वीति**- उपसर्गाः क्रियायोगे इति सूत्रात् क्रियायोगे इत्यनुवर्तते। अत उच्यते-क्रियायोगे एते गतिसंज्ञका भवन्तीत्यर्थः। यथा ऊरीकृत्येत्यादिप्रयोगाः।

**रूपसिद्धिः**

**ऊरीकृत्य**- अत्र ऊरी इत्यस्य ऊर्यादि-च्वि-डाचश्चेति गतिसञ्ज्ञायां, ''कुगति-प्रादयः'' इति समासे, कृते सति समासेऽनञ्पूर्वे क्त्वो ल्यबिति क्त्वा इत्यस्य स्थाने ल्यबादेशे, ऊरीकृत्य इति रूपं निष्पन्नम्।
**शुक्लीकृत्य**- च्विप्रत्ययान्तशुक्लशब्दस्य ऊर्यादि-च्वि-डाचश्चेति गतिसञ्ज्ञायां, ''कुगतिप्रादयः'' इति समासे कृते सति समासेऽनञ्पूर्वे. इति क्त्वा इत्यस्य स्थाने ल्यबादेशेऽनुबन्धलोपे, शुक्लीकृत्येति रूपं सिद्ध्यति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

954. **एकविभक्ति चापूर्वनिपाते ( 1-2-44 ) ।।सञ्ज्ञासूत्रम् ।।**
विग्रहे यन्नियतविभक्तिकं तद् उपसर्जनसंज्ञं स्यात्, न तु तस्य पूर्वनिपातः।
955. **गो-स्त्रियोरुपसर्जनस्य ( 1-2-48 ) ।।विधिसूत्रम् ।।**
उपसर्जनं यो गोशब्दः, स्त्रीप्रत्ययान्तं च, तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात्। अतिमालः।
(वा.) **अवादयः क्रुष्टाद्यर्थे तृतीयया।** अवक्रुष्टः कोकिलया अवकोकिलः।
(वा.) **पर्यादयो ग्लानाद्यर्थे चतुर्थ्या।** परिग्लानोऽध्ययनाय पर्यध्ययनः।
(वा.) **निरादयः क्रान्ताद्यर्थे पञ्चम्या।** निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः।
956. **तत्रोपपदं सप्तमीस्थम् ( 3-1-92 ) ।।अधिकारसूत्रम् ।।**
सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थितं यत् कुम्भादि, तद्वाचकं पदमुपपदं स्यात्।

---

**पटपटाकृत्य**- पटत् पटद् इति कृत्वा इत्यर्थे ''डाचि विवक्षिते द्वे बहुलम्'' इति पटच्छब्दस्य द्वित्वे, ''अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्'' इति डाचि, अनुबन्धलोपे, डित्वाट्टिलोपे, नित्यमाम्रेडिते डाचि इति वार्तिकेन तकारपकारयोः स्थाने पकारे एकादेशे, गतिसंज्ञायां, समासे कृते सति क्त्वा इत्यस्य स्थाने ल्यबादेशे उक्तं रूपं सिद्धम्।

**सुपुरुषः** - शोभनः पुरुषः इति विग्रहे, सु पुरुष सु इत्यलौकिकविग्रहे, ''कुगतिप्रादयः'' इति समासे, प्रतिपदिकसंज्ञायां, सुपो धात्विति सुपो लुकि, उपसर्जनत्वात् सु इत्यस्य पूर्वप्रयोगे, सौ, रुत्वे, विसर्गे, सुपुरुष इति रूपं सिद्धम्।

(वा.) **प्रादयो गताद्यर्थे इति**- गताद्यर्थे वर्तमानाः प्रादयः प्रथमान्तेन समस्यन्ते इत्यर्थः। एषस्तु नित्यसमासः।

**रूपसिद्धिः**

**प्राचार्यः** - प्रगत आचार्यः इति लौकिकविग्रहे, प्र आचार्य सु इत्यलौकिक विग्रहे, प्रादयो गताद्यर्थे इति समासे, प्रातिपदिकत्वात् सुपो लुकि, सवर्णदीर्घे सौ प्राचार्य इति रूपं सिद्धम्।

(वा.) अत्यादयः क्रान्ताद्यर्थे इति- क्रान्ताद्यर्थेऽत्यादयो द्वितीयया समस्यन्ते।

954. **एकविभक्ति चेति**- विग्रहवाक्ये यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं भवति, न तु तस्य पूर्वनिपातकार्यम्।

955. **गोस्त्रियोरिति**- उपसर्जनगोशब्दस्य उपसर्जनस्त्रीप्रत्ययान्तस्य च प्रातिपदिकस्य ह्रस्वो भवति। यथा अतिमालः।

**रूपसिद्धिः**

**अतिमालः** - अतिक्रान्तो मालामिति विग्रहे, अतिमाला अम् इत्यलौकिकविग्रहे, ''अत्यादयः क्रान्ताद्यर्थे द्वितीयया'' इति वार्तिकेन समासे, प्रातिपदिकत्वात् सुपो लुकि, अति इत्यस्योपसर्जनत्वे, पूर्व-निपाते, अतिमाला इति जाते, ''एक-विभक्ति चापूर्वनिपाते'' इति माला इत्यस्योपसर्जनसंज्ञायां, गोस्त्रियोरुपसर्जनस्येति ह्रस्वे सौ रूपं सिद्धम्।

(वा.) **अवादय इति**- एते क्रुष्टाद्यर्थे तृतीयया समस्यन्ते। यथा अवकोकिलः।

**रूपसिद्धिः**

**अवकोकिलः** - अव कोकिल टा इत्यस्य ''अवादयः क्रुष्टाद्यर्थे तृतीयया'' इति उपसर्जनसञ्ज्ञायां, गोस्त्रियोरिति ह्रस्वे, सौ रूपं सिद्धम्।

(वा.) **पर्यादय इति**- ग्लानाद्यर्थे एते चतुर्थ्या समस्यन्ते। यथा पर्यध्ययनः।

**रूपसिद्धिः**

**पर्यध्ययनः** - परि अध्ययन ङे इत्यलौकिकविग्रहे, ''पर्यादयो ग्लानाद्यर्थे चतुर्थ्या'' इति समासे, यणि, सुपो लुकि, स्वादिकार्ये, पर्यध्ययन इति रूपं सिद्धम्।

(वा.) **निरादय इति**- क्रान्ताद्यर्थे निरादयः पञ्चम्या समस्यन्ते। यथा निष्कौशाम्बिः।

**रूपसिद्धिः**

**निष्कौशाम्बिः** - निर् कौशाम्बी ङसि इत्यलौकिकविग्रहे, ''निरादयः क्रान्ताद्यर्थे पञ्चम्या'' इति समासे, सुपो लुकि, ''एक विभक्ति चापूर्वनिपाते'' इति कौशाम्बी इत्यस्योपसर्जनसञ्ज्ञायां, गोस्त्रियोरिति ह्रस्वे, निर् कौशाम्बि इति जाते, रेफस्य विसर्गे, इदुदुपधस्य इति विसर्गस्य षत्वे, स्वादिकार्ये, निष्कौशाम्बिरिति सिद्धम्।

956. **तत्रोपपदमिति**- कर्मण्यण् इत्यादि धात्वधिकारान्तर्गतसूत्रे यत् सप्तमीनिर्दिष्टं तदुपपदसंज्ञं स्यादिति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

957. **उपपदमतिङ् ( 2-2-19 ) ।।विधिसूत्रम् ।।**
उपपदं सुबन्तं समर्थेन नित्यं समस्यते, अतिङन्तश्चायं समासः। कुम्भं करोतीति-कुम्भकारः। अतिङ् किम्? मा भवान् भूत्। माङि लुङ् इति सप्तमीनिर्देशान्माङुपपदम्।
**( वा. ) गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः।** व्याघ्री। अश्वक्रीती। कच्छपीत्यादि।

958. **तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ( 5-4-86 ) ।।विधिसूत्रम् ।।**
संख्याव्ययादेः अङ्गुल्यन्तस्य तत्पुरुषस्य समासान्तोऽच् स्यात्। द्वे अङ्गुली प्रमाणमस्य-द्वयङ्गुलम्। निरङ्गुलम्।

959. **अहः सर्वैकदेश संख्यात-पुण्याच्च रात्रेः ( 5-8-87 ) ।।विधिसूत्रम् ।।**
एभ्योऽच् स्यात्। चात् संख्याव्ययादेः। अहर्ग्रहणं द्वन्द्वार्थम्।

---

957. **उपपदमतिङ् इति**- उपपदसंज्ञकं सुबन्तं समर्थेन नित्यं समस्तं भवति, अयञ्चातिङन्तः समासः। यथा कुम्भकारः।

**रूपसिद्धिः**

**कुम्भकारः** - कुम्भं करोतीति लौकिकविग्रहे, कुम्भ अम् कृ इत्यत्र कुम्भ इत्यस्य ''तत्रोपपदं सप्तमीस्थमिति'' उपपदसञ्ज्ञायां, ''कर्मण्यण्'' इति अणि, वृद्धौ, रपरत्वे, कर्तृकर्मणोरिति कर्मणः षष्ठ्यां सत्यां, कुम्भ ङस् कार इति जाते, ''उपपदमतिङ्'' इति समासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, सौ कुम्भकार इति सिद्धम्।
**अतिङ् किमति**- मा भवान् भूत्। इह माङि लुङ् इति सूत्रे सप्तमीनिर्देशान् माङि इति उपपदम्। तस्य भूत् इति लुङ्लकारान्तेन न समासः। अतिङन्तश्चायं समास इति उक्तत्वात्।
**( वा. ) गतिकारकोपपदानामिति**- गति, कारक, उपपद इत्येषां कृदन्तैः सह सुबुत्पत्तेः प्राक् समासो भवतीत्यर्थः। यथा व्याघ्रीत्यादि।

**रूपसिद्धिः**

**व्याघ्री**- व्याजिघ्रतीति विग्रहे, वि + आङ् पूर्वकाद् घ्रा-धातोः ''आतश्चोपसर्गे इति कप्रत्यये, आतो लोप इटि च'' इत्यालोपे, आङो घ्रशब्देन गतिसमासे, पुनः वि इत्यस्य आघ्र इत्यनेन सह गतिकारकोपपदानामिति परिभाषासहकारेण सुबुत्पत्तेः प्रागेव गतिसमासे, स्त्रियां जातेरस्त्रीविषयादिति ङीषि, सौ, भत्वादकारलोपे, स्वादिकार्ये, व्याघ्री इति रूपं सिद्धम्।
**अश्वक्रीती**- अश्वेन क्रीता इति विग्रहे, अश्व टा क्रीत इत्यस्य ''कर्तृकरणे कृता बहुलमिति'' समासे, क्रीतात् करणपूर्वाद् इति ङीषि, सौ, अश्वक्रीतीति सिद्धम्।
**कच्छपी**- कच्छेन पिबतीति विग्रहे, कच्छ टा पा इत्यस्मात् ''सुपि स्थः'' इति कप्रत्ययेऽनुबन्धलोपे, ''आतो लोप इटि चेति'' आकारलोपे, गतिकारकोपपदानामिति सहकारेण सुबुत्पतेः प्राक् पशब्देन समासे, सुपो लुकि, कच्छप इति जाते जातित्वाद् ङीषि, सौ, कच्छपी इति सिद्धम्।

958. **तत्पुरुषस्याङ्गुलेरिति**- संख्यादेरङ्गुल्यन्तस्य अव्ययादेरङ्गुल्यन्तस्य च तत्पुरुषस्य समासान्तः अच्प्रत्ययो भवतीत्यर्थः। यथा द्वयङ्गुलम्। निरङ्गुलम्।

**रूपसिद्धिः**

**द्वयङ्गुलम्**- द्वे अङ्गुली प्रमाणमस्येति विग्रहे, द्वि औ अङ्गुलि औ इत्यलौकिकविग्रहे, तद्धितार्थविषये तद्धितार्थेति समासे, सुपो लुकि, यणि, द्वयङ्गुलि इति जाते, तत्पुरुषस्याङ्गुलेरिति अचि, भत्वाद् इकारलोपे, स्वादिकार्ये, द्वयङ्गुलम् इति सिद्धम्।
**निरङ्गुलम्**- निर्गतम् अङ्गुलिभ्यः इति विग्रहे निर् अङ्गुलि भ्यस् इत्यलौकिकविग्रहे, ''निरादयः क्रान्ताद्यर्थे'' इति समासे, सुपो लुकि, तत्पुरुषस्याङ्गुलेरिति अच् प्रत्ययेऽनुन्धलोपे, भत्वादिकारलोपे, सौ, सोरमि, ''अमि पूर्वः'' इति पूर्वरूपे निरङ्गुलमिति रूपं सिद्धम्।

959. **अहः - सर्वैकदेशेति**- अहन्, सर्व, एकदेश, संख्यात, पुण्य, इत्येतेभ्यः परस्य रात्रिशब्दस्य समासान्तः अच्प्रत्ययो भवतीत्यर्थः। चकारात् संख्याव्ययादेरपि अच् स्यादिति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

960. **रात्राह्नाहा: पुंसि: ( 2-4-29 ) ।।विधिसूत्रम् ।।**
एतदन्तौ द्वन्द्व-तत्पुरुषौ पुंस्येव। अहश्च रात्रिश्च अहोरात्र:। सर्वरात्र:। पूर्वरात्र:। संख्यातरात्र:।
**( वा. ) संख्यापूर्वं रात्रं क्लीबम्।**
द्विरात्रम्। त्रिरात्रम्।

961. **राजाह: सखिभ्यष्टच् ( 5-4-91 ) ।।विधिसूत्रम् ।।**
एतदन्तात् तत्पुरुषाट्टच् स्यात्। परमराज:।

962. **आन्महत: समानाधिकरण-जातीययो: ( 6-3-46 ) ।।विधिसूत्रम् ।।**
आकारोऽन्तादेश: स्यात्समानाधिकरणे, उत्तरपदे जातीये च परे। महाराज: प्रकारवचने जातीयर्। महाप्राकारो महाजातीय:।

---

960. **रात्राह्नाहा इति**- रात्र, अह्न, अह इत्येतदन्तौ द्वन्द्व-तत्पुरुषौ पुंल्लिङ्गे एव भवन्तीत्यर्थ:। यथा अहोरात्र: इत्यादि।

**रूपसिद्धि:**

**अहोरात्र:** - अहश्च रात्रिश्चेति विग्रहे, अहन् सु रात्रि सु इत्यलौकिकविग्रहे, ''चार्थे द्वन्द्व:'' इति समासे, प्रातिपदिकत्वात् सुब्लुकि, अहन् रात्रि इति स्थितौ, अह: सर्वैकेति अचि भत्वादिकारलोपे अहन् इति सूत्रेण नस्य रुत्वे, हशि चेति उत्वे, गुणे, अहोरात्र इति जाते, जातिरप्राणिनाम् इति एकवद्भावे, रात्राह्नाहा: पुंसि इति पुंस्त्वे, स्वादिकार्ये, अहोरात्र: इति सिद्धम्।

**सर्वरात्र:** - सर्वा रात्र्य: इति विग्रहे, सर्वा जस् रात्रि जस् इत्यनयो: पूर्वकालैकसर्वजरदित्यनेन समासे, सुपो लुकि, सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव: इति सर्वा इत्यस्य पुंवद्भावे, अचि इकारलोपे, विभक्तिकार्ये, सर्व रात्र: इति सिद्धम्।

**पूर्वरात्र:** - पूर्वं रात्रेरिति विग्रहे, पूर्व सु रात्रि ङस् इत्यलौकिकविग्रहे, पूर्वापराधरोत्तरमिति समासे, अहस्सर्वैकदेशेत्यचि इकारलोपे, रात्राह्नाहा: पुंसि इति पुंस्त्वे, सौ सस्य रुत्वे, पूर्वरात्र: इति सिद्धम्।

**संख्यातरात्र:** - संख्याता रात्रिरिति विग्रहे, संख्याता सु रात्रि सु इत्यलौकिकविग्रहे, कर्मधारयसमासे, पुंवत्कर्मधारयेति पुंवद्भावे, अचि इकारलोपे, संख्यातरात्र इति रूपं सिद्धम्।

**( वा. ) संख्यापूर्वमिति**- संख्यादि रात्रमिति नपुंसकं भवतीत्यर्थ: यथा द्विरात्रम् इत्यादि।

**रूपसिद्धि:**

**द्विरात्रम्**- द्वयो: रात्र्यो: समाहार इति विग्रहे, द्वि ओस् रात्रि ओस् इत्यनयो: ''तद्धितार्थोत्तरपदेति'' समासे, सुपो लुकि, अचि इकारलोपे, ''रात्राह्नाहा: पुंसि'' इति पुंस्त्वं बाधित्वा ''संख्यापूर्वं रात्रं क्लीबमिति'' नपुंसकत्वे विभक्तिकार्ये, द्विरात्रमिति सिद्धम्।

**त्रिरात्रम्**- तिसृणां रात्रीणां समाहारेऽपि सिद्धिर्ज्ञेया।

961. **राजाह: सखिभ्यष्टजिति**- राजन्, अहन्, सखि इत्येतदन्तात् तत्पुरुषात् समासान्तष्टच् स्यादित्यर्थ:। यथा परमराज:।

**परमराज:** - परमश्चासौ राजा चेति विग्रहे, परम सु राजन् सु इत्यलौकिक विग्रहे, ''सन्महत्परमोत्तमोत्कृष्टा: पूज्यमानै:'' इति कर्मधारयसमासे, सुपो लुकि, परमराजन् इति जाते, राजाह: सखिभ्यष्टजिति समासान्त-टच्प्रत्ययेऽनुबन्धलोपे, भसञ्ज्ञायां टेरनो लोपे, सौ परमराज: इति रूपं निष्पन्नम्।

962. **आन्महत इति**- समानाधिकरणे उत्तरपदे जातीय-देशीययोश्च परतो महत आकारोऽन्तादेश: स्यादित्यर्थ:। यथा महाराज: इत्यादि।

**रूपसिद्धि:**

**महाराज:** - महाँश्चासौ राजा चेति विग्रहे, महत् सु राजन् सु इत्यनयो: ''सन्महत्परमोत्तमोत्कृष्टा: पूज्यमानै:'' इति कर्मधारयसमासे, सुपो लुकि, टचि, भत्वाट्टेरनो लोपे, आन्महत इति आकारान्तादेशे, स्वादिकार्ये, महाराज: इति सिद्धम्। काशिकाया: सिद्धान्तकौमुद्याश्च वृत्तौ देशीयशब्दो नास्तीति चिन्त्यम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

963. **द्वयष्टनः संख्यायामबहुव्रीह्यशीत्योः ( 6-3-47 ) ।। विधिसूत्रम् ।।**
आत् स्यात्। द्वौ च दश च द्वादश। अष्टाविंशतिः।

964. **परवल्लिङ्गं द्वन्द्व- तत्पुरुषयोः ( 2-4-26 ) ।।विधिसूत्रम् ।।**
एतयोः परपदस्येव लिङ्गं स्यात्। कुक्कुटमयूर्याविमे। मयूरी-कुक्कुटाविमौ। अर्धपिप्पली।
**( वा. ) द्विगुप्राप्तापन्नालं-पूर्व-गति-समासेषु प्रतिषेधो वाच्यः। पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः।**

965. **प्राप्तापन्ने च द्वितीयया ( 2-2-4 ) ।।विधिसूत्रम् ।।**
समस्येते अकारश्चानयोरन्तादेशः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नजीविकः। अलं कुमार्यै अलंकुमारिः, अत एव ज्ञापकात् समासः निष्कौशाम्बिः।

---

963. **द्वयष्टन इति**- द्विशब्दस्य अष्टन्- शब्दस्य च आत् स्यात् संख्यावाचके उत्तरपदे परे, न तु बहुव्रीहौ अशीतौ वा परे। यथा द्वादश। अष्टाविंशतिः।

**रूपसिद्धिः**

**द्वादश**- द्वौ च दश चेति विग्रहे, ''चार्थे द्वन्द्व'' इति समासे, सुपो लुकि द्विदशन् इति जाते, द्वयष्टनः संख्यायामिति द्विशब्देकारस्य आत्त्वे, जसि, षट्सञ्ज्ञायां, जसो लुकि नलोपे च द्वादशेति सिद्धम्।

**अष्टाविंशतिः** - अष्टौ च विंशतिश्च अथवा अष्टाधिका विंशतिश्चेति विग्रहे, अष्टन् जस् विंशति जस् इत्यनयोः ''चार्थे द्वन्द्वः'' इति समासे, सुपो लुकि, द्वयष्टनः संख्यायामिति अष्टनो नस्य आत्त्वे, सवर्णदीर्घे, स्वादिकार्ये, अष्टाविंशतिरिति रूपं साधु।

964. **परवल्लिङ्गमिति**- द्वन्द्व-तत्पुरुषयोः परस्य इव लिङ्गं स्यादित्यर्थ। इह द्वन्द्वशब्दः इतरेतरयोगस्यैव वाचकः। समाहारद्वन्द्वे तु स नपुंसकमिति नपुंसकत्वविधानात्। यथा कुक्कुटमयूर्याविमे इत्यादि।

**रूपसिद्धिः**

**कुक्कुटमयूर्याविमे**- कुक्कुटश्च मयूरी चेति द्वन्द्वसमासे, सुब्लुकि, परवल्लिङ्गमिति मयूरीशब्दवल्लिङ्गे स्त्रीत्वे औ-विभक्तौ उक्तरूपं सिद्धम्।

**( वा. ) द्विगुप्राप्तापन्नालमिति**- द्विगु, प्राप्त, आपन्न, अलम्पूर्वं, गति-समास इत्येतेषु परवल्लिङ्गस्य प्रतिषेधः स्यादित्यर्थः। यथा पञ्चकपालः।

**रूपसिद्धिः**

**पञ्चकपालः** - पञ्चसु कपालेषु संस्कृत इति विग्रहे, पञ्चन् सुप् कपाल सुप् इत्यलौकिकविग्रहे, तद्धितार्थोत्तरेति समासे, सुपो लुकि, नलोपे, पञ्चकपाल इति जाते, परवल्लिङ्गमिति कपालशब्दस्य नपुंसकत्वे प्राप्ते, द्विगु-प्राप्तापन्नालम्पूर्वेति निषेधे, पुंसि, रूपं सिद्धम्।

965. **प्राप्तापन्ने चेति**- प्राप्त, आपन्न इत्येतौ शब्दौ द्वितीयान्तेन सह समस्येते, अनयोः शब्दयोश्च वा अकारान्तादेशो भवतीत्यर्थः। यथा प्राप्तजीविकः। इत्यादि। पक्षे द्वितीया श्रितातीतेति सूत्रेण द्वितीयातत्पुरुषसमासोऽपि स्यात्।

**रूपसिद्धिः**

**प्राप्तजीविकः** - प्राप्तो जीविकामिति विग्रहे, प्राप्त सु जीविका अम् इत्यनयोः ''प्राप्तापन्ने च द्वितीयया'' इति समासे, सुपो लुकि, नियतविभक्तिकत्वाद् ''एक विभक्ति चापूर्वनिपाते'' इति जीविकाशब्दस्योपसर्जनत्वे, गोस्त्रियोरिति ह्रस्वे, परवल्लिङ्गमिति जीविकावत्स्त्रीलिङ्गे कृते, सौ, रुत्वे, विसर्गे, प्राप्तजीविक इति सिद्धम्।

**आपन्नजीविकः** - आपन्नो जीविकामिति विग्रहेऽपि पूर्ववत् सिद्धिः।

**अलंकुमारिः** - अलं कुमार्यै इति विग्रहे अलम्पूर्वेति निषेधाद् ज्ञापकाच्च चतुर्थीसमासे, सुब्लुकि, एकविभक्ति, इति उपसर्जनत्वे, गोस्त्रियोरिति कुमारीत्यस्य ह्रस्वे, स्वादिकार्ये, अलंकुमारिरिति सिद्धम्।

**निष्कौशाम्बिः** - अत्र कुगतिप्रादयः इति समासे, परवल्लिङ्गे प्राप्ते, द्विगुप्राप्तेति निषेधे, अतः विशेष्यवल्लिङ्गे कृते, स्वादिकार्ये, निष्कौशाम्बिरिति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

966. **अर्धर्चाः पुंसि च ( 2-4-31 ) ।।विधिसूत्रम् ।।**
अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः। अर्धर्चाः, अर्धर्चम् एवं ध्वज-तीर्थ-शरीर-मण्डप-यूप-देहाङ्कुश-पात्र-सूत्रादयः।
**( वा. ) सामान्ये नपुंसकम्।** मृदु पचति। प्रातः कमनीयम्।

---

966. **अर्धर्चाः पुंसि चेति**- अर्धर्चादयः शब्दाः पुंसि नपुंसके च भवन्तीत्यर्थ यथा अर्धर्चः, अर्धर्चम्।

**रूपसिद्धिः**

अर्धर्चः, अर्धर्चम्-ऋचः अर्धम् इति विग्रहे, ऋच् ङस् अर्थ सु इत्यनयोः अर्धं नपुंसकम् इति समासे, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, प्रथमानिर्दिष्टमिति अर्ध इत्यस्योपसर्जनसञ्ज्ञायाम्, उपसर्जनं पूर्वमिति पूर्वप्रयोगे, अर्ध ऋच् इति जाते, ऋक्पूरब्धुः - पथामानक्षेः इति अप्रत्यये, गुणे, रपरत्वे, अर्धर्च इत्यवस्थायाम् अर्धर्चाः पुंसि चेति पुंस्त्वे, सौ अर्धर्चः इति रूपं सिद्धम्।
**( वा. ) पुंल्लिङ्ग**- स्त्रीलिङ्गयोः विशेषेण न निर्देशः तत् सामान्यं, तस्मिन् सामान्ये नपुंसकलिङ्गः स्यादित्यर्थः। यथा मृदु पचति। प्रातः कमनीयम्।

**रूपसिद्धिः**

**मृदु पचति**- अत्र सामान्ये नपुंसकमिति वार्तिकेन मृदु इत्यत्र नपुंसकविधानाद् मृदु पचतीति सिद्धम्।
**प्रातः कमनीयम्**- अत्रापि सामान्ये नपुंसकत्वात् प्रातः कमनीयमिति रूपं भवतीति दिक्।

इति तत्पुरुषसमासः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ बहुव्रीहिसमासः

967. **शेषो बहुव्रीहिः ( 2-2-23 ) ।। अधिकारसूत्रम् ।।**
अधिकारोऽयं प्राग् द्वन्द्वात्।

968. **अनेकमन्यपदार्थे ( 2-2-24 ) ।।विधिसूत्रम् ।।**
अनेकं प्रथमान्तमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते, स बहुव्रीहिः।

969. **सप्तमी- विशेषणे बहुव्रीहौ ( 2-2-35 ) ।।विधिसूत्रम् ।।**
सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं स्यात्। अत एव ज्ञापकाद् व्यधिकरणपदो बहुव्रीहिः।

970. **हलदन्तात् सप्तम्याः सञ्ज्ञायाम् ( 6-3-9 ) ।।विधिसूत्रम् ।।**
हलन्ताद् अदन्ताच्च सप्तम्या अलुक्। कण्ठेकालः। प्राप्तम् उदकं यं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उद्धृतौदना स्थाली। पीताम्बरो हरिः। वीरपुरुषको ग्रामः।
**( वा. ) प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः।** प्रपतितपर्णः प्रपर्णः।
(वा.) **नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः।** अविद्यमानपुत्रः अपुत्रः।

---

967. **शेषो बहुव्रीहिरिति**– उक्तादन्यः शेषः। यत्र अन्यसमासेनोक्तः स प्रथमान्तः शेषः बहुव्रीहिसंज्ञकः स्यादित्यर्थः। अधिकारसूत्रमिदं द्वन्द्वं यावत्।

968. **अनेकमन्यपदार्थे इति**– शेष ग्रहणानुवृत्त्या प्रथमान्तमिति लभ्यते। अन्यपदार्थे इत्यनेन प्रथमार्थमेकं वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिः स्यादिति लभ्यते। अत आह अनेकं प्रथमान्तमिति।

969. **सप्तमी–विशेषणे इति**– बहुव्रीहिसमासे समस्तानां पदानामुपसर्जनत्वाद् अनियमे प्राप्ते नियमार्थमिदं सूत्रम्। सप्तम्यन्तं विशेषणं च बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यमित्यर्थः।
**अत एव ज्ञापकादिति**– अनेकमन्यपदार्थे इति सूत्रेण प्रथमान्तानामेव बहुव्रीहिर्विधीयते, अतो बहुव्रीहौ सप्तम्यन्त–पदस्यैव अभावात् सप्तमी विशेषणे इति सूत्रे सप्तम्यन्तस्य पूर्वप्रयोगः व्यर्थः। स एव व्यर्थीभूय ज्ञापयति यद् व्यधिकरणपदो बहुव्रीहिरपि क्वचिद् भवतीति दिक्।

970. **हलदन्तात् सप्तम्या इति**– हलन्ताद् अदन्ताच्च परस्य सप्तम्याः अलुग् भवति संज्ञायामित्यर्थः। यथा कण्ठेकालः।

### रूपसिद्धिः

**कण्ठेकालः** – कण्ठे कालो यस्येति विग्रहे, कण्ठ ङि काल सु इत्यलौककविग्रहे, ''अनेकमन्यपदार्थे'' इति समासे, प्रातिपदिकसंज्ञायां, सुपो लुकि प्राप्ते, ''हलदन्तादिति'' सप्तम्या अलुकि, सु इत्यस्य लुकि, सप्तमीविशेषणे कण्ठे इत्यस्य पूर्वप्रयोगे, एकदेशविकृतमनन्यवद् इति न्यायात् सौ, सस्य रुत्वे, विसर्गे च कृते, रूपं कण्ठेकालः इति सिद्धम्।

**प्राप्तोदको ग्रामः**– प्राप्तमुदकं यमिति विग्रहे, प्राप्त सु उदक सु इत्यलौकिकविग्रहे, ग्राम इत्यन्यपदार्थे अनेकमन्यपदार्थे इति समासे, सुपो लुकि, गुणे, स्वादिकार्ये, उक्तरूपं सिद्धम्।

**ऊढरथः** – ऊढो रथो येनेति विग्रहे, ऊढ सु रथ सु इत्यनयोः अनड्वान् इत्यन्यपदार्थे ''अनेक–मन्यपदार्थे'' इति समासे, सौ सिद्धम्।

**उपहृतपशुः** – उपहृतः पशुर्यस्मै इति विग्रहे, उपहृत सु पशु सु इत्यनयोः ''अनेकमन्यपदार्थे'' इति समासे, स्वादिकार्ये, उपहृतपशुः इति रूपं निष्पन्नम्।

**उद्धृतौदना**– उद्धृतः ओदनो यस्याः सा इति विग्रहे, उद्धृत सु इत्यनयोः ''अनेकमन्येति'' समासे, सुपो लुकि, वृद्धौ उद्धृतौदन इति दशायां स्त्रीत्वात् टापि, सवर्णदीर्घे, सौ, सुलोपे उक्तरूपं सिद्धम्।

**पीताम्बरः** – पीतम् अम्बरं यस्य स इति विग्रहे, पीत सु अम्बर सु इति अलौकिकविग्रहे, हरिरित्यन्यपदार्थे समासे, सुब्लुकि, सवर्ण दीर्घे, स्वादिकार्ये 'पीताम्बरः' इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

971. **स्त्रियाः पुवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी-प्रियादिषु ( 6-3-34 ) ।।विधिसूत्रम् ।।**

उक्तपुंस्काद् अनूङ् ऊङोऽभावोऽस्या इति बहुव्रीहि:, निपातनात् पञ्चम्या अलुक्, षष्ठ्याश्च लुक्। तुल्ये प्रवृत्तिनिमिते यदुक्तपुंस्कं तस्मात् पर ऊङोऽभावो यत्र तथा-भूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात्, समानाधिकरणे स्त्रीलिङ्गउत्तरपदे न तु पूरण्यां प्रियादौ च परत। ह्स्व:। चित्रगु:। रूपवद्भार्य:। अनूङ् किम्? वामोरूभार्य:।

972. **अप्पूरणीप्रमाण्यो: ( 5-4-116 ) ।।विधिसूत्रम् ।।**

पूरणार्थ- प्रत्ययान्तं यत् स्त्रीलिङ्गं, तदन्तात् प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात्। कल्याणी पञ्चमी यासां रात्रीणां, ता: कल्याणीपञ्चमा रात्रय:। स्त्रीप्रमाणी यस्य स स्त्रीप्रमाण:। अप्रियादिषु किम्? कल्याणीप्रिय: इत्यादि।

---

**वीरपुरुषक:**- वीरा: पुरुषा: यस्मिन् ग्रामे स इति विग्रहे, वीर जस् इत्यनयोरन्यपदार्थे समासे, प्रातिपदिकत्वात्सुपो लुकि, शेषाद् विभाषा इति कप्प्रत्ययेऽनुबन्धलोपे वीरपुरुषक इति जाते, स्वादिकार्ये, उक्तरूपं सिद्धम्।

**( वा. ) प्रादिभ्यो धातुजस्येति**- प्रादिभ्य: परस्य धातो: उत्पन्नस्य प्रथमासमर्थस्य प्रथमासमर्थेन सह समास: प्रादिभ्य: परस्य वा धातुजस्य च लोपोऽपि स्यादित्यर्थ:। यथा प्रपर्ण:।

**रूपसिद्धि:**

**प्रपर्ण:**- प्रपतितानि पर्णानि यस्मादिति विग्रहे, प्रपतित जस् पर्ण जस् इत्यलौकिकविग्रहे, प्रादिम्य इति समासे, पतित इत्युत्तरपदस्य च लोपे, सौ, प्रपर्ण: इति सिद्धम्। पक्षे उत्तरपदस्य लोपाभावे प्रपतिपर्ण इति सिद्ध्यति।

**( वा. ) नञोऽस्त्यर्थानामिति**- नञ: परेषाम् अस्त्यर्थवाचिनां सुबन्तानां बहव्रीहि: स्यात् अस्त्यर्थपदानाञ्च लोप: स्याद् विकल्पेनेत्यर्थ:। यथा अपुत्र:।

**रूपसिद्धि:**

**अपुत्र:**- न विद्यमान अविद्यमान: नञ्समास:। अविद्यमान: पुत्रो यस्य स इति विग्रहे, नञोऽस्त्यर्थानामिति समासे, विद्यमान इत्युत्तरपदस्य च लोपे, सुपो लुकि, विभक्तिकार्ये, अपुत्र इति रूपं साधु।

971. **स्त्रिया: पुंवदिति**- भाषितपुंस्कादनूङ: स्त्रीवाचकस्य पुंवद्भाव: स्यात्।

समानाधिकरणे उत्तरपदे स्त्रियां पूरणीप्रियादिभिन्ने च परे इत्यर्थ: यथा चित्रगु:। रूपवद्भार्य:।

**रूपसिद्धि:**

**चित्रगु:**- चित्रा गावो यस्येति विग्रहे, चित्रा जस् गो जस् इत्यनयोरनेकमन्यपदार्थे इति समासे, सुपो लुकि, सप्तमी विशेषणे इति सूत्रेण चित्रेत्यस्य पुर्वप्रयोगे, चित्रागो इति जाते स्त्रिया: पुंवद्भाषितेति चित्रा इत्यस्य पुंवद्भावे, गोस्त्रियोरिति गो इत्यस्य ह्स्वे, स्वादिकार्ये, चित्रगुरिति सिद्धम्।

**रूपवद्भार्य:**- रूपवती भार्या यस्येति विग्रहे, बहुव्रीहिसमासे, प्रातिपदिकत्वात् सुपो लुकि, स्त्रिया: पुंवदिति रूपवतीत्यस्य पुंवद्भावे, गोस्त्रियोरिति भार्या इत्यस्य ह्स्वे, विभक्तिकार्ये, रूपवद्भार्य इति रूपं निष्पद्यते।

**वामोरुभार्य:**- वामौ ऊरु यस्या इति विग्रहे, बहुव्रीहिसमासे, प्रातिपदिकत्वात् सुपो लुकि, स्त्रियाम् ऊङ्, वामोरूभार्या यस्येति लौकिकविग्रहे समासे कृते वामोरुभार्य: इति सिद्धम्। इह पूर्वपदे ऊङ्प्रत्ययोऽस्ति, अत: पुंवद्भावो न भवतीति।

972. **अप्पूरणीति**- बहुव्रीहौ सक्थ्यक्ष्णो: स्वाङ्गात् षच् (5-4-113) इत्यत: बहुव्रीहाविति अनुवर्तते। तत् पूरणी प्रमाणीभ्यां सह विशेष्यते अप् इति पृथक्पदम्। तदन्तविधिर्भवति। पूरणीति स्त्रीलिङ्गत्वनिर्देशात् पूरण प्रत्ययान्तं स्त्रीलिङ्गम् अत्र गृह्यते। अत: आह पूरणार्थ-प्रत्ययान्तमिति। यथा कल्याणीपञ्चमा रात्रय:।

**रूपसिद्धि:**

**कल्याणी-पञ्चमा:** - कल्याणी पञ्चमी यासां रात्रीणामिति विग्रहे, कल्याणी सु पञ्चमी सु इत्यनयो: समासे, प्रातिपदिकत्वात् सुपो लुकि, अप्पूरणीप्रमाण्योरिति अप्-प्रत्ययेऽनुबन्धलोपे, भसञ्ज्ञायां, यस्येति चेतीकारलोपे, रात्रे: विशेषणत्वात् कल्याणीपञ्चम इत्यस्माट्टापि, जसि उक्तं रूपं सिद्धम्। इह पञ्चमीत्यस्य पूरणप्रत्ययान्तत्वात् स्त्रिया: इति पुंवद्भावो न भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

973. **बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ( 5-4-113 ) ।। विधिसूत्रम् ।।**
स्वाङ्गवाचि-सक्थ्यक्ष्यन्ताद् बहुव्रीहेः षच् स्यात्। दीर्घसक्थः जलजाक्षी। स्वाङ्गात् किम्? दीर्घसक्थि शकटम्। स्थूलाक्षा वेणुयष्टि। अक्ष्णोऽदर्शनादिति वक्ष्यमाणोऽच्।

974. **द्वित्रिभ्यां ष मूर्ध्नः ( 5-4-115 ) ।। विधिसूत्रम् ।।**
आभ्यां मूर्ध्नः षः स्याद् बहुव्रीहौ। द्विमूर्धः। त्रिमूर्धः।

975. **अन्तर्बहिर्भ्यां च लोम्नः ( 5-4-117 ) ।। विधिसूत्रम् ।।**
आभ्यां लोम्नोऽप् स्याद् बहुव्रीहौ। अन्तर्लोमः बहिर्लोमः।

976. **पादस्य लोपोऽहस्त्यादिभ्यः ( 5-4-138 ) ।। विधिसूत्रम् ।।**
हस्त्यादिवर्जितादुपमानात् परस्य पादस्य लोप स्याद् बहुव्रीहौ। व्याघ्रस्येव पादावस्य व्याघ्रपात्। अहस्त्यादिभ्यः किम्? हस्तिपादः कुसूलपादः।

---

**स्त्रीप्रमाणः**:- स्त्री प्रमाणी यस्येति विग्रहे, स्त्री सु प्रमाणी सु इत्यलौकिकविग्रहे, समासे, स्त्रीशब्दस्य नित्यस्त्रीलिङ्गत्वाद् भाषितपुंस्काभावाद् न पुंवद्भावः, अप्प्रत्यये, भत्वादीकारलोपे, स्वादिकार्ये, स्त्रीप्रमाण इति सिद्धम्।

**कल्याणीप्रियः** - कल्याणी प्रिया यस्येति विग्रहे बहुव्रीहिसमासे, प्रियादौ परे कल्याण्याः न पुंवद्भावे, स्वादिकार्ये कल्याणीप्रिय इति रूपं साधु।

973. **बहुव्रीहौ सक्थ्यक्ष्णोरिति**- अत्र पञ्चम्यर्थे सप्तमी। स्वाङ्गवाचिनः सक्थ्यन्ताद् अक्ष्यन्ताच्च बहुव्रीहेः समासान्तः षच्प्रत्ययो भवतीत्यर्थः यथा दीर्घसक्थः इत्यादि।

**रूपसिद्धिः**

**दीर्घसक्थः** - दीर्घे सक्थिनी यस्य इति विग्रहे, दीर्घ औ सक्थि औ इत्यलौकिकविग्रहे, समासे, प्रातिपदिकत्वात् सुपो लुकि, बहुव्रीहौ सक्थक्ष्णोरिति षच्प्रत्ययेऽनुबन्धलोपे, भसञ्ज्ञायां टेरिकारलोपे, सौ, सोः रुत्वे, विसर्गे उक्तरूपं साधु।

**जलजाक्षी**- जलजे इव अक्षिणी यस्या इति विग्रहे, जलज औ अक्षि औ इत्यनयोरनेकमन्यपदार्थे इति समासे, प्रातिपदिकत्वात् सुपो लुकि, समासान्त-षच्प्रत्ययेऽनुबन्धलोपे, भत्वाट्टिलोपे, सवर्णदीर्घे जलजाक्ष इति जाते, षिद्गौरादिभ्यश्चेति ङीषि, यस्येति चेत्यकारलोपे सौ रूपं साधु।

**दीर्घसक्थि शकटम्**- दीर्घे सक्थिनी यस्येति विग्रहे, अत्र सक्थिशब्दस्य स्वाङ्गाभावात् षच्प्रत्ययाभावे, रूपं सिद्ध्यति।

**स्थूलाक्षा वेणुयष्टिः** - स्थूलानि अक्षीणि = पर्वग्रन्थयो यस्या इति विग्रहे, समासे, अक्ष्णोऽदर्शनादिति अचि, टिलोपे, टापि, दीर्घे, स्वादिकार्ये स्वाङ्गाभावात् षच्प्रत्ययाभावे रूपं सिद्ध्यति।

974. **द्वित्रिभ्यामिति**- द्वि त्रि इत्याभ्यां मूर्धन् इत्यस्य षप्रत्ययो भवति बहुव्रीहावित्यर्थः। यथा-द्विमूर्धः। त्रिमूर्धः।

**रूपसिद्धिः**

**द्विमूर्धः** - द्वौ मूर्धानौ यस्येति विग्रहे, द्वि औ मूर्धन् औ इत्यलौकिकविग्रहे, ''अनेकमन्यपदार्थे'' इति समासे, सुब्लुकि, द्वित्रिम्यामिति षप्रत्ययेऽनुबन्धलोपे, भत्वान्नस्तद्धिते इति टिलोपे, सौ, द्विमूर्धः इति रूपं निष्पन्नम्।

**त्रिमूर्धः** - त्रयो मुर्धानो यस्येति विग्रहे, समासे, सुपो लुकि, षप्रत्यये टिलोपे, स्वादिकार्ये त्रिमूर्धः इति रूपं सिद्धम्।

975. **अन्तर्बहिर्भ्यामिति**- अन्तर् बहिस् इत्याभ्यां परो यो लोमन्शब्दः तदन्ताद् बहुव्रीहेरप् स्यादित्यर्थः। यथा अन्तर्लोमः। बहिर्लोमः।

**रूपसिद्धिः**

**अन्तर्लोमः** - अन्तः लोमानि यस्येति विग्रहे बहुव्रीहिसमासे अन्तर्बहिर्भ्या ञ्चेति अप्प्रत्ययेऽनुबन्धलोपे, भत्वाट्टेरनो लोपे, सौ उक्तरूपं साधु।

**बहिर्लोमः** - बहिः लोमानि यस्येति विग्रहे, समासे, अप्प्रत्यये, टिलोपे, स्वादिकार्ये बहिर्लोमः इति रूपं सिद्धम्।

976. **पादस्य लोप इति**- उपमानाच्च इत्यस्माद् उपमानादित्यनुवर्तते। समासान्त इत्यपि ज्ञेयम्। अत आह हस्त्यादिवर्जितादिति। यथा व्याघ्रपात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

977. **संख्या-सु-पूर्वस्य ( 5-4-140 ) ।।विधिसूत्रम् ।।**
पादस्य लोपः स्यात् समासान्तो बहुव्रीहौ। द्विपात्। सुपात्।

978. **उद्विभ्यां काकुदस्य ( 5-4-148 ) ।।विधिसूत्रम् ।।**
लोपः स्यात्। उत्काकुत्। विकाकुत्।

979. **पूर्णाद् विभाषा ( 5-4-149 ) ।।विधिसूत्रम् ।।**
पूर्णकाकुत् पूर्णकाकुदः।

980. **सुहृद्-दुर्हृदौ मित्रामित्रयोः ( 5-4-150 ) ।।विधिसूत्रम् ।।**
सु-दुर्भ्यां हृदयस्य हृद्भावो निपात्यते। सुहृद् मित्रम्। दुर्हृद् अमित्रः।

981. **उरः प्रभृतिभ्यः कप् ( 5-4-151 ) ।।विधिसूत्रम् ।।**

---

**व्याघ्रपात्**- व्याघ्रपादौ इव पादौ यस्येति विग्रहे, सप्तम्युपमान-पूर्वपदस्योत्तर-पदलोपश्चेति समासे, उत्तरपदस्य लोपे च कृते व्याघ्रपाद इति जाते पादस्य लोप इत्यकारलोपे स्वादिकार्ये व्याघ्रपादिति रूपं सिद्धम्।

**हस्तिपादः** - हस्त्यादिभिन्नात् परस्यैव पादस्य लोपः स्याद्, अत इह लोपो न भवति, तस्माद् हस्तिपादौ इव पादौ यस्येति विग्रहे, समासे, उत्तरपदलोपे सौ रूपं साधु।

**कुसूलपादः** - कुसूलस्य पादौ इव पादौ यस्येति विग्रहे, समासे, उत्तरपदलोपे, पादस्य लोपाभावात् सौ, कुसूलपाद इति रूपं सिद्ध्यति।

977. **संख्या-सु-पूर्वस्येति**- संख्यापूर्वस्य सुपूर्वस्य च पादस्य लोपो भवति समासान्तो बहुव्रीहिसमासे इत्यर्थः। यथा द्विपात्। सुपात्।

**रूपसिद्धिः**

**द्विपात्**- द्वौ पादौ यस्येति विग्रहे, समासे, सुपो लुकि, संख्यासुपूर्वस्येति पादान्त्यस्य लोपे, चर्त्वे, स्वादिकार्ये, द्विपादिति साधु।

**सुपात्** - **सु ( शोभनौ )** पादौ यस्य इति विग्रहे, समासे, सुपोलुकि, संख्यासुपूर्वस्य इति पादान्त्यस्य लोपे, चर्त्वे, स्वादिकार्ये, सुपादिति

978. **उद्विभ्यां काकुदस्येति**- एताभ्यां परस्य काकुदान्त्यस्य लोपः स्याद् बहुव्रीहावित्यर्थः। यथा- उत्काकुत्। विकाकुत्।

**रूपसिद्धिः**

**उत्काकुत्**- उन्नतं काकुदं यस्येति विग्रहे, उन्नत सु काकुद सु इत्य लौकिकविग्रहे, प्रादिभ्यो धातुजस्येति समासे, नतस्य लोपे, उद्विभ्यामिति काकुदान्त्यस्य लोपे, स्वादिकार्ये, चर्त्वे, उत्काकुदिति साधु।

**विकाकुत्**- विगतं काकुदं यस्येति विग्रहे, समासे, सुपो लुकि, उद्विभ्यामिति काकुदान्त्यस्य लोपे, विभिक्तिकार्ये, चर्त्वे च कृते 'विकाकुत्' इति रूपं सिद्धम्।

979. **पूर्णाद् विभाषेति**- पूर्णात् परस्य काकुदान्त्यस्य लोपो वा भवतीत्यर्थः। यथा पूर्णकाकुत् पूर्णकाकुदः।

**रूपसिद्धिः**

**पूर्णकाकुत्, पूर्णकाकुदः** - पूर्णं काकुदं यस्येति विग्रहे, समासे, प्रातिपदिकत्वात् सुपो लुकि, पूर्णाद् विभाषेति काकुदान्त्यस्य विकल्पेन लोपे, सौ सोर्लोपे, वाऽवसाने इति चर्त्वे, पूर्णकाकुत् इति सिद्धम्। पक्षे काकुदान्त्यस्य लोपाभावे, पूर्णकाकुद इति रूपं सिद्धम्।

980. **सुहृद्-दुर्हृदाविति**- मित्रे अमित्रे चार्थे एतौ शब्दौ निपात्येते। अर्थात् सु-दुर्भ्यां परस्य हृदयस्य हृद् इत्यादेशः स्यादित्यर्थः। यथा-सुहृद्। दुर्हृद्।

**रूपसिद्धिः**

**सुहृद्**- सु शोभनं हृदयं यस्येति विग्रहे सुहृद् इति सिद्धम्।

**दुर्हृद्**- दुष्टं हृदयं यस्येति विग्रहे हृदयस्य हृदादेशे निपाते स्वादिकार्ये दुर्हृद् इति रूपं सिद्धम्।

981. **उरः प्रभृतिभ्य इति**- उरस् इत्यादिभ्यः समासान्त-कप्प्रत्ययो भवति बहुव्रीहावित्यर्थः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

982. **कस्कादिषु च ( 8-3-48 ) ।। विधिसूत्रम् ।।**
एष्विण उत्तरस्य विसर्गस्य षः। अन्यस्य तु सः।
इति सः, व्यूढोरस्कः। प्रियसर्पिष्कः।

983. **निष्ठा ( 2-2-36 ) ।। विधिसूत्रम् ।।**
निष्ठान्तं बहुव्रीहौ पूर्वं स्यात्। युक्तयोगः।

984. **शेषाद् विभाषा ( 5-4-154 ) ।। विधिसूत्रम् ।।**
अनुक्त-समासान्ताद् बहुव्रीहेः कब् वा।
महायशस्कः, महायशाः।

---

इति बहुव्रीहिसमासः।

982. **कस्कादिष्विति**- कस्कादिगणपठित-शब्देषु इण विसर्गस्य षः स्याद् भिन्नस्य तु सः स्यादित्यर्थः। यथा-व्यूढोरस्कः।

**रूपसिद्धिः**

**व्यूढोरस्कः** - व्यूढम् उरो यस्येति विग्रहे, व्यूढ सु उरस् सु इत्यनयोः समासे, प्रातिपदिकत्वात् सुपो लुकि, आद्गुणः इति गुणे, व्यढोरस् इत्यस्माद् उरः प्रभृतिभ्यः कप् इति प्रत्यययेऽनुबन्धलोपे, सस्य रुत्वे विसर्गे च कृते ''सोऽपदादौ'' इति विसर्गस्य सत्वे, स्वादिकार्ये व्यूढोरस्कः इति सिद्धम्। अत्र इण उत्तराद् विसर्गाद् भिन्नत्वात् कस्कादिषु चेत्यनेन षो न भवतीति।

**प्रियसर्पिष्कः** - प्रियं सर्पिः यस्येति विग्रहे समासे, प्रातिपदिकत्वात् सुपो धात्विति सुपो लुकि, उरः प्रभृतिभ्यः कप् इति कप्प्रत्ययेऽनुबन्धलोपे, इणः षः इति सस्य षत्वे, स्वादिकार्ये प्रियसर्पिष्क इति रूपं सिद्धम्।

983. **निष्ठेति**- क्त-क्तवतू निष्ठा इति गृह्यते। प्रत्ययग्रहणे तदन्ता ग्राह्याः इति विधानाद् निष्ठान्तमित्यर्थः। बहुव्रीहिसमासे निष्ठान्तं प्राक् प्रयोक्तव्यमित्याशयः। यथा युक्तयोगः।

**रूपसिद्धिः**

**युक्तयोगः**- युक्तो योगो येन यस्य वेति विग्रहे, बहुव्रीहिसमासे, प्रातिपदिकत्वात् सुपो लुकि, युक्त इत्यस्य निष्ठा इत्यनेन पूर्वप्रयोगे, सौ, युक्तयोगः इति रूपं साधु।

984. **शेषाद् विभाषेति**- इतः पूर्वं येभ्यः समासान्तप्रत्ययाः उक्ताः तेभ्योऽन्यः शेषः, तस्माद् विकल्पेन कप्प्रत्ययो भवतीत्यर्थः। यथा महायशस्कः, महायशाः।

**रूपसिद्धिः**

**महायशस्कः, महायशाः**- महद् यशो यस्येति विग्रहे, समासे, कृत्तद्धितसमासाश्चेति प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, महत् यशस् इति जाते आन्महतः इति महतः तस्य आत्त्वे सवर्णदीर्घे शेषाद्विभाषेति विकल्पेन कप्-प्रत्ययेऽनुबन्धलोपे, सौ, सुलोपे सस्य च रुत्वे महायशस्कः इति सिद्ध्यति। पक्षे कप्प्रत्ययाभावे महायशस् इत्यतः सौ उपधादीर्घे सुलोपे, सस्य रुत्वे, विसर्गे, महायशाः इति रूपं सिद्धम्।

इति बहुव्रीहिसमासः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ द्वन्द्वसमासः

985. **चार्थे द्वन्द्वः ( 2-2-29 ) ।। विधिसूत्रम् ।।**
अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते। सः द्वन्द्वः।
समुच्चयाऽन्वाचयेतरेतरयोगसमाहारश्चार्थाः। तत्र ईश्वरं गुरुं च भजस्वेति परस्परनिरपेक्षस्य अनेकस्यैक-स्मिन्नन्वयः समुच्चयः।
भिक्षामट गां चानयेत्यन्यतरस्यानुषङ्गिकत्वेनान्वयोऽन्वाचयः। अनयोरसामर्थ्यात् समासो न। धवखदिरौ छिन्धि इति मिलितानामन्वय इतरेतरयोगः। संज्ञा-परिभाषमिति समूहः समाहारः।

986. **राजदन्तादिषु परम् ( 2-2-31 ) ।। विधिसूत्रम् ।।**
एषु पूर्वप्रयोगार्हं परं स्यात्। दन्तानां राजा राजदन्तः। **धर्मादिष्वनियमः** (वार्तिकः) अर्थधर्मौ। धर्मार्थावित्यादि।

---

985. **चार्थे द्वन्द्व इति**- ''चार्थे द्वन्द्व'' इत्यस्मिन् सूत्रे ''सुबामन्त्रिते'' इति सूत्रात् सुब् इत्यस्य ''अनेकमन्यपदार्थे'' इति सूत्राच्च 'अनेकम्' इत्यस्यानुवृत्तिः समायाति। अत्र समासस्य विभाषायाश्च अधिकारो वर्तते। एवमनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते इति भवति सूत्रार्थः।
''चार्थे द्वन्द्वः'' इत्यस्मिन् सूत्रे चकारस्यार्थाः वर्तन्ते चत्वारः-प्रथमस्तावत् समुच्चयः, द्वितीयः-अन्वाचयः, तृतीयः-इतरेतरः, चतुर्थः-समाहारः। परस्परनिरपेक्षितानामनेकपदार्थानामेकस्मिन् पदार्थेऽन्वयः समुच्चयो भवतिः। यत्र समुच्चीयमानपदार्थेषु एकस्यानुषङ्गिकतया गौणरूपेणान्वयो भवेत् तत्र भवति अन्वाचयः। ईश्वरं गुरुं च भजस्व इत्यस्मिन् चान्वयद्वन्द्वे समासो न भवति असामर्थ्यात्। इतरस्येतरेण योगः अन्वयः इतरेतरयोगः अर्थाद् मिलितानामन्वयः। यथा धवश्च खदिरश्चेति धवखदिरौ। समूहस्यार्थः भवति समाहारः यथा संज्ञा च परिभाषा च तयोः समाहारः = समूहः इति संज्ञापरिभाषम्।

**रूपसिद्धिः**

**धवखदिरौ छिन्धि**- इत्यत्र धवश्च इति लौकिकविग्रहे धव सु खदिर सु इत्यलौकिकविग्रहे ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे, समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, धवखदिर इति दशायाम्, एकदेशविकृतमनन्यवत् इति न्यायेन प्रातिपदिकत्वात् प्रथमा-द्विवचने औप्रत्यये, ''वृद्धिरेचि'' इति सूत्रेण वृद्धौ, धवखदिरौ इति रूपं निष्पन्नम्।
**सञ्ज्ञापरिभाषम्**- संज्ञा च परिभाषा च इति लौकिकविग्रहे संज्ञा सु परिभाषा +सु इत्यलौकिकविग्रहे ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, ''एकदेशविकृतमनन्यवत्'' इति न्यायेन प्रथमैकवचने, सुप्रत्यये, सञ्ज्ञापरिभाषा +सु इति दशायां, ''स नपुंसकम्'' इति सूत्रेण नपुंसकत्वादिकार्ये सञ्ज्ञापरिभाषमिति रूपं निष्पन्नम्।

986. **राजदन्तादिष्वति**- राजदन्तादिषु परम् इति सूत्रेण राजदन्तादिगणपठितशब्देषु पूर्वप्रयोगार्हपदस्य परप्रयोगोः भवति। यथा-दन्तानां राजा राजदन्त इति सूत्राशयः।

**रूपसिद्धिः**

**राजदन्तः** - दन्तानां राजा इति लौकिविग्रहे, दन्त + आम् राजन् + सु इत्यलौकिकविग्रहे ''षष्ठी'' इति सूत्रेण समासे समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, एकदेशविकृत मनन्यत्वात् सुप्रत्ययेऽनुबन्धलोपे, दन्तराजन् + स् इति दशायां, सलोपे नलोपे च कृते, दन्त राज इति जाते, उपसर्जनसञ्ज्ञकत्वात् दन्तशब्दस्य पूर्वप्रयोगे प्राप्ते परं ''राजदन्तादिषु परम्'' इति सुत्रेण राजपदस्य पूर्व-निपाते, राजदन्त इति जाते, पुनः स्वादिकार्ये राजदन्तः इति रूपं निष्पन्नम्।
**धर्मादिष्विति वार्तिकार्थः**- धर्मादिविषये पूर्वप्रयोगविषयकः परप्रयोगविषयको वा नास्ति नियमः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

987. **द्वन्द्वे घि ( 2-2-32 ) ।।विधिसूत्रम् ।।**
द्वन्द्वे घिसञ्ज्ञं पूर्वं स्यात्। हरिश्च हरश्च हरिहरौ।
988. **अजाद्यदन्तम् ( 2-2-33 ) ।।विधिसूत्रम् ।।**
इद्र द्वन्द्वे पूर्वं स्यात् ईशकृष्णौ।
989. **अल्पाच्तरम् ( 2-2-34 ) ।।विधिसूत्रम् ।।**
शिवकेशवौ।
990. **पिता मात्रा ( 1-2-70 ) ।।विधिसूत्रम् ।।**
मात्रा सहोक्तो पिता वा शिष्यते। माता च पिता च पितरौ। मातापितरौ वा।
991. **द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ( 2-4-2 ) ।।विधिसूत्रम् ।।**
एषां द्वन्द्व एकवत्। पाणिपादम्। मार्दङ्गिक-वैणविकम्। रथिकाश्वारोहम्।
992. **द्वन्द्वाच्चुदषहान्तात् समाहारे ( 5-4-106 ) ।।विधिसूत्रम् ।।**
चवर्गान्ताद्षहान्ताच्च द्वन्द्वाट्टच् स्यात् समाहारे। वाक् च त्वक् च वाक्त्वचम्। त्वक्स्रजम्। शमीदृषदम्। वाक्त्विषम्। छत्रोपानहम्। समाहारे किम्? प्रावृट्शरदौ।

---

987. **द्वन्दे घीति**– द्वन्द्वसमासे घिसञ्ज्ञकस्य शब्दस्य पूर्वप्रयोगो भवतीति सूत्रार्थः। यथा हरिहरौ।
**हरिहरौ**– हरिश्च हरश्चेति लौकिकविग्रहे, हरि + सु, हर + सु इत्यलौकिकविग्रहे, ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे, समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, हरिहर इति जाते ''शेषो घ्यसखि'' इति सूत्रेण हरिशब्दस्य घिसञ्ज्ञायां ''द्वन्द्वे घि'' इति सूत्रेण घिसञ्ज्ञकस्य पूर्वप्रयोगे, प्रथमाद्विवचने हरिहरौ इति रूपस्य निष्पत्तिर्जायते। एवमेव ''अजाद्यदन्तमिति'' सूत्रेण ईशशब्दस्य पूर्वप्रयोगे कृते सति **ईशकृष्णौ** इति रूपस्य सिद्धिर्जायते। तथा च ''अल्पाच्तरम्'' इति सूत्रेण शिवशब्दस्य पूर्वप्रयोगे कृते **शिवकेशवौ** इति रूपं निष्पन्नम्।
988. **अजाद्यदन्तमिति**– द्वन्द्वे अजाद्यदन्तं पूर्वं प्रयोज्यम्। यथा–ईशकृष्णौ।
989. **अल्पाच्तरमिति**– द्वन्द्वसमासे अल्पाच्शब्दस्य पूर्वप्रयोगः स्यादिति सूत्रार्थः। यथा – शिवकेशवौ।
990. **पिता मात्रेति**– मातृशब्देन सहोक्तः पितृशब्दः विकल्पेन शिष्यते। यथा माता च पिता च पितरौ वा।

**रूपसिद्धिः**

**पितरौ मातापितरौ**– अत्र माता च पिता चेति लौकिकविग्रहे, मातृ + सु पितृ + सु इत्यलौकिकविग्रहे, ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, ''पिता मात्रा'' इति सूत्रेण मातृशब्दस्य लोपे, प्रातिपदिकत्वात् प्रथमाद्विवचने औप्रत्यये, पितृ + औ इति जाते ''ऋतो ङि सर्वनामस्थानयोः'' इति सूत्रेण ऋकारस्य गुणे, रपरत्वे, पितरौ इति जाते, विकल्पपक्षे ''आनङ् ऋतो द्वन्द्वे'' इति सूत्रेण मातृ इत्यत्र ऋकारस्य आनङादेशे अनुबन्धलोपे ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नकारलोपे, विभक्ति- सम्बन्धिकार्ये मातापितरौ इति रूपं निष्पन्नम्।
991. **द्वन्द्वश्चेति**– प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानां द्वन्द्वे एकवत् स्यादिति सूत्रार्थः।
**पाणिपादम्**– पाणी च पादौ च, तयोः समाहारः इति विग्रहे पाणि + पाद + औ इत्यलौकिकविग्रहे ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे समासत्वात् प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, पाणिपाद इति जाते ''द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्'' इति सूत्रेण एकवद्भावे ''स नपुंसकम्'' इति सूत्रेण नपुंसकलिङ्गे कृते, प्रथममैकवचने, पाणिपादम् इति रूपं निष्पन्नं भवति। एवमेव मार्दङ्गिकश्च वैणविकश्च, तयोः समाहारः इत्यस्मिन् विग्रहे मार्दङ्गिक-वैणविकम् इति रूपस्य, एवं च रथिकाश्च अश्वारोहाश्च एषां समाहारः इत्यस्मिन् विग्रहे रथिकाश्वारोहम् इति प्रयोगस्य निष्पत्तिर्जायते।
992. **द्वन्द्वादिति**– चवर्गान्ताद् दकारान्ताद् षकारान्ताद् हकारान्ताद् द्वन्द्वाट्टच् स्यात् समाहारे, इति सूत्रार्थः। यथा–वाक् च त्वक् चेति वाक्त्वचमादयः।
**वाक्त्वचम्**– वाक् च त्वक् चेति विग्रहे ''चार्थे द्वन्द्वः'' इति सूत्रेण समासे समासत्वात् प्रातिपदिकसञ्ज्ञायां सुपो लुकि अत्र चर्गान्तत्वाद् ''द्वन्द्वाच्चुदषहान्तात्समाहारे'' इति सूत्रेण समासान्त-टच्प्रत्ययेऽनुबन्धलोपे वाच् त्वच् + अ इति जाते ''चोः कुः'' इति सूत्रेण वाच् इत्यत्र चकारस्य स्थाने ककारे, नपुंसकलिङ्गे, एकवचने, वाक्त्वचम् इति रूपं निष्पन्नम्। एवमेव अन्यानि रूपाणि निष्पन्नानि भवन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अथ समासान्तः।**

993. **ऋक्पूरब्धूः पथामानक्षे ( 5-4-74 ) ।। विधिसूत्रम् ।।**
अ अनक्षे इतिच्छेदः। ऋगाद्यन्तस्य समासस्य अप्रत्ययोऽन्तावयवः स्यादक्षे या धूस्तदन्तस्य तु न। अर्धर्चः। विष्णुपुरम्। विमलापं सरः। राजधुरा। अक्षे तु अक्षधूः। दृढधूरक्षः। सखिपथः। रम्यपथो देशः।

994. **अक्ष्णोऽदर्शनात् ( 5-4-76 ) ।। विधिसूत्रम् ।।**
अचक्षुः पर्यायादक्ष्णोऽच् स्यात् समासान्तः। गवामक्षीव गवाक्षः।

995. **उपसर्गादध्वनः ( 5-4-85 ) ।। विधिसूत्रम् ।।**
प्रगतोऽध्वानं प्राध्वो रथः।

996. **न पूजनात् ( 5-4-69 )**
पूजनार्थात् परेभ्यः समासान्ताः न स्युः।
(वा.) **स्वस्तिभ्यामेव।** सुराजा। अतिराजा।

इति समासान्ताः।

इति समासप्रकरणम्।

---

993. **ऋक्पूरिति**- ऋक् च पूश्च आपश्च धूश्च पन्थाश्च तेषाम् इति ऋक्पूरब्धूःपथाम् अत्र द्वन्द्वसमासः। अ अनक्षे इत्यत्र अ इति लुप्तप्रथमान्तम्। समासान्ताः इत्यस्य अधिकारः अत्र समायाति। अतः **ऋच् पुर् अप् धुर् पथिन् अन्तस्य समासस्य अप्रत्ययोऽन्तावयवः स्यात्। अक्षे या धूस्तदन्तस्य तु न इति सूत्रार्थः।**

**रूपसिद्धिः**

**अर्धर्चः**- इत्यत्र ऋचः अर्धमिति लौकिकविग्रहे ऋच् + ङस् अर्ध + सु इत्यलौकिकविग्रहे ''अर्धं नपुंसकम्'' इति सूत्रेण समासे ''ऋक्पूरब्धूःपथामानक्षे'' इति सूत्रेण समासान्त अ-प्रत्यये, अर्ध इत्यस्योपसर्जनसञ्ज्ञायां पूर्व प्रयोगे, प्रातिपदिकसञ्ज्ञायां सुपो लुकि, अर्ध ऋच् + अ इति जाते ''आद्गुणः'' इति सूत्रेण गुणे, रपरत्वे ''अर्धर्चादयः पुंसि'' इति सूत्रेण पुंस्त्वे स्वादिकार्ये अर्धर्चः इति रूपं निष्पन्नम्।

एवमेव विष्णोः पूः इत्यस्मिन् विग्रहे षष्ठीतत्पुरुषसमासे प्रकृतसूत्रेण समासान्त अ-प्रत्यये नपुंसकलिङ्गे प्रथमैकवचने विष्णुपुरम् आदीनि रूपाणि निष्पन्नानि भवन्ति।

994. **अक्ष्णोऽदर्शनादिति**- दृश्यते अनेन इति दर्शनं चक्षुः। न दर्शनम् अदर्शनम् अर्थाद् अचक्षुवाचकः। अतः अचक्षुपर्यायादक्ष्णोऽच् स्यात् समासान्तः।

995. **उपसर्गादिति**- उपसर्गपूर्वकाद् अध्वन्शब्दात् समासान्तः अच्प्रत्ययः स्यादिति सूत्रार्थः। यथा- प्रगतोऽध्वानं प्राध्वो रथः।

996. **न पूजनादिति**- पूजनार्थकशब्दात् परे यो शब्दः तदन्तात् समासान्तप्रत्ययः न स्यादिति सूत्रार्थः। यथा-सुराजा।

**रूपसिद्धिः**

**गवाक्षः** - गवाम् अक्षीव इति विग्रहे षष्ठीतत्पुरुषसमासे ''अक्ष्णोऽदर्शनात्'' इति सूत्रेण अच्प्रत्यये, प्रातिपदिकसञ्ज्ञायां, सुपो लुकि, गो अक्षि + अ इति दशायां, भसञ्ज्ञायां, ''यस्येति च'' इति सूत्रेण इकारलोपे ''अवङ् स्फोटायनस्य'' इति सूत्रेण ओ इत्यस्य स्थाने अवङादेशे, अनुबन्धलोपे, सवर्णदीर्घे, स्वादिकार्ये, गवाक्षः इति रूपं निष्पन्नम्।

**प्राध्वः** - प्रगतः अध्वानमिति विग्रहे सु अध्वन् सु इत्यनयोः अत्यादयः क्रान्ताद्यर्थे. इति वार्तिकेन समासे, प्रातिपदिकत्वात् सुपो लुकि, ''उपसर्गादध्वनः'' इति अच्प्रत्ययेऽनुबन्धलोपे, भसञ्ज्ञायां ''नस्तद्धिते'' इति टिलोपे, सवर्णदीर्घे सौ प्राध्वः इति रूपं निष्पद्यते।

**सुराजा**- सु शोभनो राजा इति विग्रहे सु राजन् + सु इत्यत्र ''कुगतिप्रादयः'' इति सूत्रेण समासे समासत्वात् प्रातिपदिकसञ्ज्ञायां सुपो लुकि ''राजाहस्सखिभ्यष्टच्'' इति सूत्रेण टच्प्रत्यये प्राप्ते ''न पूजनात्'' इति सूत्रेण निषेधे स्वादिकार्ये सुराजा. इति रूपं सिद्धम्। एवमेव अति = पूज्यः राजा ''अतिराजा'' इति रूपस्य निष्पतिर्भवति।

इति समासान्ताः।

इति समासप्रकरणम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासार्थप्रश्नाः

### वस्तुनिष्ठप्रश्नाः-

1. समासः भवति –
   (क) पञ्चधा (ख) चतुर्धा
   (ग) द्विधा (घ) त्रिधा
2. उपसर्जनसंज्ञा भवति –
   (क) पञ्चमीनिर्दिष्टस्य पदस्य (ख) प्रथमानिर्दिष्टस्य पदस्य
   (ग) सप्तमीनिर्दिष्टपदस्य (घ) द्वितीयानिर्दिष्टपदस्य
3. उपराजमित्यत्र येन सूत्रेण टच्प्रत्ययो भवति, तत् सूत्रमस्ति –
   (क) अव्ययीभावे शरत्प्रभुतिभ्यः (ख) अनश्च
   (ग) नपुंसकादन्यतरस्याम् (घ) झयः
4. ''हरित्रातः'' इत्यत्र येन सूत्रेण समासः भवति, तत् सूत्रमस्ति –
   (क) कर्तृकरणे कृता बहुतम् (ख) तृतीया तत्कृतार्थेन गुणवचनेन
   (ग) षष्ठी (घ) पञ्चमी भयेन
5. 'विशेषणं विशेष्येण बहुलम्' इति सूत्रेण यस्मिन् प्रयोगे समासः भवति सः प्रयोगः अस्ति –
   (क) घनश्यामः (ख) पञ्चगवम्
   (ग) नीलोत्पलम् (घ) शाकप्रियः
6. 'अब्राह्मणः' इत्यत्र समासः अस्ति –
   (क) नञ्तत्पुरुषः (ख) अव्ययीभावः
   (ग) द्वन्द्वः (घ) बहुव्रीहिः
7. 'चार्थे द्वन्द्वः' इत्यस्मिन् सूत्रे चकारस्यार्थाः भवन्ति –
   (क) चत्वारः (ख) त्रयः
   (ग) पञ्च (घ) सप्त
8. 'व्यूढोरस्कः' इत्यत्र समासः भवति –
   (क) तत्पुरुषः (ख) द्वन्द्वः
   (ग) अव्ययीभावः (घ) बहुव्रीहिः
9. त्रिमूर्धः इत्यत्र षप्रत्ययः येन सूत्रेण भवति, तत् सूत्रमस्ति –
   (क) द्वित्रिभ्यां ष मूर्ध्नः (ख) अन्तर्बहिर्भ्या च लोम्नः
   (ग) उद्विभ्यां काकुदस्य (घ) सोऽपदादौ
10. शिवकेशवौ इत्यत्र येन सूत्रेण शिवशब्दस्य पूर्वप्रयोगः भवति, तत् सूत्रमस्ति –
   (क) अजाद्यदन्तम् (ख) अल्पाच्तरम्
   (ग) द्वन्द्वे घि (घ) राजदन्तादिषु परम्

### लघुत्तरात्मकप्रश्नाः –

11. अव्ययं विभक्तीत्यादि सूत्रं पूरयत।
12. ''प्रथमानिर्दिष्टं समास उपसर्जनम्'' इति सूत्रस्यार्थं स्पष्टयत।
13. तृतीया तत्कृतार्थेन गुणवचनेन इति सूत्रस्यार्थं विलिख्योदाहरणमपि लेख्यम्।
14. अव्ययं विभक्तीत्यादिसूत्रस्योदाहरणानि लेख्यानि।
15. 'तत्पुरुषः समानाधिकरणः कर्मधारयः' इति सूत्रस्यार्थं स्पष्टयत।
16. द्वियमुनम् इत्यत्र समासः केन सूत्रेण भवति?
17. कृष्णश्रितः इत्यत्र समासविधायकं सूत्रं लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

18. भूतबलिः इत्यत्र समासः केन सूत्रेण? लिखत।
19. चोरभयम् इत्यत्र विग्रहपदं विलिख्य समाससूत्रं लिखत।
20. पूर्वापरेत्यादिसूत्रेण विधीयमानः समासः कस्यापवादः?
21. संख्यापूर्वः समासो भवति –
22. भेदकं भेद्येन समासः केन सूत्रेण भवति?
23. 'प्राचार्यः' इत्यत्र केन समासः?
24. 'कुम्भकारः' इत्यत्र कः समासः केन च भवति?
25. अनेकं प्रथमान्तम् अन्यस्य पदस्यार्थे कः समासः भवति?
26. चार्थाः कति सोदाहरणं लेखनीयाः।
27. कयोः चार्थयोः समासः भवति? लिखत।
28. ईशकृष्णौ इत्यत्र ईशस्य पूर्वप्रयोगः केन?
29. पाणिपादम् इत्यत्र द्वन्द्वसमासः कस्मिन्नर्थे भवति?
30. वाक्त्वचम् इत्यत्र 'टच्' विधायकं सूत्रं लिखत।

**निबन्धात्मकप्रश्नाः –**

31. समासः कतिधा? सपरिभाषं सोदाहरणञ्च लिखत।
32. अव्ययीभावसमासस्य पाठ्यपुस्तकस्थ-उदाहरणानां सविग्रहं सारणी निर्मातव्या।
33. तत्पुरुष-समासस्य सोदाहरणं भेदान् वर्णयत।
34. पाठ्यपुस्तकसूत्राणाम् अर्थोदाहरणसहिता सारणी निर्मेया।
35. पञ्चसमासान् आधारीकृत्य 400 शब्देषु निबन्धं लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# शिवराजविजयम्

## विषय-प्रवेश:

सुविदितमेतत संस्कृतसाहित्यमूर्धन्यविदुषां यत निखिलभूतलरत्नभूतमिदं भारतं पुरा येषां मनीषीमूर्धन्यानां गद्यसम्राजां तप:प्रसादवशाद् अष्टमशताब्द्या: पूर्वमेव निखिलभुवन्मण्डले अक्षुण्णां कीर्तिमवाप, तेषु अग्रगण्या: विद्वांस:- सुकविबन्धु: सुबन्धु:, कविताकामिनी पञ्चबाणो बाण:, महाकावि दण्डी च। एतै: विद्वत्वरेण्यै: पद्यकाव्यनिर्माणं विहाय सरसं गद्यं विरचितम्।

महाकविसुबन्धुना श्लेषप्रधानं वासवदत्ताभिधानं गद्यकाव्यं विरचितम्। बाणभट्टस्य कादम्बरी कथाग्रन्थ:, हर्षचरितमैतिहासिकं गद्यकाव्यं च वर्तते। ''त्रयो दण्डिप्रबन्धाश्च'' एतदुक्तिमनुसृत्य 'काव्यादर्श:', ''दशकुमार चरितम्'' ''अवन्तिसुन्दरीकथा'' इति त्रयोग्रन्था दण्डिन: कथ्यन्ते। त्रिष्वपि बाणभट्टस्य कादम्बरी न केवलं तस्यैव रचनासु, प्रत्युत सम्पूर्णेऽपि संस्कृतगद्यसाहित्ये सर्वोत्कृष्टा रचना इत्यत्र नास्ति सन्देह:।

स्वनामधन्यस्तत्रभवान गद्यसम्राट् महाकवि: श्रीमदम्बिकादत्तव्यासोऽपि व्यास इव पुराणकल्पानि विविधविषयपूर्णानि ग्रन्थरत्नानि विरचय्य न केवलं नाम्नैव प्रत्युत अर्थतोऽपि स्वकीयं व्यासत्वं प्रमाणयामास, व्यासस्य महनीय साहित्यसम्पत्तौ नितान्तं कमनीयं सुललितं गद्यकाव्यमस्ति शिवराजविजयाभिधानम्। शिवराजविजयस्तावत् कश्चिदैतिहासिक उपन्यास:, यत्र महाराष्ट्रकेशरिण: शिववीरस्य उदात्तं चरितं ओज:पूर्ण देववाण्यामुल्लिखितमस्ति।

**श्रीमदम्बिकादत्त व्यास:**

कविपरिचय:-

पण्डित श्री अम्बिकादत्तव्यास: सामवतनाटके स्वपरिचयं प्रस्तुवन्नाह -

**जातो जयपुरनगरे वाराणस्यां तथा कलितविद्य:।**
**सत्वरकविता सविता गौड: कोऽप्यम्बिकादत्त:।।**

संस्कृतशिक्षाया: प्रचारप्रसारेण सहैव संस्कृत-साहित्येतिहासे जयपुरनगरस्य नाम मूर्ध्नि वर्तते। महाकविरयम् अत्रैव 1858 तमे ईशवीयाब्दे समुत्पन्नो, वाराणस्यामध्ययनं विधाय विहारप्रदेशे बहुत्राध्यापनं कृतवान। अस्य स्थितिकाल: 1858 ईसवीयाब्दत: 1900 पर्यन्तमिति स्वीक्रियते। महाकवेरस्य पूर्वजा: राजस्थान प्रदेशस्य जपयुरमण्डलान्तर्गते धूलानामकग्रामे निवासमकुर्वन्निति मन्यते। पण्डितप्रवरो राजारामो स्वकीयं ग्रामं परित्यज्य काश्यामेव निवासं चकार। तस्य पुत्रद्वयम् आसीत्-दुर्गादत्त: देवीदत्तश्च। दुर्गादत्तस्यैव द्वितीय: पुत्रोऽम्बिकादत्त व्यासो बभूव। 1858 ईसवीये वर्षे चैत्र शुक्लाष्टम्यां जयपुरेऽस्य जन्म सञ्जातम्। काश्यामेव स: शिक्षां गृहीतवान्। 1880 तमे वर्षे साहित्याचार्य-परीक्षामुत्तीर्णवान। भारतेन्दु-हरिश्चन्द्र: काशी कवितावर्द्धिनीसभायां महाकविमिमं ''सुकवि'' रित्युपाधिना सम्मानितवान्। एवमेव एकस्यामेव घटिकायां श्लोकशतकनिर्माणाद् काशीब्रह्मामृतवर्षिणीसभायां ''घटिकाशतक'' इत्युपाधि-नाऽलङ्कृतोऽभूत। महाकविरयं शतं प्रश्नान् श्रुत्वा तान् तेनैव क्रमेण समाधातुं क्षमोऽवर्तत। अस्मादेव कारणाद् अयं ''शतावधान'' इति प्रसिद्धिमवाप।

रससिद्धोऽयं महाकवि: प्राचीनतरमपि वस्तु स्वविलक्षणप्रतिभया नूतनं नूतनतरं च स्वरचनायां विधातुं क्षम:। अस्मादेव वैशिष्टयाद् आधुनिका: समालोचका अमुं ''अभिनवबाण'' इति नाम्ना सम्बोधयन्ति।

अनेन न केवलं संस्कृत भाषायामपितु हिन्द्यामपि रचना कृता। अशीतिकल्पा: ग्रन्थाऽनेन विरचिता परं पञ्चाशदेव ग्रन्था:तेषु प्रकाशिता वर्तन्ते। दौर्भाग्याद् द्विचत्वारिंशद्वर्षाणामल्पावस्थायामेव महाकविरयं दिवं गत:। तथापि यादृशं विपुलमुत्कृष्टंञ्च साहित्यमनेन विरचितं तादृशं शतायुर्भूत्वाऽपि कोऽपि कवि: विरचयितुं समर्थो न भवेत्।

कृतिपरिचय:-

श्रीमदम्बिकादत्तव्यासेन देववाण्यां संस्कृते समुपनिबद्धानां ग्रन्थानां संख्या तु भूयसी वर्तते, तथापि मुख्यतमा इमा: सन्ति-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(1) गणेशशतकम् (2) कथाकुसुमम् (3) सांख्यासागरसुधा (4) संस्कृताभ्यासपुस्तकम् (5) पातञ्जलप्रतिबिम्बम् (6) प्राकृतप्रवेशिका (7) सामवत नाटकम् (8) प्राकृतगूढ़शब्दकोष: (9) रेखागणितम् (श्लोकबद्धम्) (10) अनुष्टुब्लक्षणोद्धार: (11) रत्नपुराणम् (12) शिवराजविजयम् (13) गुप्ता शुद्धिप्रदर्शनम् (14) बाल व्याकरणम् (15) समस्यापूर्तिसर्वस्वम् (16) सहस्रनामरामायणम् (17) द्रव्यस्तोत्रम् (18) गद्यकाव्य-मीमांसा (19) दु:खद्रुम कुठार: (20) कुण्डलीदर्पणम् (21) आर्यभाषा सूत्रधार: (22) इतिहास संक्षेप: (23) रत्नाष्टकम् (24) पुष्पोपहार: (25) अवतारमीमांसा कारिका (26) धर्माधर्म कलकलम् (27) मित्रालापश्चेति।

## शिवराजविजयम्

ऐतिहासिकोऽयमुपन्या स:। विभक्तमस्ति विरामत्रये चास्य कथावस्तु। अत्र प्रतिनि:श्वासं चत्वारो विरामा: सन्ति। नायक: महाराष्ट्रकेशरीशिवराजो वीरश्च मुख्योरस: वर्तते। अन्येरसा: करुणरौद्राद्रयोऽङ्गत्वेनात्र वर्णिता:।

## विषयवस्तु:

शिवराजविजयस्य कथावस्तु त्रिषु विरामेषु द्वादशनि:श्वासेषु च वर्णितमस्ति। नायक: शिवराजो यवनानामत्वाचारादतीव खिन्नो भूत्वा मातृभूमे: स्वातन्त्र्यार्थ संघर्षमारब्धवान्। तदानीं यवनशासकानामत्याचारा:, हिन्दुनृपेषु परस्परमैक्याभाव:, नायकस्य शिवराजस्य प्रतिनायकस्यावरङ्ग जीवस्य च राजनीतिकनियमेषु वैषम्यमित्यादि-घटनाक्रमवर्णनेन तात्कालिकहिन्दुराष्ट्रस्य दुर्दशा परिस्फुरति, गौरसिंहश्यामसिंह च शिवराजस्य सहायकौ। स्त्रीपात्रेषु रसनार्या:, सौवर्ण्या:, तत्सख्याश्च प्रामुख्येन वर्णनं विद्यते। सौवर्णी हि कविकल्पनावतीर्णा भारतीया रमणी।

उपन्यासोऽयं सुखान्तो वरीवर्ति, यस्य परिसमाप्तिर्नायकशिवराजस्य महाराष्ट्र विजयेन भवति। अत्र परम्परागत शैलीम् आश्रित्य रसयोजना, प्रकृति वर्णनं, मानवीय सौन्दर्य वर्णनम्, अलङ्कारयोजना, अन्यानि च काव्यतत्त्वानि समाविष्टानि, अर्वाचीन शैलीम् आश्रित्य च चरित्रचित्रण-कथोपकथन-कथानकयोजनादीनि प्रयुक्तानि। एवमयमुपन्यास: प्राचीनार्वाचीन शैल्यो सङ्गमस्थली वर्तते।

अत्र वर्णनेषु वाक्ययोजनायाञ्च बाणभट्टप्रभाव: द्रष्टुं शक्यते। भाषा तदनुकूला प्राञ्जला, प्रसादगुणोपेता प्रवाहमयी च वर्तते। संवादा स्वाभाविका:, सरला: प्रकरणानुकूला: पात्राणां विविध मनोवृत्तीनां परिचायकाश्च सन्ति। ऐतिहासिके कथानके कल्पनाया अपि मिश्रणं पण्डितवर्यस्य श्रीमदम्बिकादत्तव्यासस्य विद्वत्ताया: परिचायक:।

## शिवराजविजयस्य कथासार:

भारतवर्षस्य दक्षिणप्रदेशे यवनानामाधिपत्यमासीत्। हिन्दुजना: तेषामत्याचारैस्त्रस्ता आसन। नायक: शिवराजो यवनानामत्याचारादतीव खिन्नो भूत्वा मातृभूमे: स्वातन्त्र्यार्थं संघर्षमारब्धवान्। तेषां गुप्तयोजनां ज्ञातुं कूटनीतिपटुरयं प्रतिगव्यूत्याश्रमान् स्थापितवान्। शिववीरस्य निरन्तरं विजयाभियानेन उद्विग्नो बीजापुरनरेश: तेन सह योद्धुं जीवन्तमेव तं गृहीतुञ्च अफजलखानं प्रेषयामास। शिववीर: तदा प्रतापदुर्गे न्यवसत। भीमानद्यास्तटे अफजलखान: स्वकीयं शिविरमस्थापयत्। मदोन्मत्तो स: निरन्तरं भोगविलासरतो आसीत। बीजापुरनरेशस्य पत्रमादाय यवनगुप्तचर: मध्येमार्गमेकस्या: ब्राह्मणकन्याया अपहरणं कृतवान् परं सौभाग्यवशाद् सा ब्रह्मचारिगुरो: शिष्याभ्यां गौरसिंह श्यामसिंहाभ्याञ्च रक्षिता सन्देश वाहकश्च हत:। पत्रवाहकस्य वस्त्रेष्वेकं गोप्यपत्रं मिलितम्।

तत: शिववीर: पत्रमध्ये लिखितां निखिलां योजनां ज्ञात्वा स्वयमेव व्याजेन अफजलखानं हन्तुं चिन्तितवान्। द्वितीयदिवसे अफजलखान: शिवराजं मिलितुं गच्छति। शिववीरोऽपि वस्त्रयो: कवचं करयोश्च व्याघ्रनखं परिधाय तत्स्वागतार्थं गच्छति। शिववीर: परस्परमालिङ्गनावसर एव अफजलखानस्य स्कन्धौ ग्रीवाञ्च पाटयित्वा तं धरायां न्यपातयत। पूर्वयोजनानुसारेण अफजलखानस्य शिविराणि सेनया दग्धानि यवनसैनिकाश्च पलायिता:। अथ गौरसिंह: स्ववृत्तं श्रावयन्नकथयत् यत् ते गौरसिंह:- श्यामसिंह:- सौवर्णी च उदयपुरराज्यस्य लघुक्षेत्र प्रशासकस्य खड्गसिंहस्य सन्तत: सन्ति। दुर्दैवात् दिवङ्गतयो: पित्रो: ते त्रयोऽपि देवशर्मण: पुरोहितस्य संरक्षणे न्यवसन्।

एकदा द्वावपि भ्रातरौ आखेटं क्रीडन्तौ लुण्ठाकै: अपहृतौ। दैवाच्च हनुमन्मन्दिरपूजकेन संरक्षितौ सन्तौ



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

महाराष्ट्रदेशं प्राप्नुताम्। तत्र भीमानद्यास्तटे शिववीरेण सह तयोः साक्षात्कारः जातः।

अन्यत्र पुण्यपत्तनं विजित्य शाइस्ताखानः तत्रैव प्रासादेषु न्यवसत्। अतः शिवराजेन सह तस्य युद्धमनिवार्यमभवत्। रघुवीरसिंहमाध्यमेन शिववीरः सन्देशमेकं तोरणदुर्गाध्याक्षाय प्रैषयत। वातवर्षादिकमविगणय्य सः सन्देशवाहकः तत्स्थानं प्राप्य हनुमन्मन्दिरे अतिष्ठत्। तत्र वाटिकायां गीतं गायन्तीं सौवर्णीं वीक्ष्य रघुवरीसिंहः तां प्रति अनुरक्तो बभूव। शिववीरस्य आज्ञां प्राप्य सः शाइस्ताखानेन सह संभाव्यमानस्य युद्धस्य फलं जातुं पण्डित देवशर्मणः पार्श्वे गतवान्। देवशर्मा सौवर्ण्या तस्य कृते मोदकमेकं प्रेषयति। तस्मै माल्यार्पणं कर्त्तुञ्च निर्दिशति। प्रातःकाले दुर्गाध्याक्षात् सन्देशस्योत्तरमवाप्य देवशर्मणः ''यवनैः सह युद्धे जयः आर्यैः सह युद्धे च पराजयः'' इति भविष्यत्फलं ज्ञात्वा वाटिकायां सौवर्णीं पश्यति। ततः हनुमत्प्रसादं गृहीत्वा सिंहदुर्गं प्रति प्रस्थानं कृतवान्।

एकदा पण्डितवेषे शिववीरः माल्यश्रीकेण सह शाइस्ताखानस्य निवास स्थानं पूनानगरस्य गुप्तनिरीक्षणं कृतवान्। अनुगन्ता चान्दखानश्च तेन हतः। शिववीरः यशवन्तसिंहं पूनानगराद् बहिः स्थातुं निर्दिष्टवान् स्वयञ्च कैश्चिद् मुख्यैः शूरवीरैः सह पूनानगरे प्रविष्टवान। चान्दखानस्य शाइस्ताखानस्य च पुत्राः रघुवीरसिंहेन हताः। आहतः शाइस्ताखानः वातायनात् पलायितवान। रघुवीरसिंहः अवरङ्गजीवस्य पुत्रीं रोशनआरां बन्दिनी कृतवान्।

इतः ब्रह्मचारिगुरुः गौरसिंहाय स्वकीयं स्वपुत्रस्य वीरेन्द्रसिंहस्य च पूर्व वृत्तातं न्यवेदयत्। अपरतः सौवर्णी क्रूरसिंहेन कृतं निजापमानविषयकं वृत्तान्तमश्रावयत। संयोगवशाद् क्रूरसिंहस्य नियुक्तिरन्यत्र जाता। सौवर्णी च हर्षमनुभवति।

अवरङ्गजीवस्य पुत्री रोशनआरा शिववीरविषयकं स्वीकायानुरागं तस्मै निवेदयति। परं शिववीरः भारतीयसंस्कृतिमनुसरन् जनकेन कन्यादाने सत्येवाङ्गीकुर्याम इति स्पष्टयति।

तस्मिन्नेवावसरे जयसिंहः सेनया सह आक्रमते। शिववीरः तच्चित्ते हिन्दुत्वभावनां प्रकटयितुं प्रायतत, परमसफलः सन् यवनैः सह सन्धिं कर्तुं विवशो बभूव। तदनुसारेण रोशनआरां मुअज्जमञ्च समर्पितवान्।

ततः शिववीरः रघुवीरसिंहसाहाय्येन विजयपुरमाक्रम्य विजयं प्राप्नोत्। रहमतखानश्च जीवित एव गृहीतः। परं ''रघुवीरसिंहः राजद्रोही वर्तत'' इति रहमतखान क्रूरसिंहयोः वचने विश्वस्य शिववीरः तं निष्कासितवान। बहुकालानन्तरं सत्यमिदं प्रकटितमभूद् यत् राजद्रोही तु क्रूरसिंह आसीत्।

अपमानितो रघुवीर सिंहः राधास्वामिवेषे शिववीरमुपकुरुते स्म। सौवर्ण्याः अपहरणं कर्त्तुमिच्छुकं क्रूरसिंहं च हतवान्। जयसिंहसन्धिमनुसृत्य शिववीरः 1666 तमे वर्षे अवरङ्गजीवस्य राजसभायां दिल्ल्यामुपस्थितोऽभूत्। मार्गे राधास्वामिवेषधरः रघुवीरः तं गमनाय निरोद्धुं बहुशः प्रयतते। किन्तु शिववीरः तत्कथनं नामन्यत।

राजसभायाम् अवरङ्गजीवः शिववीरं कारागारे समर्पयति, तत्र बहून् रक्षकान् च नियुक्तवान्। परं स्वीया योजनया रघुवीरसिंहस्य साहाय्यं चावाप्य शिववीरः ततः पलायने सफलो बभूव। राधास्वामिनः विषये सत्यं ज्ञात्वा शिववीरः तं क्षमां याचते।

ततः शिववीरेण सह रघुवीरसिंहोऽपि प्रत्यावर्तत। मण्डलेश्वरपदं प्राप्य सः सौवर्ण्या सह विवाहं कृतवान्। शिवः आशीर्वचोभिः सम्मानं कृतवान नवदम्पत्योः। तदैव दूताः असूचयन् यत सन्धौ यवनेभ्यः प्रदत्ताः सर्वेऽपि दुर्गाः पुनः विजिताः।

ततश्च शिववीरः सतारागनरीं राजधानीं विधाय तत्र न्यवसत। शनैः शनैः निखिलेऽपि महाराष्ट्रे स्वीयाधिकार मस्थापयत। अवरङ्गजीवेन प्रेषितः सेनापतिः मोहब्बतखानश्च. ततः पलायितः। एवं शिववीरस्य ऐतिहासिकमितिवृत्तं कविना यथाशक्यं सरसत्वेन वर्णितं, अतः नूनं श्लाघनीयम्।

## प्रथमनिःश्वासस्य कथासारः

पूर्वदिशायामुदेष्यन्तं भगवन्तं मरीचिमालिनं प्रणमन् गुरुसेवापरायणः कश्चिद् विप्रवटुः निजपर्णकुटीराद् निर्जगाम। स च 'निद्रावशं मया सुतरां पुण्यकालो यापितः, अयमस्माकं गुरुपादानां सन्ध्योपासनकालो विद्यते' इति चिन्तयित्वा सपद्येव पुष्पाणि चेतुं तत्परोबभूव। तदैव तस्य सहाध्यायी श्यामवटुः झटिति तमुपेत्य न्यवारयन् कथयति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यत् ''मया पूर्वमेव पुष्पाण्यवचितानि। गुरवोऽपि प्रात: सन्ध्यामुपासते। अथ च त्वया यवनाद् रक्षिता कन्या इदानीं शेते। सा जागृता सती पुनर्विलपिष्यति। अत: तस्या: पितरौ गृहञ्च नूनमेव अन्वेष्टव्यानि सन्ति'' इति।

सहसा तत्र पर्वतशृङ्गादवतीर्यागच्छन्तं योगिराजं वीक्ष्य चकिता: सर्वे आश्रमवासिनस्तं सत्कर्तुं प्रवर्तन्ते। ब्रह्मचारिगुरु: किमपि वक्तुमारभते। तदैव कन्यारुदनं श्रुत्वा पृच्छापरवश: योगिराजोऽभूत्। तज्जिज्ञासां शामयन् आचार्य: उत्तरं दत्तवान् यवनहतकाद् भ्रष्टाया: सप्त दश वर्ष-देशीयाया: कन्याया: विषये च ज्ञापितवान्। गुरुमुखात् कन्यका विषयकं वृत्तं श्रुत्वा क्रोधाग्निना ज्वलित इव योगिराज: सकोपमुवाच- ''विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रव:?'' तदा ब्रह्मचारिगुरु: उवाच-हे भगवन्। अधुना विक्रमराज्यं नास्ति। भारत भुवं विहाय गतस्य तस्य सप्तदशशतकानि व्यतीतानि। साम्प्रतं तु सर्वत्र यवनानां दुराचारै: आर्त्तजनानां विलपनं श्रूयते दृश्यते च। समाधिस्थै: भवद्भि: कालवेगो न लक्षित:। अद्य नदीनां तानि स्रोतांसि न सन्ति, नगराणां सा स्थिति: नास्ति, गिरीणां तादृशी अवस्थितिर्नास्ति, न च वनानां सा गहनता विद्यते। अधिकं किं ब्रूम:, अधुना भारतमन्यप्रकारकमेव जातमस्ति। दिवङ्गते राजनि विक्रमादित्ये, अत्रस्था: राजान: राष्ट्रहितं विहाय शनै: शनै: परस्परं कलहपरा: अभवन। एतादृशीं स्थितिमवलोक्य गजनीवास्तव्य: महमूद इत्याख्य: कश्चिद् यवन: ससेन: पौन: पुण्येन द्वादशवारं लुण्ठितवान् विपुलं धनञ्च स्वदेशमनयत्। ततश्च गच्छति काले सप्ताशीत्युत्तरसहस्रतमे (1087) वैक्रमाब्दे शोकेन कष्टेन च सह मृते महमूदे शहाबुद्दीनाख्य:कश्चन् गोराङ्गदेशवास्तव्यो यवन: भारतवर्षमाक्रम्य पृथ्वीराजजयचन्द्रौ हत्वा भारतवर्षे यवनराज्यमस्थापयत्।

ततश्च तदीय एव कश्चन् 'कुतुबुद्दीन' इत्याख्य सेवक: (क्रीतदास:) प्रथमभारत सम्राट् सञ्जात:। तत: अद्यावधि राक्षसरूपा यवना एव क्रूरतया भारते प्रशासति। अस्मिन्नेव क्रमे अवरङ्गजीव: सम्प्रति दिल्लीश्वरत्वं कलङ्कयति। केवलं दक्षिणस्य महाराष्ट्रप्रदेशं विहायं सर्वत्र तस्यैव साम्राज्यं व्यापृतं विद्यते। तं प्रदेशं प्रशास्ति महाराष्ट्र केसरी साक्षात् शिव इव शिववीर:, यश्च पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। शिववीरात् महाराष्ट्रं हस्तगतं कर्तुंमिदानीं 'शास्तिखान' इत्याख्य: तस्यैवानन्य: सेवक: तेन प्रेष्यत इति श्रूयते। विजयपुराधीश्वरेण साम्प्रतमस्य शिववीरस्य वैरं प्रसिद्धमित्युक्त्वा ब्रह्मचारिगुरु: मौनमालम्बत।

तत: शिववीर: विजयतु, भवतां मनोरथा: सफला: भवन्तु इत्युक्त्वा योगिराज: सत्वरमुपत्यकामारुह्य तस्मिन्नेव पर्वतकन्दरे तपश्चरितुं जगाम।

तत: शनै: शनै: गतेष्वपरिचितजनेषु निर्जने सति आचार्य: गौरवटुमाहूय विजयपुराधिपाज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य अफजलखानस्य विषये किमपि प्रष्टुमिच्छति तदैव कस्यापि पादचारध्वनिरिव शृणोति स्म। तच्छ्रुत्वा खिन्ने इव मुनौ गौरवटु: तद्ध्वने: कारणं ज्ञातुं परित: सम्यक पश्यति भ्रमति च। गुरुणा अनुगम्यमानो गौरसिंह: लताप्रतानवितानेन वेष्टितस्य कदलीस्तम्भत्रयस्य मध्ये अन्तर्हितं विंशतिवर्षदेशीयं यवनयुवानञ्च पश्यति। कन्यापहारकं यवनहतकञ्च गौरसिंह: द्वन्द्वयुद्धे हन्ति। हतस्य तस्य चोलकादिकमन्विष्य आनीतं पत्रमादाय सगण: स्वकुटीरं प्रविवेश।

## ग्रन्थप्रयोजनम्

यद्यपि संस्कृतवाङ्मये उपन्यासशब्दस्य भिन्नार्थे प्रयोगो भवति। नाट्य शास्त्रे भरतमुनिना प्रतिमुखसन्धेरङ्गेष्वस्य गणना कृता। साहित्यदर्पणकारेण भणिकाया अङ्गेषूपन्यासमपि गणयता एवमोक्तम् - 'उपन्यास:' प्रसङ्गेन भवेत् कार्यस्य कीर्तनम्। परं तथापि उपन्यास: काव्यत्वेन गणयितुं न शक्यते। अतएव श्रीमदम्बिकादत्तव्यासमहाभागेन एतत्विषये निगदितम्

**गद्यैर्विद्योतितं यत्स्याद् गद्यकाव्यं तदीरितम्**
**ग्रन्थरूपं तदेवात्र श्रव्यं किञ्चिन्निरुप्यते।**
**उपन्यासपदेनापि तदेव परिकथ्यते**
**यथा कादम्बरी यद्वा शिवराजजयो मम् ।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ग्रन्थस्यास्य कथावस्तु ग्राण्डटफ लिखितात् ''मराठा'' इतिहासनामग्रन्थाद् उद्धृतम। शिल्पविधाने चात्र महाराष्ट्र जीवन प्रभात- अङ्गुरीयविनिमयाख्ययो: वङ्गीयोपन्यासयो: प्रभावो द्रष्टुं शक्यते। 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इति रीत्या ग्रन्थस्यास्य प्रयोजनं किमिति विषये पण्डितवर्येण श्रीव्यासमहाभागेनेवमुक्तम्-संस्कृते उपन्यासलेखनपरम्पराया आरम्भ:, सनातनधर्मरक्षकस्य शिववीरस्य चरित्रचित्रणम् यवनात्याचारेभ्य: भारतीयानां तत्संस्कृते: मातृभूमेश्च रक्षार्थं प्रेरणा प्रदानं तथा सद्य: परनिवृत्तिरिति।

## शिवराजविजयस्य काव्यगत वैशिष्ट्यम् -

नामकरणम्-

शिवराजस्य विजय: शिवराजविजय:, तमधिकृत्य कृतं काव्यं शिवराजविजयमिति। परं केचिद् विद्वांस: उपन्यासोऽयमिति स्वीकुर्वन्ति। तत: शिवराजमधिकृत्य कृत: विरचित: वा उपन्यास: ''शिवराजविजय:'' इति व्युत्पत्ति: सम्यक् प्रतीयते।

रसयोजना-

वाक्यं रसात्मकं काव्यमिति साहित्यदर्पणकारमतानुसारेण रस एव काव्यस्यात्मा भवति। अस्मिन्नुपन्यासे वीररसोऽङ्गी रूपेण वर्णित:। अन्ये रौद्रकरुणादय: रसास्तदङ्गतया कविना यथावसरं वर्णिता:। दयावीरो दानवीरो धर्मवीर: युद्धवीरश्च शिवराजोऽत्र कविना नायकत्वेन विभूषित:। भाषापि वीररसानुकूला क्वचिद् ओजस्विनी गाढबन्धा चास्ति तु क्वचिद् माधुर्यगुणोपेता अल्पसमासा असमासा वा अस्ति। गौरसिंह यवनहतकयोर्मध्ये प्रचलितस्य युद्धस्य वर्णने वीररस: सम्यक् पुष्टिमश्नुते।

तत्र महाराष्ट्रकेसरिण: शिववीरस्य शौर्याभिव्यञ्जने ओजस्विनी रचना यथा - ''महाराष्ट्रदेशरत्न, यवन-शोणितपिपासाऽऽकुलकृपाण: वीरतासीमन्तिनी सीमन्तसुन्दर-सान्द्रसिन्दूरदानदेदीप्यमान दोर्दण्ड:-मुकुटमणि र्महाराष्ट्राणाम, भूषणं भट्टानाम .... कार्य वा साधयेयं देहं वा पातयेयम्'' इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनाम् सताम् ..... वितानस्यायमेवाऽश्रय:।'' यथा वा वातवर्षादिकमविगणय्य वेगेन गच्छत: रघुवीरस्य वर्णने - ''पदे-पदे दोधूयमाना: वृक्षशाखा: सम्मुखमाहनन्ति परं दृढसङ्कल्पोऽयं सादी न स्वकार्याद् विरमति'' अत्रापि वीररस्याभि व्यक्ति: नूनं श्लाघनीया।

महाराष्ट्रगमनविषये दिल्लीश्वरस्य अनुमतिमनवाप्य दिल्लीकारागारे निरुद्धस्य कुपितस्य शिववीरस्य वर्णने रौद्ररसोऽनुभूयते यथा -

''अथ महाराष्ट्रराजो दृष्ट्वैतत लोहितवदन: कोपस्फुरदधरो जाज्वल्यमाननयनो जिघत्सन्निव ब्रह्मामण्डलम्, भ्रुवोराङ्कुचनेन स्फोटयन्निव गगनतलम् स्तन्यजीवमाल्यश्रीकं चावादीत् पश्य-पश्य ...... महाराष्ट्र। अन्यानपि चातुरीं शिक्षयन्ति।''

चिकित्सकरूपेण पिचण्डिलं कृत्रिम लम्बकूर्च समागतं बाल्यमित्रं गुरेश्वरम् अवसाने विगतकूर्चं विधाय यदा शिववीरेण सह सर्वेऽपि माल्यश्रीकादय: प्रसह्य सखिलखिला शब्दं हसन्ति तदा सुतरां तत्र हास्यरसपरिपाको भवति।

प्रथमनि: श्वासे गौरसिंहेन हतस्य यवनहतकस्य वर्णने वीभत्सरसानुकूला सामग्री समुपलभ्यते। यथा ..... ''गाढरुधिरदिग्धायां ज्वलदङ्गारचितायां चितायामिव वसुधायां शयानं- शोणितसंघातव्याजेनान्त: स्थितरजोराशिमिवोद्गिरन्तं .... छिन्नकन्धरं यवनहतकम् .........।''

अपि च यवनवर्णने- चिरजलानवगाहनोद्भूतमहामलावलिमलीमसै: मद्यस्वदेनिष्ठ्यूत कर्णकिट्ट-सिङ्घाणदूषिकादिविविधमललिप्तचिराक्षालित मलिन वसनै: .........।

इत्यत्र बीभत्सस्य साम्राज्यमस्ति।

प्रथमनि: श्वास एव यवनेनापहृता या: पुनश्च भल्लूकभिया तेन परित्यक्ताया: कन्यकाया: सौवर्ण्या: वर्णने



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भयानकरसोऽनुभूयते –

"......... सवेगमत्युष्णं दीर्घनिः श्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रु प्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता।"

अनेन प्रकारेण काव्येऽस्मिन् यथावसरं वीररसस्याङ्गत्वेन शान्ताद्भुत करुणरसानामपि समावेशो द्रष्टुं शक्यते।

**भाषा**

साहित्यदर्पणकारेणाचार्यविश्वनाथेन गद्यस्य चतुर्विधत्वमङ्गी कुर्वता उक्तम् –

**वृत्त गन्धोज्झितं गद्यम् मुक्तकं वृत्तगन्धि च।**
**भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम ।।**

पण्डितवर्येण चतुर्णामप्येतेषां कमनीयः प्रयोगो विहितः। कविमूर्धन्यो व्यासो हि शिवराजविजये भाषायां पदसंघटनायां च महाकविबाणभट्टमनुकरोति। तस्य भाषा भावानुसारिणी सानन्दं प्रतिपदं विहरति। रसानुकूला पदावली सर्वत्र प्रयुक्ता। कादम्बर्यां बाणभट्टेन विन्ध्याटव्या राजकुलादीनां च वर्णने दीर्घसमासायाः पदावल्याः प्रयोगो विहितस्तथैव अदूष्यवैदुष्यविभूषितेन व्यासेनापि दक्षिणदेशस्य कोङ्कणदेशस्य च वर्णने प्रायः दीर्घसमासानां प्रयोगः प्रदर्शितः। दिङ्मात्रं यथा कोङ्कणदेशवर्णने – नासाग्रविषाणरशाणनच्छलविहितगण्डशैलखण्डानां खड्गिनाम्, दो दुल्यमानद्विरेफदलपेपीयमानदान धाराधुरन्धराणां सिन्धुराणाम्, कृपाकृपणकृपाणच्छिन्न दीना ध्वनीनगलतलगलत्पीनधा-रशोणित बिन्दु वृन्दरञ्जित-वारबाणसारसनोष्णीषधारणा कलिताखर्व गर्व बर्बराणां लुण्ठकनिकराणां च सर्वथा साक्षात्कारसम्भवः।

एवमेव यथा बाणेन विरहविह्वलायाः कादम्बर्याः वर्णने सरला समासरहिता च पदावली प्रयुक्ता तथैव व्यासेनापि गौरवटुवर्णने सरलपदावल्याः प्रयोगः कृतः गौरवटुवर्णनं यथा –

"वटुरसौ आकृत्या सुन्दरः वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडशवर्षदेशीयः, कम्बुकण्ठः आयतललाटः सुबाहुः विशाललोचनश्च असीत।"

इत्थं शिवराजविजये सर्वत्र वर्ण्यविषयानुकूलमेव प्रायः समासरहितायाः क्वचिदल्पसमासायाः क्वचिच्च दीर्घसमासायाः सङ्घटनाया यथोचितं प्रयोगं विधाय कविवरेण्यानेन भाषायां पूर्णाधिकारः प्रदर्शितः। इदमेव कारणं यदस्मिन्नुपन्यासे भाषा दासीव कवेरादेशं पालयति प्रकाशयति च अनायासेनैव प्रतिपदं नवनवान् नानाविधान् कमनीय भावान्।

**अलङ्कारयोजना–**

शिवराजविजये कविमूर्धन्येन पण्डित श्रीमदम्बिकादत्तव्यासमहाभागेन सरसां सुवर्णां कविताकामिनीम् अलङ्कारैरलकर्तुं क्वचिदपि प्रसह्य प्रयासो न विहितः। अस्मादेव कारणात् सुतरामागताः शब्दालङ्कारा अपि तद्ग्रीवायां हारायन्ते, भाराय न भवन्ति। शब्दालङ्कारेष्वनुप्रासः तु विशेषेण कवेरभीष्टः। एवमेव उपमारूपको त्प्रेक्षादीनामर्थालङ्काराणां प्रयोगेऽपि तदनुरागः नैसर्गिकः। किं बहुना उपमालङ्कार प्रयोगकालेऽपि अनुप्रासं प्रति स्वाभाविकमनुरागस्य दृष्टान्तमिदम्–
"न वयं मीनानिव पीनान इभानिव तुन्दिलान् भेकानिव निर्विवेकान्, वृषदंशकानिव कपटहिंसकान"
"काकानिवास्वादितदुर्विपाकान् ..................... नृपम्मन्यान्-स्वप्नेऽपि समुपासमहे।"

अर्थालङ्कारेषु उपमाया बाहुल्येन प्रयोगोऽत्र द्रष्टुं शक्यते। यथा– "मृगीव व्याघ्राऽऽघ्राता अश्रुप्रवाहैः स्नाता मृणालगौरीम् कुन्दकोराग्रदतीम् इत्यादौ यथा वा– दीर्घ-दावदहने पतङ्गायितोऽसि।" यथा वा – "अङ्गारप्रतिमे नयने।"

वीरविक्रमादित्यविषये मुनेः कथने सहोक्त्यलङ्कारोऽपि चेतश्चमत्करोति –

"अथ स मुनिः– भगवन्। धैर्येण, प्रसादेन, प्रतापेन, तेजसा, वीर्येण विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण विद्यया च सममेव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये .........।"



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एवमेव रूपकविभावनाविशेषोक्त्युदात्तादीनामलङ्काराणामपि मञ्जुलः प्रयोगोऽस्मिन् काव्ये परिलक्ष्यते।

**गुणाः–**

यद्यप्यत्र यथावसरं यथोचितं त्रयाणामपि गुणानां सन्निवेशो दृश्यते, किन्तु तेषु प्रसादस्य प्रधानता वरीवर्ति। किञ्च प्रसादगुणविषये यथोक्तमाचार्यैः–

"**स प्रसादः समस्तेषु रसेषु रचनासु च।**"

इत्युक्तदिशा सकलरसरचनासाधारणस्य प्रसादस्य महत्त्वं तावत् झटित्यर्थसमर्पकत्वरूपात् स्ववैशिष्ट्यादेव प्रतितिष्ठति। पण्डित अम्बिकादत्तव्यासस्य लोकोत्तरयशोवर्धने प्रसादगुणोऽपि हेतुः यथा हि – धैर्येण, प्रसादेन ...... सममेव इत्यत्र प्रसादोपेतायाः वैदर्भ्याः पाञ्चाल्याश्च रीत्योः स्थितिर्वर्तते।

अत्र यथासम्भवमर्थगौरवमपि कविना स्वीकृतम्। तेन सर्वत्र वाचां पृथगर्थता प्रदर्शिता। इत्थं भारविमतेनास्योपन्यासस्य सुकाव्यत्वं संसिद्धम्। पूर्वपरिचितां कन्यकां तद्भ्रातरौ गौरश्यामसिंहौ चोपेत्य वृद्धदेवशर्मणो हृदि य आनन्दप्रवाहः प्रचलितस्तस्य वर्णनं स्मरणीयम् ......।

"अथ कथमपि रिङ्गत्तुंगतिमिङ्गिलगिलपरिवर्त्त प्रसङ्गसङ्गसभङ्गतरङ्गरङ्गप्राङ्गणसोदरीभूतं हृदयं वशीकृत्य– पुरोहित।"

**चरित्रचित्रणम् –**

घटनाप्रधानोऽपि चरित्रप्रधानोऽयमुपन्यासः। पात्राणां चरित्रचित्रणे व्यासेन पदे–पदे नैसर्गिकता प्रकटिता ऐतिहासिकपात्रेष्वपि तेन यथावसरमोजः संवर्धितम्। अस्मिन्नुपन्यासे द्विविधानि पात्राणि नयन पथमायान्ति ऐतिहासिकानि काल्पनिकानि चेति तत्र ऐतिहासिक पात्रेषु महाराष्ट्रकेसरीशिववीरः, माल्यश्रीकः, जयसिंहः, अवरङ्गःजीवः, रसनारी, मायाजिह्मप्रभृतीनि। गौरसिंहः रघुवीरसिंहः चान्द्रखानः, रहोमत्तखानः इत्यादीनि च काल्पनिक पात्राणि सन्ति।

कविः चरित्रचित्रणे सफलः। शिवराजे नायकोचित्ताः सर्वे गुणाः सन्ति। स धीरोदात्तो नायकः। स वीरो नम्रो, दयावान् मर्यादायाः स्वतन्त्रतायाश्च रक्षकः। तमेव परिवृत्य उपन्यासस्य कथावस्तु प्रसृतम्। यदुक्तं ब्रह्मचारिगुरुणा – "महाराष्ट्ररत्नम् ..... भूषणं भटानां निधिर्नीतीनाम् .... प्रातः स्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहितः शिव इव धृतावतारः शिववीरः ........।"

सोऽयं शिववीरः राजनीतौ अश्वारोहणे खड्गचालने मल्लविद्यायां बाणविद्यायाञ्च अतितरां निपुण आसीत। तदुक्तम्– "को नामापरः शिववीरात? स एव राजनीतौ निष्णातः, स एव .... गुणिगणगुणग्रहणाऽग्रही वर्तते।"

नायकः शिववीरः कवेर्वाण्यां शिव इव धृतावतारः वर्तते, यस्य आदर्शवाक्यं विजृम्भते "कार्यं वा साधयेयं देहं वा पातयेयम।" इति।

रघुवीरसिंह, गौरसिंह, श्यामसिंह, वीरेन्द्रसिंहाः, शिवराजस्य सहायकाः। अस्मादेव तेषु देशधर्मप्रेम्णः स्वाभिमानस्य च भावनाया बाहुल्यमवलोक्यते। कुलीना वीराश्चेमे राजपुत्राः हृदयेन सततं स्वामिभक्ताःसन्ति। ब्रह्मचारिगुरोः वीरेन्द्रसिंहस्य चरित्रमपि विशिष्टतया वर्णितम्। अयं यवनानामत्याचारेभ्यो राष्ट्रस्य मुक्त्यर्थं मनसा, वाचा, कर्मणा च तत्परोऽन्ते चिरकालानक्तरं सौभाग्येन स्वतनयं प्राप्य कमपि विलक्षणमानन्दमनुभवति। स्त्रीपात्रेषु रसानारी तत्सखी, सौवर्णी तस्याः सख्याश्च प्रामुख्यं भजन्ति। रसानारी (रोशनआरा) हि दिल्लीश्वरस्य अवरङ्गजीवस्य तनया, यामपहृत्य गौरसिंहः स्वामिनः सम्मुखमानयति। रसानारी शिवराजं प्रत्यतिशयेनानुरक्ता। अतएव विरहोत्कण्ठितायाः खण्डितायाश्च नायिकायाः स्थानं गृह्णाति। सा खलु विमलप्रणयमूर्तिरत, प्रियतममनवाप्य अन्ते आत्महननेन संसारं जहाति। सौवर्णी तु आदर्शमयी भारतीयरमणी रघुवीरसिंहस्य च प्रेयसी। सा सुवर्णवर्णा मधुरकण्ठा, श्यामलकेशवती खञ्जनमञ्जुनयना इन्दुवदना मधुरस्मितवती एकादशवर्षदेशीया चास्ति। कविना तस्याश्चित्रणं कुर्वता प्रमाणितं यदियं प्रणयिनी, पतिपरायणा, लज्जासहिष्णुतयोः काचिदपूर्वा मूर्तिः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**संवादसौष्ठवम् –**

शिवराजविजये पात्राणां संवादा स्वाभाविकाः, सरलाः, प्रकरणानुकूलाः पात्राणां विविधमनोवृत्तीनां परिचायकाश्च सन्ति। नाटकीयतत्त्वपरिपूर्णा इमे संवादाः सरलतया अभिनेयाः। तद्यथा –

महाराजः– भद्रे, नास्माभिरीदृशा निगडैः किन्तु प्रेम्णा बद्धयन्ते।

रसानारीः– कतमोऽसौ भ्राता।

महाराजः– कुमारो मायाजिह्मः।

रसानारीः– कथमत्रायातः।

महाराजः– सोऽस्माभिर्योद्धुमायात आसीत।

पात्राणां मनोभावास्तेषां स्वरूपानुरूपा एव वर्णिताः सन्ति। रसानार्या सह वार्तायां नारीणां कृते सविनयं शिष्टाचारं प्रकटयति शिववीरः। तस्यैव संवादाः मायाजिह्मेन सह वात्सल्यपूर्णा देवशर्मणा सह च नितरां सम्मानपूर्णाः प्रतीयन्ते। यशस्विसिंहेन जयसिंहेन च सह तस्य संवादा ओजोमयाः क्षात्रधर्मानुकूलाश्च।

**प्रकृतिचित्रणम्–**

प्रकृतिचित्रणे तु व्यासः अभिनवो बाणः। तेन प्रकृतेः विविधरूपाणां शब्दचित्राणि प्रस्तुतानि। प्रकृतेः सौन्दर्यम् आलम्बनत्वेन उद्दीपनत्वेन च वर्णितम्। तदनुसारं शिवराजविजये सूर्योदय–सूर्यास्त–चन्द्रोदयादीनां चित्रणमतीव रुचिरमस्ति। उपन्यासकारेण ग्रन्थस्यारम्भ एव रूपकाद्यलङ्काराणां झङ्कारेण सह विहितमरूणोदयवर्णनं रसिकस्य कस्य मनो न हरति? तथा हि–

"एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य प्रेयान् पुण्डरीकपटलस्य शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। इति।"

एतदीयं सूर्यास्तवर्णनमपि तादृशमेव रमणीयं वर्तते। तथाहि –

"जगतः प्रभाजालमाकृष्य कमलानि संमुद्र्य– ..... चक्षुषा गोचर एव सञ्जातः।"

केचन महाकवयः प्रकृतेः कमनीयमेव पक्षं प्रकटयन्ति तु अपरे, भयावहस्य रोमाङ्चकारिणः स्वरूपस्य वर्णने साफल्यमनुभवन्ति, परं महाकवेरम्बिकादत्तव्यासस्येदमेव वैशिष्ट्यं यदस्य लेखनी सुन्दरभयङ्करोभयविध दृश्यवर्णने पूर्णसाफल्यमधिगतवती। अत्र व्यासः सम्यक् कादम्बरीग्रन्थकारमनुसरति।

**नूतनसंस्कृत शब्दराशिः–**

शिवराजविजये उपन्यासोचितायाः सरलललितभाषायाः प्रयोगे व्यासेन बहूनां नित्योपयोगिपदार्थानां कृते नूतनसंस्कृतशब्दानामपि बाहुल्येन सन्निवेशः कृतः। यथा– काचमञ्जूषा (लालटेन), भ्राष्ट्रम (भाड़), काष्ठपीठम् (चौकी), प्रियालः (प्याज), प्रसाधनिका (कंघी), शृङ्गवेरम् (अदरक), भोज्यपदार्थेषु कचौरी शष्कुली, पेटाः (पेड़ा)। क्वचित्तु उर्दूशब्दनामपि संस्कृतेन संस्कारो विहितः। कविना। तथाहि– मौलिवी (मौलवी), मायाजिह्मः (मुअज्जम), रसनारी (रोशनआरा), मोहरमः (मुहर्रम), मोहावर्तखानः (मुहब्बत खां), इत्यादीनाम्। अत्रापि प्रेरणा बाणभट्टादेव व्यासमहाभागेन प्राप्ता इति प्रतीयते।

**वर्ण्यविषयस्य वर्णनविविधता –**

शिवराजविजये वाक्ययोजनायां वर्णनेषु च बाणभट्टस्य प्रभावो दृश्यते। वर्ण्यवस्तु निर्देशप्रसङ्गे काव्यादर्शकारेणोक्तम् –

**नगरार्णव शैलर्तु चन्द्रार्कोदयवर्णनैः।**
**उद्यानसलिलक्रीडा मधुपान रतोत्सवैः।**

इत्यनुसारेण नैकविधैः वर्णनैः कविना स्वकथानकस्य विस्तारः कृतः। प्रथमविरामस्य प्रथमे निः श्वासे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अर्कोदय वर्णनं महता विस्तरेण. कृतम्। यथा हि – ''अरुण एष प्रकाश: ...... अमुमेवाहरहरुपतिष्ठन्ते।'' एवमेव द्वितीय नि:श्वासे प्रकृतिवर्णनतत्पर: कवि: अलङ्कृतवाचा अस्तं गच्छन्तं भगवन्तं भास्वन्तं वर्णयति। एवमेव झञ्झातवर्णने अपि कविना प्रत्यक्षमिव प्रस्तुतम्।

प्रकृतग्रन्थे तात्कालिक राजनीतिकधार्मिक–सामाजिकपरिस्थितीनामुत्कृष्टं वर्णनमपुलभ्यते। भौगोलिक–परिस्थितयोऽपि विस्तरेण वर्णितादृश्यन्ते। विविधपात्राणां संवादेषु नैसर्गिकताया:, सरलतायाश्च दर्शनं भवति। पात्राणां चरित्रचित्रणेऽपि कविवरो व्यास: अतीव सफलो प्रतीयते। सर्वत्रैवायं सहजतां किं वा स्वाभाविकतामश्रयते।

स्पष्टमिदं वक्तुं शक्यते यत् विविध–प्रसङ्गवर्णनावसरे कवि एतावान् सफलोऽभूत्यत्पाठकानां चक्षुषो: पुरस्तात् प्रत्यक्षमिवाभाति।

लोक शास्त्र व्यवहारनिपुणेन व्यासेन नहि प्रत्यक्षरश्लेषनिबन्धनं सुबन्धुरिव कृतं न च बाण इव प्रलम्बसमा–से जटिलतर वाक्यविन्यासे प्रयास: कृत: अस्मै तु प्रसादमधुराणि ललितललितानिभावगर्भितानि निसर्गसरलान्युपन्यासोचितानि पदान्येव रोचन्ते।

महाकविबाणभट्टानन्तरम् आधुनिकोत्कृष्टगद्यकविषु कस्यचित् कवे: रचनायां भाषाभावयो: मञ्जुलसमन्वय:, चरित्रचित्रणे अलङ्काराणां च प्रयोगे स्वाभाविकता वर्तते चेत्तर्हि श्रीमदम्बिकादत्तव्यासमहानुभावस्य रचनायामेव। अस्मादेव कारणाद् महाकविबाणस्य यद् गौरवं सप्तमशतके आसीत तदेवेदानीम् व्यासमहानुभावस्य वर्तते। अतएव ''अभिनव बाण'' इत्युपाधिना विभूष्यते अयं सुकवि:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

।।श्रीः।।

## महाकविश्रीमदम्बिकादत्तव्यास विरचितः

## शिवराजविजयः

## ( ऐतिहासिक उपन्यासः )

### प्रथम विरामस्य प्रथमो निःश्वासः

**''विष्णोर्माया भगवती यया सम्मोहितं जगत्।''**

(भागवतम् 10/1/25)

**हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते।**

(भागवतम् 10/7/31)

**प्रसङ्गः** – संस्कृतवाङ्मयस्य परम्पराम् अनुसरन् आदौ मंङ्गलमाचरति ग्रन्थकारः पण्डितः अम्बिकादत्तव्यासः। अत्र ब्रह्मणः शक्तेः प्रभाववर्णनं, खलानां विनाशं सतानां रक्षणं च निर्दिष्टमस्ति।

**व्याख्या** – विष्णोः = चराचरात्मकं प्रपञ्चं व्याप्नोति इति विष्णुः, ब्रह्म। तस्य, माया = सत्वप्रधाना शक्तिः, भगवती = समग्रषडगुणसम्पन्ना। यया = मायया, सम्मोहितम् = सम्यक् रूपेण मोहितम्, जगत्= भुवनम्। हिंस्रः – घातुकः, खलः = दुष्टः, स्वपापेन – निज-अघेन विहिंसितः = नष्ट, घातितः, साधुः = सज्जनः, समत्वेन = समभावेन भयात् विमुच्यते = निर्भयोभवति।

**व्याकरणम्** – विष्णुः-विष्लृ व्याप्तौ, विष्+नुक। माया = मीयते अनया इति माया मा+य्+टाप् (माच्छासासिभ्यो यः) भगवती = भग+मतुप्+ङीप् विहिंसितः = वि+हिंस्+क्त। खलः- खल्+अच्, खं छिद्रं लाति, ददाति इति खलः।

**भावार्थः** – भगवतो विष्णोः सत्वप्रधानैश्वर्यशालिन्या शक्त्या जगदिदं सम्मोहितं वर्तते। हिंसाशीलः जनः स्वपापेन मृत्युमुखे समायाति, साधुश्च समत्वेन निर्भयो जायते।

**मूलम्** – **''अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः।एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधाः सर्वव्यवहारस्य, इनश्च दिनस्य।अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिताः युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाऽऽश्रित्य भवति परमेष्ठिनः परार्द्धसंख्या, असावेव चर्कर्ति बर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणाः अमुमेवाहरहरुपतिष्ठन्ते धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामिति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरात् निश्चक्राम कश्चिद् गुरुसेवनपटुर्विप्रवटुः।''**

**प्रसङ्गः** – भारतीय परम्परामनुसृत्य ग्रन्थकारः उदीयमानभास्करस्य स्तवनेन कथारम्भं करोति, सूर्य एव जगतः सर्वेषां व्यापाराणाम् आधारः इति वर्णयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या:** – पूर्वस्यां = प्राच्यां, भगवत: = ऐश्वर्यशालिन:, मरीचिमालिन: = भास्करस्य, एष: = अयं पुरोदृश्यमान:, अरुण: = रक्तिम:, प्रकाश:–द्युति:, अस्तीति शेष:। एष भगवान् = सूर्य:, आकाशमण्डलस्य = नभोमण्डलस्य मणि: = रत्नम्, खेचर चक्रस्य = तारासमुदायस्य, चक्रवर्ती= सार्वभौमोनृप: आखण्डलदिश: = पुरन्दरकाष्ठाया:, कुण्डलम् = कर्णाभरणम्, ब्रह्माण्डभाण्डस्य= ब्रह्माण्ड पात्रस्य, दीपक: = प्रकाशक:, पुण्डरीकपटलस्य = अम्भोजसमूहस्य प्रियान्= नितान्तप्रिय:, कोकलोकस्य = चक्रवाकसमूहस्य, शोकविमोक: = चिन्तानिवारक:, रोलम्बकदम्बकस्य = भ्रमरवृन्दस्य, अवलम्ब: = आश्रय: सर्वव्यवहारस्य = सांसारिकाशेष व्यापारस्य, सूत्रधार: = प्रवर्तक:, दिनस्य = वासरस्य, इन: = स्वामी (अस्ति), अयमेव = भगवान् सूर्य एव, अहोरात्रं= नक्तं दिवम्, जनयति = करोति, अयमेव = दिनकर एव, वत्सरम्= अब्दम् द्वादशसु भागेषु = चैत्रादिमासरूपेषु विभनक्ति = विभजते, अयमेव = रविरेव षण्णामृतूनाम्= वसन्तग्रीष्मादिषड्ऋतूनाम्, कारणं = हेतु:, एष एव = भास्कर एव, उत्तरं = उदीचि, दक्षिणं = अवाचीं च, अयनं = स्वीयमार्गम् अङ्गीकरोति = स्वीकरोति, एनेनैव = सूर्येणैव, युगभेदा: = युगप्रकारका: सम्पादिता: = कृता:, एनेनैव = भास्करेणैव, कल्पभेदा: = एक सहस्रयुगात्मका कालभेदा:, कृता: = विहिता:, एनमेव = सूर्यमेव, आश्रित्य = अवलम्ब्य परमेष्ठिन: = विधातु:, परार्द्धसंख्या = अन्तिमासंख्या, असावेव = सूर्य एव जगत् = निखिलं भुवनं, चर्कर्ति = पुन: पुन: करोति, बर्भर्ति = पुन: पुन: भरति, जर्हर्ति = पुन: पुन: हरति च, वेदा: = ऋग्यजु: सामथर्वाभिधा:, एतस्यैव = भगवतो भास्करस्यैव, वन्दिन: = स्तुतिवाचका:, गायत्री = एतन्नाममहामन्त्र:, अमुमेव = सूर्यमेव, गायति = गानं करोति, ब्रह्मनिष्ठा = वेदपारगा:, ब्राह्मणा:= विप्रा:, अहरह: = प्रतिदिनम्, अमुमेव = आदित्यमेव, उपतिष्ठन्ते = उपासते धन्य:–पूज्य:, एष: = सूर्य:, श्रीरामचन्द्रस्य = राघवस्य, कुलमूल: = वंश–प्रवर्तक:, विश्वेषाम् = सकलजीवानाम्, प्रणम्य = नमस्करणीय:, उदेष्यन्तम्=उदीयमानम्, भास्वन्तम् = अर्यमणं, प्रणमन् = प्रणामंविदधन्, कश्चिद् कोऽपि, गुरुसेवन पटु: = गुरुसेवा कुशल:, विप्रबटु: = ब्राह्मण बालक: निजपर्णकुटीरात्= स्वकीयोटजात्, निश्चक्राम = निरगच्छत्।

**व्याकरणम्** – खे नभसि चरन्तीति खेचरा:, तेषांचक्र:, खेचरचक्र: तस्य खेचरचक्रस्य। पुण्डरीकाणां पटलं पुण्डरीकपटलं, तस्य पुण्डीकपटलस्य रोलम्बानां कदम्ब:, रोलम्ब कदम्ब: तस्य रोलम्बकदम्बस्य। अहश्चरात्रिश्च अहोरात्रम्। पर्णानां कुटीर: पर्णकुटीर:, निजस्य पर्ण कुटीर: निजपर्णकुटीर: विप्रश्चासौ वटु विप्रवटु:। गुरुसेवने पटु: गुरुसेवनपटु:।

विभनक्ति – वि+भञ्ज्+लट्+तिप्। आश्रित्य–आङ्+श्रिञ्+क्त्वा>ल्यप्। जनयति–जन+ णिच्+लट्+तिप्। उपतिष्ठन्ते–उप+स्था+लट्+झ। प्रणमन्–प्र+नम्+शतृ। निश्चक्राम–निर्+क्रमु+लिट्। जर्हर्ति–हृञ्+यङ्+लट्+तिप्। गायति– गै+लट्+तिप्।

**भावार्थ:** – प्राच्यां दिशि सूर्यस्य रक्तिमालोको वर्तते। भगवान् भास्कर: एव नभोमण्डलस्य मणि:, तारकाणां सम्राट्, सकलब्रह्माण्डस्य दीपक:, भ्रमराणामवलम्ब:, समग्रलोकव्यवहारस्य नियन्ता च वर्तते। सूर्येण एव समयस्य विविधा:, विभागा: उत्पद्यन्ते। ऋतूनां कारणमपि दिनकर: एव वर्तते। एष एव अहोरात्रं जनयति। वेदा: गायत्र्युपासका च अर्यमणमेव बिभर्ति। दिनकर एव रघुकुलस्य कुल पुरुष:। एष एव सर्वेषां जनानां प्रणम्यो वर्तते। तादृशं उदीयमानं भास्करं प्रणामं कुर्वन् विप्रवटु: निजपर्णोटजात् निरगच्छत्।

**'मूलम्'** – **''अहो। चिररात्राय सुप्तोऽहम्, स्वप्नजाल–परतन्त्रेणैव महान् पुण्यमय: समयोऽतिवाहित:,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**सन्ध्योपासन-समयोऽयमस्मद्गुरुचरणानाम् तत् सपदि अवचिनोमि कुसुमानि'' इति चिन्तयन् कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय, पुष्पावचयं कर्त्तुमारेभे।**

**प्रसङ्ग** – अत्र विप्रवटुः खिन्नतामनुभवन् रुत्वरं पुष्पाणि चेतुं तत्परो भवति।

**व्याख्या** – अहो ! = विस्मयान्विते विषादे, चिररात्राय = चिरकालं यावद्, सुप्तः = शयितः, अहं = ब्राह्मण बालकः, स्वप्नजालपरतन्त्रेण = निद्रायत्तेन एव = निश्चयेन, महान् पुण्यमयः = अतिपुण्य समन्वितः, समयः = कालः अतिवाहितः = व्ययीकृतः, अयम् = एषः, अस्मद् गुरुचरणानां = मदीय गुरुपादानाम्, सन्ध्योपासनसमयः = सन्ध्यासम्पादनकालः तत् = तस्मात्, सपदि=सत्वरम्, कुसुमानि= प्रसूनानि, अवचिनोमि= संकलयामि, इति = इत्थं, चिन्तयन्=मनसि विचारयन्, एकम्= एकसंख्यकम्, कदलीदलं= रम्भापर्णम्, आकुञ्च्य = आच्छिद्य तृणशकलैः = तृणखण्डैः, सन्धाय = सम्मेल्य, पुटकं = कुसुम संग्रहपात्रम्, विधाय = सम्पाद्य, पुष्पावचयं = कुसुमचयनम्, कर्तुम्= विधातुम्, आरेभे = आरभत।

**व्याकरणम्** – स्वप्न एव जालम्, तस्य परतन्त्रेण स्वप्नजालपरतन्त्रेण (तत्पु.) कदल्याः दलम् कदलीदलम्। तृणानां शकलाः तृणशकलास्तैः तृणशकलैः। पुष्पाणाम् अवचयः पुष्पावचयः तं पुष्पावचयम्। पुण्यमयः = पुण्य+मयट्। सुप्त = स्वप्+क्त। अवचिनोमि =अव्+चिञ्+लट्। चिन्तयन्=+चिन्त्+शतृ। आकुञ्च्य– आ+कुञ्च्+क्त्वा=ल्यप्। सन्धय– सम्+धा+क्त्वा=ल्यप्। आरेभे–आ+रम्भ्+लिट्+तिप्।

**भावार्थः** – अरे। चिरकालं यावद् शयितोऽहम्। निद्रायत्तेन मया अति पुण्यमय काल व्ययीकृतः। सम्प्रति मम गुरुपादानां संध्यावन्दनस्य समयो वर्तते अतः झटिति पुष्पावचयनं करोमीति विचारयन् स वटु कदलीपत्रेण एकं द्रोणं निर्माय पुष्पचयने संलग्नोऽभूत्।

**मूलम्** – **'वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी, वयसा षोडश- वर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।'**

**प्रसङ्गः** – अत्र ग्रन्थकारः ब्रह्मचारिणः वर्णनं करोति।

**व्याख्या** – असौ =अयम्, पूर्ववर्णितः, वटुः = ब्रह्मचारी, आकृत्या =आकारेण, सुन्दरः =शोभनः, वर्णेन=कान्त्या, गौरः=धवलवर्णः, जटाभिः=सटाभिः, ब्रह्मचारी =वटुः, वयसा =अवस्थया, षोडशवर्षदेशीयः=षोडशवर्षीयः, कम्बुकण्ठः=शंखग्रीवः आयतललाटः =विस्तीर्णमस्तकः, सुबाहुः=शोभनभुजः, विशाल लोचनः दीर्घायतनयनः, च=पुनः, आसीत्।

**व्याकरणम्** – कम्बुरिव कण्ठो यस्य सः कम्बुकण्ठः। आयतं ललाटं यस्य सः आयतललाटः। शोभनौ बाहू यस्य सः सुबाहुः। विशाले लोचने यस्य सः विशाल लोचनः।

**भावार्थः** – सः पूर्ववर्णित वटुः आकारेण सुन्दरः, गौरवर्णयुक्तः, जटाभिः ब्रह्मचारी षोडशवर्षदेशीयः, शंखग्रीवः, शोभनभुजः दीर्घललाट फलक आयतनेत्रश्च आसीत्।
षोडशवर्ष देशीयः– षोडशवर्ष+देशीयः। जटाभिः–जटा+भिस् 'इत्थंभूतलक्षणे' इत्यनेन तृतीया। ब्रह्मचारी– ब्रह्म+चर्+णिनि।

**मूलम्** – **कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्रिकुल- कूजित-पूजितं पयःपूरितं सर-आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनित-दिगन्तरः फलपटलाऽऽस्वादचपलित-चञ्चु-पतङ्गकुलाऽऽक्रमणाधिकविनत-शाख-शाखि-समूह-व्याप्तः सुन्दरकन्दरः पर्वत-खण्ड आसीत्।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – पर्णोटजं परितः स्थितस्य रम्यवातावरणस्य वर्णनं करोति ग्रन्थकारः।

**व्याख्या** – कदलीदलकुञ्जायितस्य=रम्भापर्णकुञ्जीभूतस्य, एतत्कुटीरस्य=पर्णोटजस्य, समन्तात्=परितः, पुष्पवाटिका=कुसुमोद्यानम्, पूर्वतः=प्राच्यां परमपवित्रपानीयं=नितान्तपूतजलम्, परसहस्रपुण्ड-रीकपटल-परिलसितं=सहस्राधिकश्वेताम्बुजसमूहोपशोभितम्, पतत्रिकुल कूजित-पूजितं=पक्षिगण शब्दराजितम्, पयः पूरितम्=जलभरितम्, सरः=जलाशयः, आसीत्=विद्यतेस्म। दक्षिणतः=दक्षिण दिशि च एकः, निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः=वारिप्रवाहझर्झरनादनिनादित दिगन्तरः, फलपटलाऽऽस्वादचपलितचञ्चु-पतङ्गकुलाऽऽक्रमणाधिक-विनतशाख-शाखिसमूहव्याप्तः= फलसमूहभक्षण-चञ्चलमुखभागपतङ्गनिवहाक्रमणातीवनम्रीभूशिखावृक्ष-समावृतः, सुन्दर-कन्दरः=रमणीयगुहः, पर्वतखण्डः=शिलाभागः, आसीत् वर्तते स्म।

**व्याकरणम्** – कदलीदलकुञ्जायितस्य-कदलीनां दलैः कुञ्जायितं तस्य। परम पवित्रपानीयं-परमंपवित्रं पानीयं यस्य तत्। पयः पूरितम्-पयसापूरितम् पुष्पवाटिका- पुष्पाणां वाटिका। निर्झरझर्झरध्वनि ध्वनित दिगन्तरः-निर्झरस्य झर्झर ध्वनिः तेन ध्वनितानि दिगन्तराणि येन सः। फलपटलाऽऽस्वादचपलित चञ्चवः- फलानांपटलं तस्य आस्वादः तेन चपलिताः चञ्चवः। पर्वतखण्डः- पर्वतस्य खण्डः। कुञ्जायित-कुञ्ज्+क्यङ्+क्त (कर्तुः क्यङ् सलोपश्च) पूर्वतः-पूर्व+तसिल् (तसिलादिष्वाकृत्वसु चः) चपलित-चपल+इतच्। विनत- वि+नम+क्त। शाखिनः- शाखा+इनि।

**भावार्थः** – रम्भापर्णैः आवृतत्वात् कुञ्जमिव प्रतीयमानोटजं परितः कुसुमोद्यानमासीत्। प्राच्यां नितान्तपूतजलेन पूरितः, सहस्राधिकश्वेताम्बुज युक्त खगकलरवेण कुजितः सरः आसीत्। दक्षिण दिशायां झर्झर ध्वनिना मुखरितः, चपलचञ्चुखग समूहाऽऽक्रमणेनश्रीभूतवृक्ष समावृतः पर्वतखण्डः आसीत्।

**मूलम्** – **यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति, तावत् तस्येव सतीर्थ्योऽपरस्तत्स-मानवयाः कस्तूरिका-रेणु-रुषित इव श्यामः, चन्दन-चर्चित-भालः, कर्पूरागुरुक्षोदच्छुरित-वक्षोबाहुदण्डः, सुगन्ध-पटलैरुन्निद्रयन्निव निद्रा-मन्थराणि कोरकनिकुरम्बकान्तराल सुप्तानि मिलिन्द-वृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्-**

**प्रसङ्गः** – कुसुमसंग्रहे संलग्नं गौरवर्णब्रह्मचारिणं वर्जयन्तं कृष्णवटुं ग्रन्थकारः इत्थंकारं वर्णयति।

**व्याख्या** – यावत् =यावत्कालपर्यन्तम्, एषः =पूर्ववर्णितः, ब्रह्मचारी=ब्रह्मव्रती, वटुः=ब्रह्मचारी, अलिपुञ्जम्=+भ्रमरकुलम्, उद्धूय =निवार्य, कुसुमकोरकान् = पुष्पमुकुलान्, अवचिनोति=सङ्कलयति, तावत् =तस्मिन्नेवकाले, तस्यैव =वटोरेव, सतीर्थ्य =सहपाठी, अपरः= अन्यः, तत्समानवयाः =तत्समवयस्कः, कस्तूरिका, रेणुकषितः = मृगनाभिरजश्छुरितः, इव =यथा, श्यामः =श्यामलवर्णः, चन्दन चर्चितभालः =गन्धसारलिप्तललाटः, कर्पूरागुरुक्षोदच्छुरितवक्षो बाहुदण्डः=घनसारगरुचूर्ण लिप्तवक्षःस्थल भुजदण्डः। सुगन्ध पटलैः=सौरभसमूहैः, उन्निद्रयन्निव=जागरयन्निव, निद्रामन्थराणि=तन्द्रालसितानि, कोरकनिकुरम्बकान्तरालसुप्तानि=कलिकासमूहाभ्यन्तरनिद्राधिगतानि, मिलिन्दवृन्दानि= भ्रमरसमूहानि, झटिति=शीघ्रम्, समुपसृत्य=समागत्य, निवारयन=वर्जयन्, गोरवटुम्=गौरवर्ण ब्रह्मचारिणम्, एवम्=अनेनप्रकारेण, अवादीत्=अवोचत्।

**व्याकरणम्** – ब्रह्मवेदः, तदध्ययनाय व्रतमपि ब्रह्म, तच्चरति करोतीति ब्रह्मचारी। अलीपुञ्जम्-अलीनां पुञ्जम्। कुसुमकोरकान्-कुसुमानां कोरकान्। सतीर्थ्य-समाने तीर्थे गुरौवसतीति सतीर्थ्यः। कस्तूरिका-रेणुरुषितः-कस्तूरिकायाः रेणुः कस्तुरिकारेणुः ताभिरुषितः। चन्दन-चर्चितभालः-चन्देनेन चर्चितंभालं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यस्य सः। कोरकनिकुरम्बकम्=कोरकाणां निकुरम्बकम्। मिलिन्दानांवृन्दानि-मिलिन्दवृन्दानि। उद्धूय-उद्+धूञ्+ल्यप्। अवचिनोति-अव्+चिञ्+लट्+तिप्। समुपसृत्य-सम्+सृज्+ल्यप्। निवारयन्- नि+वृ+णिच्+शतृ। अवादीत्-वद्+लुङ्+तिप्।

**भावार्थः** – यदा सः गौरब्रह्मचारी भ्रमरसमूहं अपाकृत्य पुष्पचेतुं सज्जः भवति तदानीमेव तस्य सहपाठी श्यामवटु झटिति तं निवारयति। सः श्यामवटुः तस्य समवयस्कः, श्यामवर्णः चन्दन लिप्तललाटः कर्पूरागरुचूर्णलिप्तवक्षोभुजयुगलः, सौरभसमूहैः तन्द्रालसितानि कलिकाभ्यन्तर निद्राधिगतानि भ्रमरसमूहानि जागरयन्निव असीत्।

**मूलम्** – **''अलं भो अलम्। मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्र नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यावनत्रासेन निःशब्दं रुदतीम्, परमसुन्दरीम्, कलित-मानव-देहामिव सरस्वती सान्त्वयन् मरन्दमधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया यामत्रयमनैषीः, सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत् परिमार्गणीयान्येतस्याः पितरौ गृहं च-''**

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोऽपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात उभयोर्दृष्टिः।

**प्रसङ्गः** – विलम्बेन उत्थितं गौरवटुं पुष्पावचयनेन निवारयन् सूचयति श्याम वटु यत् मया पूर्वमेवावचितानि पुष्पाणि।

**व्याख्या** – अलंभोअलम्। =भो सुहृद्वर। कुसुमावचयेनालम्, मयैव =श्यामवटुना, पूर्वम्=आदौ, कुसुमानि=प्रसूनानि, अवचितानि=संचितानि, त्वं तु=गौरवटुस्तु, रात्रौ=निशायाम्, चिरं=चिरकालं यावत् अजागरी=न सुप्तः, इति =अस्मात् कारणात्, क्षिप्रम्=शीघ्रम् न =नैव उत्थापितः=जागरितः, गुरुचरणाः=गुरवः, अत्र=इह तडागतटे=सरस्तीरे, सन्ध्यां=उपासनाम्, उपासते=सम्पादयति तेषां=गुरुचरणानाम्, समीपे=निकटे, मया=श्यामबटुना निखिला=समस्ताः, सामग्री=पूजन सामग्री, संस्थापिता=समुपकल्पिता, यां=कन्यां, सप्तवर्षकल्पाम्=सप्तवर्षदेशीयाम्, यावनत्रासेन=यवनभयेन, निःशब्दम्=शब्दरहितम्, रुदतीम्=विलपन्तीम्, परमसुन्दरीम्=अनिन्द्यलावण्यवतीम्, कलितमानवदेहाम्=धृतनरशरीराम्, इव=यथा, सरस्वतीम्=शारदाम्, सान्त्वयन्=+समाश्वासयन्, मरन्दमधुराः=पुष्परससरसाः, अपः=जलानि पाययन्=पानंकारयन्, कन्दखण्डानि=कन्दलवान्, भोजयन्=खादयन्, त्वम्=गौरवटुः, त्रियामायाः=निशायाः, यामत्रयम्=प्रहरत्रयम्, अनैषी=अत्यवाहयः, सा इयम्=सा बालिका, अधुना=सम्प्रति, स्वपिति=शेते, उद्बुद्ध्य=उन्निद्र्य च, पुनः=भूयः तथैव=पूर्ववदेव, रोदिष्यति=विलपिष्यति, तत्=तस्मात्, एतस्याः=बालिकायाः, पितरौ=माता पिता च, गृहं च=गेहंच, परिमार्गणीयानि=अन्वेष्टव्यानि, इति=इत्थम्, संश्रुत्य=समाकर्ण्य, उष्णम्=प्रतप्तम्, निःश्वस्य=उच्छ्वस्य, यावत्=यदैव, सोऽपि=गौरवटुरपि, किञ्चित्, वक्तुम्=कथयितुम्, इयेष=इच्छतिस्म, तावत्=तावत्कालपर्यन्तं, अकस्मात=सहसा, पर्वतशिखरे अचलशृङ्गे, उभयोः=तयोः दूयोः, दृष्टि=वीक्षणम्, निपपात=न्यपतत्

**व्याकरणम्** – तडागतटे-तडागस्य तटे। यावनत्रासेन-यवनेभ्यः आगत यावनः, यावनश्चासौत्रासः, तेन। कलितमानवदेहाम् कलितः मानवो देहः यया सा ताम्।

अवचितानि-अव+चिञ्+क्त। अजागरी-जागृ+लुङ्+तिप् (म.पु.ए.व.)। उत्थापितः- उत्+स्था+ पुक्+निच्+क्त। रुदतीम्-रुद्+शतृ+ङीप्। अनैषीः- नी+लुङ्+सिप्। परिमार्गणीयानि-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

परि+मृज्+अनीयर्। संश्रुत्य-सम्+श्रु+ल्यप्। निःश्वस्य निः+श्वस्+ल्यप्। वक्तुम्-वच्+तुमुन्। इयेष-इष्+लिट्+तिप् निपपात-नि+पत्+लिट्+तिप्।

भावार्थ - श्यामवटुः गौरवटुं निवारयन् कथयति-विरम तावत् मया पूर्वमेव अवचितानि पुष्पाणि। त्वं रात्रौ सुचिरं जागृतोऽभूः अतः नोत्थापितः असि, गुरुचरणानां समीपे निखिला सामग्री निहिता वर्तते। यवनहतकाद् रक्षिता कन्या इदानीं स्वपिति। अतः तस्याः पितरौ अन्वेषणीयौ।

मूलम् - **तस्मिन् पर्वते आसीदेको महान् कन्दरः तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिम् अङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूजयन्ति प्रणमन्ति स्तुवन्ति च। तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति विश्वसन्ति स्म। स एवायमधुना शिखरादवतरन् ब्रह्चारि-वटुभ्यामदर्शि।**

प्रसङ्गः - पर्वत गुहायां तपोनिरतं योगिराजं वर्णयति ग्रन्थकारः।

व्याख्या - तस्मिन्=पूर्वोक्ते, पवते=शैलशिखरे, आसीत्=अवर्तत, एकः-एक संख्यकः, महान्=विशालः, कन्दरः=गुहा, तस्मिन्नेव=गुहायामेव, एकःमहामुनि=महर्षिः, समाधौ=योगे, तिष्ठतिस्म=संस्थित आसीत्। कदा=कस्मिन्काले, सः=महर्षिः, समाधिं=योगम्, अङ्गीकृतवान्=स्वीकृतवान्। इति, कोऽपि=कश्चिदपि, न वेत्ति न जानाति। ग्रामणीग्रामीणग्रामाः=ग्रामधिपग्रामवासिनां समूहः, समागत्य=समेत्य, मध्येमध्ये=अन्तराले अन्तराले, तम्=योगिराजम्, पूजयन्ति=पूजां कुर्वन्ति, प्रणमन्ति=नमस्कुर्वन्ति, स्तुवन्ति=स्तुतिं कुर्वन्ति, तं=योगिराजम्, केचित्=केचन जनाः, कपिलः=एतन्नामा मुनिः, इति=इत्थं, अपरे=अन्यजनाः, लोमशः=एतन्नामा, इतरे=अपरे, जैगीषव्य इति, मार्कण्डेय इति=इत्यादिभिः विविधनामभिः, विश्वसन्तिस्म= विश्वासं कुर्वन्ति स्म, स एव=योगिराज एव, अयम्=एषः अधुना=साम्प्रतम्, शिखरात्=अचलश‍ृङ्गात् अवतरन्=अवरोहन्, ब्रह्मचारिबटुभ्याम्=आश्रमवासिशिष्याभ्याम् अदर्शि=दृष्टः

व्याकरणम् - ग्रामणीग्रामीणग्रामाः-ग्रामण्यश्च ग्रामीणाश्च तेषां ग्रामाः। महान् चासौ मुनि-महामुनिः। वेत्ति-विद्+लट्+तिप्। ग्रामणी-ग्राम+नी+क्विप्। समागत्य-सम्+आ+गम्+ल्यप्। अदर्शि दृश्+लुङ् (त) आत्मनेपद।

भावार्थः - तस्मिन् पर्वते गुहायामेकः महामुनिः तपोरतः आसीत्। सः समाधिलीनः कदा जातः इति केनापि न ज्ञायते। तं महामुनिं केचन कपिलनाम्ना, केचन लोमशनाम्ना, केचन जैगीषव्य केचन च मार्कण्डेयनाम्ना विश्वसन्ति स्म। स एव योगिराज इदानीं पर्वतात् अवतरन् वटुभ्यां दृष्टः।

मूलम् - **''अहो। प्रबुद्धो मुनिः। प्रबुद्धो मुनिः। इत एवागच्छति, इत एवागच्छति, सत्कार्योऽयम्, सत्कार्योऽयम्'' इति तौ सम्भ्रान्तौ बभूवतुः। अथ समापितसन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया नित्यनियम-सम्पादनाय प्रयाते गोरवटौ, छात्रगण-सहकारेण प्रस्तुतासु च स्वागत-सामग्रीषु, ''इत आगम्यतां सनाथ्यतामेष आश्रमः'' इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत्य तन्निर्दिष्टकाष्ठपीठं भास्वानिवोदय-गिरिमारुरोह, उपाविशच्च।**

प्रसङ्गः - अचलश‍ृङ्गात् अवरोहन्तं मुनिराजम् अवलोक्य तपोवनवासिनः तं महामुनिं प्रणमतुम् उद्यताः इत्यस्य वर्णनं करोति कविः।

व्याख्या - अहो! =आश्चर्यम्, प्रबुद्धः=जागृतः, मुनिः=ऋषिः, इत एव आश्रमाभिमुखमेव, आगच्छति=आयाति, सत्कार्योऽयम्=सत्कारार्होऽयं महर्षिः, इति=एवम्, तौ=ब्रह्मचारिणौ,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सम्भ्रान्तौ=क्षुभितौ बभूवतुः=जातौ।

अथ=ततः परम्, समापिता=सम्पादिता, संध्यवन्दनादय=सन्ध्यापूजनादय, क्रियाः=कर्माणि, सः=तस्मिन्, समायाते=समागते गुरौ=मुनौ, तदाज्ञया=मुनेराज्ञया, नित्यनियमसम्पादनाय=सन्ध्या वन्दनादिविधातुम्, प्रयाते=गते, गौरवटौ=गौरवर्णब्रह्मचारिणि छात्रगण सहकारेण= शिष्यसमुदायसहाय्येन, प्रस्तुतासु च =समुपकल्पितासु च, स्वागत सामग्रीषु=उपचार द्रव्येषु, इतः=अत्र, आगम्यताम्=आयातु, सनाथ्यताम्=समलङ्क्रियताम्, एषः=अयम्, आश्रमः= तपस्विनां स्थानम्, इति=एवम्प्रकारेण, सप्रणामम्=प्रणामपुरस्सरम्, अभिगम्य=समागत्य, वदत्सु=कथयत्सु, निखिलेषु=समुपस्थितेषु सर्वेषु, योगिराजः=महामुनिः, आगत्य=समागत्य, तन्निर्दिष्टकाष्ठपीठम्=उदयाचलम्, इव=यथा, आरुरोह=अधिशिश्रिये, उपाविशत् च =आसितवान् च।

**व्याकरणम्** – नित्यनियमसम्पादनाय–नित्या ये नियमाः, तेषां सम्पादनाय। छात्रगणः–छात्राणां गणः। समापितसंन्ध्या वन्दनादिक्रिये–समापिता सन्ध्यावन्दनादि क्रिया येन सः तस्मिन्।

समायाते– सम्+आ+या+क्त, ''यस्य च भावेनभावलक्षणम्'' अनेन सप्तमी। समापिता– सम्+आप्+णिच्+क्त+टाप्। अभिगम्य– अभि+गम्+क्त्वा>ल्यप्। प्रस्तुतासु–प्र+स्तु+क्त+टाप्

**भावार्थः** – अहो! महर्षि जागृतः, नितरां स्वागतयोग्यः स इत एव समागच्छति इति उक्तवत्तौ ब्रह्मचारिणौ भावविह्वलतामधिगतौ। ततः सन्ध्यावन्दनादिक्रियां समाप्य समागते गुरोराज्ञया नित्यनियम सम्पादनाय गतवति गौरवटौ, छात्रगणसहयोगेन प्रस्तुतस्वागत सामग्रीषु सप्रणाममत्रागम्यताम् इति वदत्सु सर्वेषु महर्षि उदयगिरि सूर्यमिव गुरुसंकेतितकाष्ठपीठम् आरुह्य उपाविशत।

**मूलम्** – **तस्मिन् पूज्यमाने, ''योगिराडुत्थित'' इति ''आयात'' इति च आकर्ण्य कर्णपरम्परया बहवो जनाः परितः स्थिताः। सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीरां च वाचं वर्णयन्तश्चकिता इव सञ्जाताः।**

**अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम् तावत् कुटीराद् अश्रूयत तस्या एव बालिकायाः सकरुणरोदनम्।**

**ततः ''किमिति? कुत इति? केयमिति? कथमिति?'' पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामवटुमादिश्य कथितम्–**

**प्रसङ्गः** – योगिराजं परितः स्थिताः जनाः तस्य सुघटितशरीरं साश्चर्येण प्रशंसन्ति। तदानीमेव बालिकायाः रोदनस्वरमायाति।

**व्याख्या** – तस्मिन्=योगिराजे, पूज्यमाने=अर्च्यमाणे, योगिराट्=महामुनिः उत्थितः=उद्बुद्धः, इति=एवम्, आयातः=आगतः, इति च, कर्णपरम्परया=श्रुतिपरम्परया, आकर्ण्य=श्रुत्वा, बहवोजनाः=अनेके मानवाः, परितः=समन्तात्, स्थिताः=समुपस्थिताः, सुघटितम्=सुनिर्मितम्, सान्द्राम्=घनाम्, जटां=सटाम्, विशालानि=आयतानि, अङ्गानि=अवयवादीनि, अङ्गारप्रतिमे=स्फुल्लिंगसदृशे, नयने=नेत्रे, मधुरां=मिष्ठाम्, गम्भीरां=गभीराम्, वाचं=वणीम्, वर्जयन्तः=प्रशंसयन्तः, चकिताः=आश्चर्ययुक्ताः, सज्जाताः=बभूवुः।

अथ=अनन्तरम्, योगिराजं=योगिवरं, सम्पूज्य=समर्च्य किमपि=किञ्चिदपि, आलपितुं= कथयितुम्,यावत्=यावत्काल पर्यन्तम्, ईहितम्=चेष्टितम्, तावत्=तस्मिन् समये, कुटीरात् उटजात्, तस्या एव=कन्याया एव, सकरुणरोदनं=सशोकविलापं अश्रूयत=श्रुतम्।

ततः=तदनन्तरम्, किमिति=किमर्थक्रन्दनमिति, कुत इति=कस्मादिति, केयमिति=कैषा इति,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कथमिति=किं कारणमिति, पृच्छापरवशे=प्रश्नपरतन्त्रे, योगिराजे=योगिवरे, ब्रह्मचारिगुरुणा=गौरश्यामवटुगुरुणा, बालिकां=विलापकारिणीं कन्यकाम, सान्त्वयितुं=समाश्वासयितुम्, श्यामवटुं=श्यामवर्ण ब्रह्मचारिणम्, आदिश्य=आज्ञाप्य, कथितम्=अग्रेवक्ष्यमाणम् वाक्यमुक्तम्

**व्याकरणम्** – योगिनां राजा इति योगिराट्। अङ्गारप्रतिमे–अङ्गार: प्रतिमा उपमानं ययो: ते। सकरुणम्–करुणया सहितम्। पृच्छापरवशे–पृच्छाया: परवश:, तस्मिन्। ब्रह्मचारिगुरुणा–ब्रह्मचारिणां गुरु: इति ब्रह्मचारी गुरु:, तेन।

योगिराट्– योगिन्+राज+क्विप्। पूज्यमाने–पूज्+य+शानच्। उत्थित:– उत्+स्था+क्त। वर्णयन्त:–वर्ण+णिच्+शतृ सम्पूज्य– सम्+पूज्+क्त्वा>ल्यप्। ईहितम्–ईह+क्त। अश्रूयत– श्रु+कर्मणियक्+लङ् प्र.पु.ए.व.। आदिश्य–आ+दिश्+क्त्वा>ल्यप्।

**भावार्थ:** – योगिराजस्य पूजाकाले एव ''योगिराज उत्थित, इत: आयात:''। इति श्रुत्वा बहव: जना: समुपस्थिता: अभूवन्। तदीयं सुघटित शरीरं, सान्द्रां सटां, विशालावयवानि, मधुरगभीराञ्चवाणीं वर्णयन्त: जना: चकिता: अभवन्। तदनन्तरं योगिराजं समर्च्य यदा गुरु: किमपि विवक्षति स्म तदैव उटजस्थितबालिकाया: करुणविलाप: श्रुत:। ब्रह्मचारिगुरु श्यामवटुं तां बालिकां सान्त्वयितुम् आदिश्य अकथयत।

**मूलम्** – **''भगवन्! श्रयूतां यदि कुतूहलम्। ह्य: सम्पादितसायन्तनकृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परित: समासीनेषु छात्रवर्गेषु, धीरसमीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु, समुदिते यामिनी-कामिनी-चन्दनबिन्दौ इव इन्दौ, कौमुदीकपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्ता शुश्रूषुषु इव मौनमाकलयत्सु पतङ्ग-कुलेषु, कैरवविकास-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान-नि:श्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम्।''**

**प्रसङ्ग:** – अत्रोटज स्थितकन्यकाया: सकरुणरोदनम् आकर्ण्य प्रश्न परवशं योगिराजं लक्ष्यीकृत्य कथयति आचार्य:

**व्याख्या** – भगवन्। = महामुने!, यदि=चेत्, कुतूहलम्=कौतुकम्, तर्हि, श्रूयताम्=आकर्ण्यताम्, ह्य:=गतवासरे, सम्पादितसायन्तनकृत्ये=विहित सान्ध्यकार्ये, अत्रैव=अस्मिन्नेव स्थाने, कुशास्तरमधितिष्ठते=दर्भासनसंस्थिते मयि=मुनौ, परित:=समन्तात्, समासीनेषु=समुपविष्टेषु, छात्रवर्गेषु=शिष्यसमुदायेषु, धीरसमीरस्पर्शेन=मन्दपवनसम्पर्केण, मन्दमन्दम्=शनै: शनै:, आन्दोल्यमानासु=सञ्चाल्यमानासु व्रततिषु=लतासु, समुदिते=उदयमधिगते, यामिनीकामिनीचन्दनबिन्दौ=रजनीकान्ताललाट तिलके, इव=यथा, इन्दौ=चन्द्रमसि, कौमुदीकपटेन=ज्योत्स्नाव्याजेन, सुधाधारामिव=पीयूषप्रवाहमिव, वर्षति=वृष्टिं कुर्वति, गगने=नभे, अस्मन्नीतिवार्ताम्= ब्रह्मचारिगुरुनयकथनम्, शुश्रूषुषु=श्रोतुमिच्छुषु, इव=यथा, मौनमाकलयत्सु=तूष्णींधारयत्सु, पतङ्गकुलेषु पक्षिसमूहेषु, कैरवविकासहर्षप्रकाशमुखरेषु=कुमुदप्रफुल्लनमोदा-विर्भावशब्दायमानेषु, चञ्चरीकेषु=भ्रमरेषु, अस्पष्टाक्षरम्=अव्यक्तवर्णम्, कम्पमाननि:श्वासम्=कम्पितोच्छवासम्, श्लथकण्ठम् स्तम्भितगलम्, घर्घरितस्वनम्=घर्घरध्वनियुक्तम्, चीत्कारमात्रं=चीत्काररूपम्, दीनतामयम्=कातरतासमन्वितम्, अत्यवधानेन=विशेषध्यानेन, श्रव्यत्वात्=श्रोतव्यत्वात्, अनुमितदविष्ठतम्=कल्पित दूरत्वम्, क्रन्दनं=रोदनम्, अश्रोषम्= अकर्णयम्।

**व्याकरणम्** – कुशास्तरणम्–कुशानाम् आस्तरणम्। यामिनीकामिनीचन्दनबिन्दौ–यामिनी एव कामिनी तस्या:



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चन्दनबिन्दौ। अस्मन्नीतिवार्ता–अस्माकं नीतिवार्ता। पतङ्गकुलेषु पतङ्गानां कुलेषु। कैरवाविकासहर्ष प्रकाश मुखरेषु–कैरवाणां विकास: कैरवविकास: तेन हर्ष प्रकाश:, तेन मुखरेषु। अनुमितदविष्ठतम्– अनुमिता दविष्ठता यस्य तत्।

श्रूयताम्–श्रु+कर्मवाच्य लोट् प्र.पु.ए.व.। सायन्तनम्– सायम्+तुट्+ट्युल्। अधितिष्ठते– अधि+स्था+क्त। समासीनेषु–सम्+आस् (उपवेशने)+शानच्। शुश्रूषु:–श्रु+सन्+उ (सनाशंसभिक्ष उ:)। आकलयत्सु–आ+कल+णिच्+शतृ।

**भावार्थ:** – महर्षे !श्रूयताम्। गतदिवसे सायंकाले सन्ध्यां सम्पाद्य छात्रै:परिवृत: आसम्। सर्वत्र शान्तिप्रदायकं आनन्दपूर्णं वातवरणमासीत्। तदानीमेव दूरत: श्रूयमाणं करुणक्रन्दनम् अश्रौषम्। तत् करुणक्रन्दंन चीत्कारमयं रुद्धकण्ठमनुमितदूरञ्च आसीत्।

**मूलम्** – **तत्क्षणमेव च ''कुत इदम? किमिदमिति दृश्यतां ज्ञायताम्'' इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भयभीता सवेगमत्युष्णं दीर्घं निश्वसती मृगीव व्याघ्राऽऽघ्राता, अश्रुप्रवाहै: स्नाता, सवेपथु: कन्यकैका अङ्के निधाय समानीता। चिरान्वेषणेनापि च तस्या: सहचरी सहचरोवा न प्राप्त:। तां च चन्द्रकलयैव निर्मिताम्, नवनीतेनेव रचिताम्, मृणालगौरीम्, कुन्दकोरकाग्रदतीं सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारितं निरोद्धुं नयनवाष्पाणि।**

**प्रसङ्ग:** – गुरोराज्ञया रोदनध्वनिकारणमन्वेष्टुं गतेषु वटुकेषु एक: वटु: अश्रुप्रवाहस्नातां कम्पमानामेकां बालिकामानयति, इति वर्णयति ग्रन्थकार:।

**व्याख्या** – तत्क्षणमेव=तत्कालमेव, कुत:–कस्मात्स्थानात्, इदम्=एतत्, किमिदम्=किंकारणम्, इति=इत्थम्, दृश्यताम्=विलोक्यताम्, ज्ञायताम्=अवगम्यताम्, इति=एवम्, आदिश्य=आज्ञाप्य, छात्रेषु=शिष्येषु, विसृष्टेषु=प्रयातेषु, क्षणानन्तरम्=अल्पकालानन्तरम्, छात्रेणैकेन=शिष्येणैकेन, भयभीता=भयाक्रान्ता, सवेगम्=अतितीव्रम्, अत्युष्णम्=बहुसंतप्तम्, दीर्घम्=प्रलम्बम्, नि:श्वसती=श्वासग्रहणं कुर्वती, मृगीव=हरिणीव, व्याघ्राऽऽघ्राता=शार्दूलाक्रान्ता, अश्रुप्रवाहै:=नयनवाष्पै:, स्नाता–विहित स्नाना, सवेपथु:=सकम्पा, कन्यकैका=एकाबाला, अङ्के=क्रोडे निधाय=निक्षिप्य, समानीता=आनीता, चिरान्वेषणेनापि=बहुगवेषणयाऽपि, च=पुन:, तस्या:=बालिकाया:, सहचरी=सखी, सहचर: वा=सखा वा, न प्राप्त=न मिलित:, चन्द्रकलयेव=इन्दुप्रभया इव, निर्मिताम्=विरचिताम्, नवनीतेन=हैयङ्गवीनेन, रचितामिव=विनिर्मितामिव, मृणालगौरीम्=कमलदण्डधवलाम्, कुन्दकोरकाग्रदतीम्=माध्यकलिकाग्रदशनाम्, सक्षोभं=ससाध्वम्, रुदतीं=विलपन्तीम्, अवलोक्य=दृष्ट्वा, अस्माभिरपि=आश्रम वासिभिरपि, न=नहि पारितम्=शक्तम्, निरोद्धुं=अवरोद्धुम्, नयनवाष्पाणि=अश्रूणि।

**व्याकरणम्** – सवेगम्–वेगेन सहितम्। अश्रुप्रवाहै:–अश्रूणां प्रवाहै:। कुन्दकोरकाग्रदतीम्–कुन्दस्य कोरकाणाम् अग्राणि इव दन्ता: यस्या: सा। सक्षोभम्–क्षोभेन सहितम्।

नि:श्वसती–निस्+श्वस्+शतृ+ङीप्। विसृष्टेषु–वि+सृज+क्त। सवेपथु:–स+वेपृ+अथुच्। अन्वेषण– अनु+इष्+ल्युट्। निरोद्धुम्–नि+रुध्+तुमुन्।

**भावार्थ:** – क्रन्दनमिदं कुत: आयाति ज्ञायताम् इति मया आदिष्टम्। अनुक्षणमेव एक: छात्र: अतिशयभीतां कम्पमानामेकां कन्यकां अङ्के निधाय आनीतवान्। तां विलपन्तीं कन्यां दृष्ट्वा वयमपि अश्रूणि रोद्धुम् असमर्था जाता:।

**मूलम्** – **अथ ''कन्यके। मा भैषी:, पुत्रि! त्वां मातु: समीपे प्रापयिष्याम:, दुहित:! खेदं मा वह,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**भगवति! भुङ्क्ष्व किञ्चित्, पिब पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपय, मा स्म कोमलमिदं शरीरं शोकज्वालावलीढं कार्षीः'' इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य, ''बालिके! कथय क्व ते पितरौ? कथमेतस्मिन्नाश्रमप्रान्ते समायाता? किं ते कष्टम्? कथमरोदीः? किं वाञ्छसि? किं कुर्मः?'' इति पृष्टा मुग्धतया अपरिकलित-वाक्पाटवा, भयेन विशिथिलवचनविन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद्-**

**''एषा अस्मिन्नेदीयस्यैव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति।''**

**प्रसङ्ग** – कम्पमानां रुदतीं कन्यां आचार्य परिचयं पृष्ट्वा समश्वासति।

**व्याख्या** – अथ=अनन्तरम्, कन्यके=बालिके, मा भैषीः=भयंमाकुरु पुत्रि=तनये। त्वाम्=बालिकाम्, मातुः=जनन्याः, समीपे=निकटे, प्रापयिष्यामः=प्रेषयिष्यामः, दुहितः-पुत्रि! खेदं=कष्टम्, मा वह-मा कुरु, भगवति=ऐश्वर्यशलिनि! भुङ्क्ष्व=भक्षय, किञ्चित्=ईषत्, पिब पानंकुरु, पयः=दुग्धम्, एते-अत्रत्याः, तव=भवत्याः, भ्रातरः=बान्धवाः यत्=यात्किमपि, कथयिष्यसि=वक्ष्यसि, तदेव, करिष्यामः=सम्पादयिष्याम्ः, रोदनैः=विलपनैः, प्राणान्=असून्, संशयपदवीं=सन्देहदशाम्, आरोपयः=समारोपयः, कोमलम्=मसृणम्, इदं=एतत्, शरीरम्=गात्रम्, शोकज्वालावलीढं= शोकाग्नितप्तम्, मा स्मकार्षी=मा कुरु, इति=एवम्प्रकारेण, सहस्रधा=अनेकधा बोधनेन= सान्त्वनाप्रदानेन, कथमपि=केनापिप्रकारेण, सम्बुद्धा=बोधिता किञ्चिद्=ईषत्, दुग्धम्=क्षीरम्, पीतवती=अपिबत, ततश्च=पयःपानानन्तरम्, मया=मुनिना, क्रोडे=अङ्के, उपवेश्य=प्रस्थाप्य, बालिके=पुत्रि, कथय=वद, क्व=कुत्र, ते=तव, पितरौ=जनकौ, कथम्=केन प्रकारेण अस्मिन्=एतस्मिन्, आश्रमप्रान्ते=कुटीरप्रान्ते, समायाता=समागता किं=किम्प्रकारकम्, ते=तव, कष्टम्=दुःखम्, कथं=केनकारणेन, अरोदीः=रोदनमकरोः, वाञ्छसि=इच्छसि, किम्, कुर्मः=कुर्यामः, इतिपृष्टा=पृष्टेसति, मुग्धतया=सरलतया, अपरिकलितवाक्पाटवा= अज्ञातभाषणचातुर्या भयेन=भीत्या, विशिथिलवचन विन्यासा, अस्तव्यस्तभाषणा लज्जया=व्रीडया, अतिमन्दस्वरा=बहुकोमलस्वरा, शोकेन=दुःखेन, रुद्धकण्ठा=स्तम्भितकण्ठा, चकितचकिता=अतिभीता, इव=यथा, कथंकथमपि=केनापि प्रकारेण=अस्मान्=अत्रत्यान्, जनान्, अबोधयत=अज्ञापयत्, यत, एषा=बालिका, अस्मिन्=एतस्मिन्, नेदीयसि=अतिनिकटे, एव ग्रामे=पत्तने, वसतः=निवसतः, कस्यापि=कस्यचिदपि, ब्राह्मणस्य=विप्रस्य, तनया=पुत्री, अस्ति=वर्तते।

**व्याकरणम्** – संशयपदवीम्=संशयस्यपदवीम्। शोकज्वालावलीढम्=शोकस्य ज्वालया अवलीढम्। आश्रमस्य प्रान्ते आश्रमप्रान्ते। पटोर्भावः पाटवं, वाचिपाटवं वाक्पाटवम्। अतिमन्दस्वरा-अतिमन्दः स्वरो यस्याः सा। रुद्धः कण्ठो यस्याः सा रुद्ध कण्ठा।

प्रापयिष्यामः-प्र+आप्+णिच्+लृट्। अबलीढम्-अव+लिह्+क्त। उपवेश्य- उप+विश्+णिच्+ल्यप्। अरोदीः-रुद्+लुङ्+सिप्। पीतवती- पा+क्तवतु+ङीप्। नेदीयसि- नेद+ईयसुन

**भावार्थः** – अनन्तरं बटुना 'भयं मा कुरु, अहं त्वां मातुः समीपे नेष्यामि, दुग्धं पिब। शोकं मा कुरु' इति अनेकधा बोधनेन सा दुग्धम् अपिबत्। ततोऽहम् तां अङ्के निधाय तस्याःकष्टविषये, मातापितरौ विषये, गृहमित्यस्य विषये पृष्टवान् तदा सा लज्जया अतिमन्दस्वरा चित्तया अस्मान् ज्ञापितवती यत सा समीपस्थ ग्रामे एव निवसतः कस्यापि ब्राह्मणस्य पुत्री वर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मूलम्** - **एनां च सुन्दरीमाकलय्य कोऽपि यवनतनयो नदीतटान्मा-तुर्हस्तादाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य विभीषिकयाऽस्याः क्रन्दन-कोलाहलं शमयितुमियेष, तावदकस्मात् कोऽपि काल-कम्बल इव, भल्लूको वनान्तादुपाजगाम। दृष्ट्वैव यवन-तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह। विप्रतनया चेयं पलाश-पलाशि-श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत एव समायाता यावद् भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीतेति।**

**प्रसङ्गः** - आचार्यः भाग्यवशात् आश्रमं कथं प्राप्तवती विप्रसुता इति वर्ण यति।

**व्याख्या** - एनाम्=इमां बालिकाम्, सुन्दरीं=शोभनाङ्गीम्, आकलय्य=विचार्य कोऽपि=कश्चिदपि, यवनतनयः=यवनसुतः, नदीतटात=सरित् कूलात्, मातुः=जनन्याः, हस्तात्=करात्, अच्छिद्य=बलादपहृत्य क्रन्दन्तीम्=विलपन्तीम्, नीत्वा=आदाय, अपससार=पलायितवान्, ततः=तदनन्तरं, किञ्चिद्=अत्यल्पम्, अध्वानम्=मार्गम् अतिक्रम्य=गत्वा, यावत्=यावत्कालपर्यन्तम्, असिधेनुकाम्=छुरिकाम् सन्दर्श्य=प्रदर्श्य, विभीषिकया=भीत्या, अस्याः=एतस्याः बालिकायाः क्रन्दनकोलाहलं=रोदनध्वनिम्, शमयितुम्=शान्तंविधातुम्, इयेष=ऐच्छत्, तावत्=तावत्कालपर्यन्तं, अकस्मात्=सहसैव कोऽपि, कालकम्बलः=यमकम्बलः, इव=यथा, भल्लूकः=ऋक्षः, वनान्तात्=काननप्रदेशात्, उपजगाम=समीपमागतवान्, दृष्ट्वैव=विलोक्यैव, असौ=सः, यवनतनय=यवनसुतः, तत्रैव तस्मिन्नेव स्थाने, कन्यकाम्=बालिकाम्, इमां=एनां, त्यक्त्वा=परित्यज्य, एकम, शाल्मलीतरुम्=शाल्मलीवृक्षम्, आरुरोह=आरुढः। विप्रतनया=द्विजसुता, च इयम्, पलाश पलाशश्रेण्याम्=किंशुकवृक्षपंक्तौ, प्रविश्य=प्रवेशंकृत्वा, घुणाक्षरन्यायेन=भाग्यवशेन, इत एव=आश्रमाभिमुखमेव, समायाता=समागता, यावद्, भयेन=भीत्या, पुनारोदितुम्=भूयक्रन्दितुम्, आरब्धवती=आरेभे, तावत् एव, अस्मच्छात्रेण=मुनिशिष्येण, आनीता=समानीता।

**व्याकरणम्** - यवनतनयः- यवनस्य तनयः। क्रन्दनकोलाहलम्-क्रन्दनस्य कोलाहलम्। कालकम्बलः-कालश्चासौकम्बलः। अस्मच्छात्रेण-अस्माकं छात्रेण।

आकलय्य-आ+कल्+ल्यप्। नीत्वा- नी+क्त्वा अपससार-अप्+सृ+लिट्+तिप्। क्रन्दतीम्-क्रन्द+शतृसन्दर्श्य- सम्+दृश+णि+ल्यप्। इयेष- इष्+लिट्+तिप्। समायाता- सम्+आ+या+क्त+टाप्। आरब्धवती- आ+रभ+क्तवतु+ङीप्। आनीता- आ+नी+क्त+टाप्।

**भावार्थः** - इमां विप्रबालिकां कोऽपि यवनपुत्रः अपहृत्य पलायितः। किञ्चिदग्रे गत्वा सः एनां छुरिकां प्रदर्श्य क्रन्दनध्वनिं शान्तंकर्तुं प्रयासरतो आसीत्। तदैव अकस्मात् एकः भल्लूकः तत्रागतः, तं विलोक्य सः यवनः बालिकां त्यक्त्वा वृक्षारूढः अभवत्। इयं विप्रसुता किंशुकवृक्षपंक्तौ प्रविश्य संयोगेन आश्रमसमीपे आगता। एतस्याः रोदनध्वनिंश्रुत्वा मम शिष्य एनामत्रानयत्।

**मूलम्** - **तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच - ''विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः?''**

**ततः स उवाच- ''महात्मन्। क्वाधुना विक्रमराज्यम्? वीरविक्रमस्य तु भारतभुवं विरहय्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि। क्वाधुना मन्दिरे मन्दिरे जय जय ध्वनिः? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः? क्वाद्यापि मठे मठे वेदघोषः? अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित्तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद्धनानि लुण्ठ्यन्ते,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**क्वचिदार्त्तनादा:, क्वचिद् रुधिरधारा: क्वचिदग्निदाह:, क्वचिद् गृहनिपात:'' इत्येव श्रूयतेऽवलोक्यते च परित:।**

**प्रसङ्ग:** – वीर विक्रमादित्यस्य राज्ये कथमेतादृश: दुराचार: इति पृष्टे सति, योगिराजस्य सम्मुखे भारत दुर्दशांवर्णयति ब्रह्मचारिगुरु:।

**व्याख्या** – तत्=वचनम्, आकर्ण्य=निशम्य, कोपज्वालाज्वलित:=क्रोधाग्निप्रदीप्त:, इव=यथा, योगी=योगिराज:, प्रोवाच=निगदितवान्, विक्रमराज्येऽपि=विक्रमादित्यशासनेऽपि, कथम्=कस्मात् एष:=एतादृश:, पातकमय:=पापाचारयुक्त:, दुराचाराणाम्=अनीतिकारिणाम्, उपद्रव:=विध्न:। तत:– तदनन्तरम्, स:=ब्रह्मचारिगुरु:, उवाच=जगाद, महात्मन्–योगिन्। क्व=कुत्र अधुना=सम्प्रति, विक्रमराज्यम्=विक्रमशासनम्, वीरविक्रमस्य तु=बलिविक्रमादित्यस्य तु, भारतभुवं=भारतभूमिम्, विरहय्य=परित्यज्य गतस्य=प्रस्थितस्य, वर्षाणां=शरदां, सप्तदशशतकानि=सप्तदशशतवर्षाणि, व्यतीतानि=गतानि, क्व=कुत्र, अधुना=इदानीम्, मन्दिरे–मन्दिरे=प्रतिमन्दिरम्, जयजयध्वनि:=जय–जयनाद:, क्व=कुत्र सम्प्रति=अधुना, तीर्थे तीर्थे=प्रतितीर्थम्, घण्टानाद:=घण्टाध्वनि:, क्व=कुत्र, अद्यापि=साम्प्रतमपि, मठे मठे=प्रतिमठं, वेदघोष:=श्रुतिपाठनाद:, अद्य=अधुना, हि=निश्चयेन, वेदा:=श्रुतय: विच्छिद्य=विपाट्य, वीथीसु=प्रतोलिकासु, विक्षिप्यन्ते=विकीर्यन्ते, धर्मशास्त्राणि=मन्वादिप्रणीतवाङ्मयानि, उद्धूय=उत्तोल्य, धूमध्वजेषु=वह्निषु, ध्मायन्ते=अग्निसाद विधायन्ते, पुराणानि=श्रीमद्भागवतादीनि, पिष्ट्वा=चूर्णीकृत्य, पानीयेषु=जलेषु, पात्यन्ते=प्रक्षिप्यन्ते, भाष्याणि=सूत्रव्याख्यानानि, भ्रंशयित्वा=चूर्णयित्वा, भ्राष्ट्रेषु–भर्जनपात्रेषु, भर्ज्यन्ते=दहयन्ते क्वचित्=कुत्रचित्, मन्दिराणि=देवालया:, भिद्यन्ते=विनश्यन्ते, क्वचित्=कुत्रचित्, तुलसीवनानि=तुलसीकाननानि, छिद्यन्ते=कर्त्यन्ते, क्वचिद् दारा:=स्त्रिय:, अपह्रियन्ते=लुण्ठ्यन्ते, क्वचिद् आर्त्तनादा:=करुणक्रन्दनानि, क्वचिद्, रुधिरधारा:=रक्तप्रवाहा:, क्वचिद अग्निदाह:– अग्नि–काण्डम्, गृहनिपात:=भवनविध्वंस:, इत्येव=एतदेव, परित:=समन्तात्, श्रूयते=आकर्ण्यते, विलोक्यते=दृश्यते च।

**व्याकरणम्** – विक्रमराज्यम्– विक्रमस्य राज्यम्। घण्टानाद:–घण्टाया: नाद:। कोपज्वालाज्वलित:– कोपस्य ज्वालया ज्वलित:। धूमध्वजेषु धूम एव ध्वजो येषां, तेषु। गृहनिपात:– गृहाणां निपात:।
पातकमय:– पातक+मयट्। विरहय्य– वि+रह+ल्यप्। व्यतीतानि– वि+अति+इण+क्त (नपु.)।
पिष्+क्त्वा=पिष्ट्वा। भिद्यन्ते– भिद्+यक्+लट्। पात्यन्ते– पत्+णिच्+यक्+लट्+झ।

**भावार्थ:** – आचार्य वचनं श्रुत्वा क्रोधग्निदीप्त इव योगिराज उवाच–विक्रमादित्य शासनेऽपि कथमेदृग्विध: पातकमय: विघ्न:। तर्हि ब्रह्मचारि गुरु: उवाच– सम्प्रति विक्रमादित्य भूपते: शासन काल: नास्ति। भारतभूमिं परित्यज्य गतस्य तस्य सप्तदशशतवर्षाणि व्यतीतानि। अद्य तु सर्वत्र यवनानां दुराचारा: श्रूयन्ते दृश्यन्ते च। मन्दिरेषु घण्टानाद: तु न श्रूयते, अपितु मन्दिराण्येव धूलिसात विधीयन्ते। क्वचिद दारापहरणं क्वचित आर्तजनानां विलपनं तु क्वचित् अग्निदाह:। सर्वत्र एवमेव भयावहं वातावरणं दृश्यते।

**मूलम्** – **तदाकर्ण्य दु:खितश्चकितश्च योगिराडुवाच–''कथमेतत्? ह्य एव पर्वतीयाञ्छकान् विनिर्जित्य महता जयघोषेण स्वराजधानीमायात: श्रीमानादित्य-पदलाञ्छनो वीरविक्रम:। अद्यापि तद्विजयपताका मम चक्षुषोरग्रत इव समुद्धूयन्ते, अधुनापि तेषां पटहगोमुखादीनां निनाद: कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षाणां सप्तदश-शतकानि व्यतीतानि'' इति?**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – 'विक्रमराज्यं तु सप्तदशशतकानि पूर्वमासीत्' इति आचार्य कथनं भारतदुर्दशावर्णनं च श्रुत्वा, खिन्नः विस्मितः योगिराट् वीरविक्रमस्य कालं वर्णयति।

**व्याख्या** – तदाकर्ण्य=तच्छ्रुत्वा, दुःखितः=पीडितः, चकितः=विस्मितः, योगिराट्=महात्मा, उवाच=जगाद, कथं=केनप्रकारेण, एतत् ह्य एव=गतदिवसे एव, पर्वतीयान्=पर्वतप्रान्तस्थान्, शकान्=एतज्जातिशासकान्, विनिर्जित्य=जित्वा महता=अत्यन्तेन, जयघोषेण=जयजयेतिशब्देन, स्वराजधानीम्=निजप्रशासनकेन्द्रमुज्जयिनीम्, आयातः=समागतः, श्रीमान्=शोभावान्, आदित्यपदलाञ्छनः=आदित्यपदविभूषितः, वीरविक्रमः=शूरविक्रमनृपः, अद्यापि=इदानीमपि, तद्विजयपताका=विक्रमविजयबैजयन्ती, मम=योगिराजस्य चक्षुषोः=नेत्रयोः, अग्रत इव=पुरत इव, समुद्धूयनते=समुच्छ्रियन्ते, अधुनापि=इदानीमपि, तेषाम्=विक्रमसम्बन्धिनाम्, पटहगोमुखादीनाम्=वाद्यविशेषाणाम्, निनादः=ध्वनिः, कर्णशष्कुलीम्=श्रोत्रविवरम्, पूरयति इव=पूर्णं करोतीव, तत्=तस्मात्, कथम्=केन प्रकारेण, वर्षाणाम्=अब्दानाम्, सप्तदशशतकानि=एतत्संख्यापरिमितानि, व्यतीतानि=व्यपगतानि, इति=एवं पृष्टवान्।

**व्याकरणम्** – जयघोषेण– जयस्य घोषेण। विजयपताका–विजयस्य पताका। कर्णस्य शष्कुलीं– कर्णशष्कुलीम्। आकर्ण्य– आ+कर्ण+ल्यप्। विनिर्जित्य– वि+निर्+जि+ल्यप्। समुद्धूयन्ते– सम्+उद्+धूञ्+लट् (आत्मने)

**भवार्थः** – ब्रह्मचारिगुरोवचनं निशम्य योगिराट कथयति "एवं प्रतिभाति यत् ह्य एव शकान् विजित्य विक्रमादित्यः जयघोषेण सह निज राजधानीं प्राविशत्। इदानीमपि तस्य विजयवैजयन्ती मम नेत्रयोःपुरतः दोधूयन्ते। एतावत् कालः कथं व्यतीतः इति आश्चर्यः।"

**मूलम्** – **ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रणम्य कथितम् – "भगवन्! बद्ध-सिद्धासनैर्निरुद्ध-निःश्वासैः प्रबोधितकुण्डलिनीकै-र्विजितदशेन्द्रियैरनाहत-नाद-तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश्य, चन्द्रमण्डलं भित्त्वा, तेजः पुञ्जमविगणय्य, सहस्रदलकमलस्यान्तःप्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्र-स्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः। तस्मिन् समये भवता ये पुरुषा अवलोकिताः तेषां पञ्चाशततमोऽपि पुरुषो नावलोक्यते। अद्य न तानि स्रोतांसि नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम् न सा सान्द्रता विपिनानाम्। किमधिकं कथयामः भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति।"**

**प्रसङ्गः** – वीरविक्रमादित्यस्य शासनं सप्तदशशतकवर्षपूवमासीत्। तावत्कालः कथं व्यतीतः इत्यस्योत्तरं वदति ब्रह्मचारिगुरुः।

**व्याख्या** – ततः– तदनन्तरम्, सर्वेषु=निखिलेषु, स्तब्धेषु=शान्तेषु, चकितेषु=आश्चर्यभूतेषु, ब्रह्मचारिगुरुणा=मुनिना, प्रणम्य=नमस्कृत्य, कथितम्=उक्तम्, भगवन्!महात्मन!, बद्धसिद्धासनैः=योगसुलभासनविशेषैः, निरुद्धनिश्वासैः=नियन्त्रितप्राणैः, प्रबोधितकुण्डलिनीकैः=उद्योतितकुण्डलिनीकैः, विजितदशेन्द्रियैः=जितेन्द्रियैः, अनाहदनादतन्तुम्=ब्रह्मनादसूत्रम्, अवलम्व्य=आश्रित्य, आज्ञाचक्रम्=भ्रूमध्यस्थितद्विदलात्मकचक्रम्, संस्पृश्य=उपस्पृश्य, चन्द्रमण्डलम्=शशिबिम्बम्, भित्वा=उद्भिद्य, तेजपुञ्जम्=महाप्रकाशम्, अविगण्य=तिरस्कृत्य, सहस्रदलकमलस्यान्तः=सहस्रारचक्रस्यान्तः, प्रविश्य=प्रवेशं कृत्वा, परमात्मानम्=परब्रह्मम्, साक्षात्कृत्य=प्रत्यक्षीकृत्य, तत्रैव=ब्रह्मणि एव, रममाणैः=विहरणशीलैः, मृत्युञ्जयैः=स्वायत्तीकृत कालवृत्तिभिः, आनन्दमात्रस्वरूपैः=चिन्मयस्वरूपैः, ध्यानावस्थितैः=आबद्धध्यानैः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भवादृशैः=भवत्सदृशैः, न=नहि, ज्ञायते=अववुद्ध्यते, कालवेगः=समयचक्रः, तस्मिन् समये=तत्काले, भवता=योगिराजेन, ये पुरुषाः=ये जनाः, अवलोकिताः=दृष्टाः, तेषाम् तज्जनानाम्, पञ्चाशत्तमोऽपि=पञ्चाशतसंख्यापूरकोऽपि, पुरुषः=मानवः नावलोक्यते=न दृश्यते, अद्य=इदानीम्, न न हि, तानि=भवता दृष्टानि, स्रोतांसि=धाराः, नदीनाम्=निर्झरिणीनाम्, न=न हि, सा=पुरावर्तिनी, संस्था=स्थितिः, नगराणाम्=जनपदानाम्, न सा=पुरावर्ती, आकृतिः=स्वरूपः, गिरीणाम्=पर्वतानाम्, न, सा, सान्द्रता=गहनता, विपिनानाम्=वनानाम्, किमधिकम्=कथमधिकम्, कथयामः=वर्णयामः, भारतवर्षम्=भारतदेशम्, अधुना=सम्प्रति, अन्यादृशमेव=पूर्वभिन्नमेव, सम्पन्नमस्ति=जातं वर्तते!

**व्याकरणम्** – बद्धसिद्धासनैः– बद्धं सिद्धासनं यैस्तैः। प्रबोधितकुण्डलिनीकैः– प्रबोधिता कुण्डलिनी यैस्तैः। विजितदशेन्द्रियैः– विजितानि दशेन्द्रियाणि यैस्तैः। ध्यानावस्थिताः– ध्याने अवस्थिता, ध्यानाव स्थिताः तैः ध्यानावस्थितैः। भवादृशैः– भवान् इव दृश्यन्ते इति भवादृशाः, तैः भवादृशैः।
संस्पृश्य– सम्+स्पृश्+क्त्वा+ल्यप्। निरुद्ध– नि+रूध्+क्त। भित्वा– भिद्+क्त्वा। रममाणैः– रम्+शानच्। संस्था–सम्+स्था+अङ्+टाप्। सम्पन्नम्– सम्+पद् (गतौ)+क्त।

**भावार्थः** – हे प्रभो! सिद्धासनंगृहीत्वा निश्वासं निरुद्धय, कुण्डलिनी प्रबोध्य इन्द्रियाणि विजित्य सुषुम्णादिं समाश्रित्य आज्ञाचक्रं स्पृष्ट्वा शशिबिम्बं विभिद्य तेजपुञ्जमवजित्य ब्रह्मरन्ध्रस्यान्तः प्रविश्य तत्रैव रममाणाः चिन्मयस्वरूपे ध्यानावस्थिताः योगिनः समयवेगं न जानन्ति। विक्रमस्य काले ये जनाः, यानि नगराणि, वनानि, पर्वतानि, नदीनां स्रोतांसि च न वर्तन्ते इदानीं तु भारतमस्माकं भिन्नमेव जातमस्ति।

**मूलम्** – **इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद – ''सत्यं न लक्षितो मया समय-वेगः। यौधिष्ठिरे समये कलितसमाधिरहं वैक्रम-समये उदस्थाम्। पुनश्च वैक्रमसमये समाधिमाकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि। अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् संक्षिप्य कथ्यतां का दशा भारतवर्षस्येति'' –**

**प्रसङ्गः** – ''स्थितप्रज्ञो भवान् 'सहस्राणि वर्षाणि कथं व्यतीतानि' इति न ज्ञातवान्'' इति मुनिवचनं समर्थयति योगिराट्।

**व्याख्या** – इदम्=ब्रह्मचारिगुरुवचनम्, आकर्ण्य=निशम्य, किञ्चित्=ईषत्, सिमत्वेव=विहस्य इव, परितः=सर्वतः, अवलोक्य=दृष्ट्वा, योगी=योगसाधकः, जगाद=उवाच, सत्यम्=वस्तुतः न=नैव, लक्षितः=परिज्ञातः, मया=योगिना, समयवेगः=कालप्रवाहः, यौधिष्ठरे=युधिष्ठरस्य, काले=समये, कलितसमाधिः=धारितसमाधिः, अहम्=योगी, वैक्रमसमये=विक्रमादित्यस्यकाले, समाधिम्=ध्यानम्, आकलय्य=समालम्व्य, अस्मिन्=एतस्मिन्, दुराचारमये=अनाचारमये, समये, अहम्=योगिराजः, उत्थितः=जागृतः, अहम्, पुनः=भूयः, गत्वा=यात्वा, समाधिमेव=ध्यानमेव, कलयिष्यामि=धारयिष्यामि, किन्तु=परञ्च, तावत्=तावत्कालपर्यन्तम्, भारतवर्षस्य=अस्मद्देशस्य, का दशा=कीदृशी अवस्था, इति=एतत्, संक्षिप्य=समासेन, कथ्यताम्=ज्ञायताम्।

**व्याकरणम्** – यौधिष्ठिरे– युधिष्ठिरस्य अयमिति यौधिष्ठरः तस्मिन्। कलितसमाधि– कलितः समाधिः येन सः। दुराचारः– दुष्टः आचार।
अवलोक्य– अव्+लोक्+ल्यप्। आकर्ण्य=आ+कर्ण+ल्यप्। आकलय्य– आ+कल्+ल्यप्। दुराचारमये दुराचार+मयट्। कलयिष्यामि– कल्+लृट्+मिप्। संक्षिप्त– सम्+क्षिप्+ल्यप्।

**भावार्थ** – आचार्यस्य वचनं श्रुत्वा योगिराट् कथयति यत सत्य मेव मया कालवेगो न ज्ञातः। युधिष्ठिरस्य समये समधिस्थोऽहम् विक्रमादित्यस्य काले उत्थितवान् ततश्च विक्रमादित्यस्य समये समाधिस्थः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भूत्वा इदानीं जागरितोऽस्मि। पुनः समाधिस्थः भविष्यामि ततः पूर्वं भारतस्थितिं कथयतु भवान्।

**मूलम्** – **तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थ-प्रसाद सम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण ''मा स्म धर्मध्वसन- घोषणैर्योगिराजस्य धैर्यमवधीरय'' इति कण्ठं रुन्धतो वाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभत–**

**''भगवन्! दम्भोलिघटितेयं रसना, या दारुणदानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयं, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्यवंश्यांश्चाऽभिमन्यामहे।''**

**प्रसङ्गः** – योगिराजस्य आज्ञानुसारं आचार्य खिन्नमनसा तात्कालिकीं भारतदशां वर्णयति।

**व्याख्या** – तत्=योगिराजवचनम्, संश्रुत्य=निशम्य, भारतवर्षीयदशायाः=भारतवर्षसम्बन्धिनः अवस्थायाः, संस्मरणेन=स्मृत्या, संजातः=उत्पन्नः शोकः=उद्वेगः, हृदयस्थः=अन्तःस्थ, यः प्रसादः=प्रसन्नता, तस्य सम्भारः=अतिशयः, उद्गिरणम्=कथनम्, तस्मिन्, श्रमः=खेदः तस्मिन्, इव=यथा, अतिमन्थरेण=नितान्तमन्देन, स्वरेण=ध्वनिना धर्मध्वंसनघोषणैः=धर्मोन्मूलनवचनैः, योगिराजस्य=महामुनेः, धैर्यम्=धीरताम्, अवधीरय=अवनमय, इति=एतत्, कण्ठम्=ग्रीवाम्, रून्धतः=स्तम्भयतः, वाष्पान्=अश्रूणि, अविगणय्य=समुपेक्ष्य, नेत्रे=नयने, प्रमृज्य=मृष्ट्वा, उष्णम्=उत्तप्तम्, निःश्वस्य=उच्छ्वस्य, कातराभ्याम्=दीनाभ्याम्, इव, नयनाभ्याम्=नेत्राभ्याम्, परितः=समन्तात्, अवलोक्य=दृष्ट्वा, ब्रह्मचारिगुरुः=आश्रमस्थो गुरुः, प्रवक्तुम्=कथयितुम्, आरभत=प्रारभत।

भगवन!=महर्षे!, दम्भोलिघटिता=वज्रनिर्मिता, इयम्=एषा, रसना=जिह्वा, या=रसना, दारुणदानवोदन्तोदीरणैः=भीतिप्रदनिशाचरकथाकथनैः, न=नहि, दीर्य्यते=भिद्यते, लोहसारमयं=कृष्णायसरचितम्, हृदयम्=मानसम्, यत्=चेतः, संस्मृत्य=स्मृत्वा, यावनान्=यवनविहितान्, परसहस्रान्=दशशताधिकान्, दुराचारान्=अत्याचारान्, शतधा=शतखण्डेषु, न भिद्यते= न विदीर्य्यते, भस्मसाच्च=अग्निसाच्च, न=नहि, भवति=जायते, धिगस्मान्=धिक्कारं विद्यते मादृशान्, ये=वयम्, अद्यापि=इदानीमपि, जीवामः=जीवनंसन्धारयामः, श्वसिमः=श्वासान् गृह्णामः, विचरामः=चलामः, आत्मनः=स्वान्, च, आर्यवंश्यान्=आर्यवंशोद्भवान् अभिमन्यामहे=अङ्गीकुर्मः।

**व्याकरणम्** – भारतवर्षीयदशासंस्मरणसञ्जातशोकः– भारतवर्षस्य इति भारतवर्षीया सा चासौ दशा, तस्याः संस्मरणेन सञ्जातशोकः यस्य सः। धर्मध्वंसनघोषणैः– धर्मस्य ध्वंसनम्, तस्य घोषणैः। दम्भोलिघटिता–दम्भोलिना घटिता। दारुणदानवोदन्तोदीरणैः– दारुणानां दानवानां उदन्तस्य उदीरणैः। लोहसारमयम्–लोहसारस्य विकारः।

उद्गिरण– उद्+गृ+ल्युट्। अवधीरय– अव+धृ+लोट्। प्रमृज्य– प्र+मृज्+क्त्वा+ल्यप्। प्रवक्तुम्–प्र+वच्+तुमुन्। आरभत– आ+रभ्+लङ्+तिप्। अविगणय्य– अ+वि+गण+क्त्वा+ल्यप्।

**भावार्थः** – योगिराजवचनं श्रुत्वा भारतीयावस्थास्मरणेन उत्पन्न शोकः आचार्यः नितान्तमन्दस्वरेण 'धर्मोन्मूलनकथनैः योगिराजस्य धैर्यं न नाशय' इति कण्ठरुन्धतो अश्रुनिवहान् समुपेक्ष्य उष्ण निःश्वासं गृहीत्वा कातर नेत्राभ्याम् परितः विलोक्य उक्तवान्– रसनेयं वज्र निर्मिता वर्तते या म्लेच्छावृतान्तकथाभिः दीर्णा न जायते, हृदयमिदं प्रतिभाति अयोनिर्मितं यत् यावनपराधान् श्रुत्वाऽपि न भिद्यते। धिगस्मान् वयमिदानीमपि जीवामः श्वसनं कुर्मः, आत्मनः आर्यवंशोद्भवान् मन्यामहे।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मूलम्** – **उपक्रममममुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिववदनम्, निपतद् वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानञ्च स्वरम्, अवागच्छत् ''सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः, सकलोपद्रवमयश्चायं वृत्तान्तः'' इति, ''अत एव तत्स्मरणमात्रेणपि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखेदयिषामि, इति च विचिन्त्य-''**

**''मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकल- कालनः करालः कालः। स एव कदाचित् पयः पूर-पूरितान्यकूपारतलानि मरूकरोति। सिंहव्याघ्र-भल्लूक-गण्डक-फेरुशशसहस्र-व्याप्तान्यरण्यानि जनपदी करोति, मन्दिर-प्रासादहर्म्य-शृंगाटक-चत्वरोद्यान-तडागगोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यतां कदाचिदस्मिन्नेव भारते वर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्ष-वाताऽऽतप-हिम-सहानि तपांसि अतापिषत। सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः स्मृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराज्यवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्'' इति कथयित्वा तूष्णीमवतस्थे।**

**प्रसङ्गः** – भारतवर्षस्य दुर्दशाया वर्णनानन्तरं विषण्णतामुपगतमाचार्यं सम्बोधयन् महाकालं वर्णयति योगिराट्।

**व्याख्या** – अमुम्=एतम्, उपक्रमम्=उपोद्घातम्, आकर्ण्य=श्रुत्वा मुनेः=ब्रह्मचारिगुरोः, विमनायमानम्=दुर्मनायमानम्, हरिद्राद्रवक्षालितम्ः=हरिद्रारसधौतमिव, वदनम्=आननम् निपतद्वारिबिन्दुनी=प्रच्यवदश्रुकणे, नयने=लोचने, अञ्चितरोमकञ्चुकम्=सरोमाञ्चम्, शरीरम्=वपुः, कम्पमानम्=वेपमानम्, अधरम्=ओष्ठः, भज्यमानम्=त्रुट्यमानम्, च, स्वरम्=शब्दम्, अवागच्छत=ज्ञातवान्, सकलानर्घमयः=निखिलपापमयः, सकलवञ्चनामयः=समग्रप्रतारणायुक्तः, सकलपापमयः=निखिलपातकयुक्तः, सकलोप द्रवमय च=समग्रोपघातयुक्तश्च, अयम्=एषः, वृतान्तः=कथानकः, इति, अत एव=अस्मादेव, तत्स्मरणमात्रेणपि=तत्स्मृतिविषयेत्वेनापि, खिद्यते=कष्टमनुभवति, एषः=ब्रह्मचारिगुरुः, हृदये=चेतसि, तत्=तस्मात्, अहम्=योगिराट्, एतं=आचार्यम्, निरर्थम्=निष्प्रयोजनम्, न=नैव, जिग्लापयिष्यामि=ग्लापयितुमिच्छामि, न वा, चिरवेदयिषामि=खेदयितुमिच्छामि, इति च=एवञ्च, विचिन्त्य=विचार्य, योगिराडुवाच इति अग्रे योजयिष्यते।

मुनौ=ब्रह्मचारिगुरौ, विलक्षणः=विचित्ररूपः, सकल कलाकलापकलनः=समस्तकलासमूहनिर्माता, करालः=दारुणः, अयं भगवान्=सर्वसमर्थः, कलाः=महाकालः, स एव=महाकाल एव कदाचित्=कस्मिश्चित् समये, पयःपूरितानि=जलप्रवाहपूर्णानि, अकूपारतालानि=सागरतलानि, मरूकरोति=मरूस्थलंविदधाति, सिंहव्याघ्रभल्लूकगण्डकफेरुशशकसहस्रव्याप्तानि=केसरी-शार्दूलभल्लूक खड्गशृगालशशकसहस्रखचितानि, अरण्यानि=काननानि, जनपदीकरोति=नगरमिव विदधाति, मन्दिरप्रासादहर्म्यशृङ्गाटकचत्वरोद्यान तडागगोष्ठमयानि=देवालयराजसदनधनिकावा-सचतुष्पथाङ्गणगोस्थानकप्रचुराणि, नगराणि=पुराणि, च, काननीकरोति=विपिनीकरोति, निरिक्ष्यताम्=अवलोक्यताम्, कदाचित=कस्मिन्काले, अस्मिन्नैव एतस्मिन्नेव, भारतवर्षे=भारतदेशे, यायजूकैः=याज्ञिकैः, राजसूयादियज्ञाः=विविध यज्ञाः, व्ययाजिषत्=विहिताः, कदाचित्=कस्मिश्चित् काले, इहैव=अस्मिन्नेव देशे, वर्षवाताऽऽतपहिमसहानि=प्रावृट्पवनग्रीष्मशीतसहानि, तपांसि=तपश्चर्याणि, अतापिषत्=तप्तानि, सम्प्रति तु=वर्तमानसमये तु, म्लेच्छैः=यवनैः,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

गावः=धेनवः, हन्यन्ते=हिंस्यन्ते, वेदाः=श्रुतयः, विदीर्यन्ते=छिन्द्यन्ते, स्मृतयः=धर्मशास्त्राणि, समृद्यन्ते=अवमृश्यन्ते, मन्दिराणि=देवा लयाः, मन्दुरीक्रियन्ते=वाजिशालीक्रियन्ते, सत्यः=पतिव्रताः पात्यन्ते=व्यभिचार्यन्ते, सन्तश्च=सज्जनाश्च, सन्ताप्यन्ते=पीड्यन्ते, सर्वमेतत्=समग्रमेतत्, महात्म्यम्=गौरवम्, तस्यैव=सर्वसमर्थस्यैव, महाकालस्य=करालकालस्य, इति=एवम् धीरधौरेयोऽपि=धीरधुरन्धरोऽपि, धैर्यम्=धीरत्वम्, विधुरयसि=विकलयसि, शान्तिम्=धीरताम्, आकलय्य=आश्रित्य, यवनराजवृतान्तम्=म्लेच्छनृपोदन्तम्, अतिसंक्षेपेण=अतिसमासेन कथय=वद, न जाने=नाहं जानामि, किमिति=कथमेतत्, अनावश्यकमपि=निष्प्रयोजनमपि, शुश्रूषते= श्रोतुमभिलषति, मे=मम, हृदयम्=चित्तम्, इति=एवम्प्रकारेण, कथयित्वा=उक्त्वा तूष्णीम्=मौनम्, अवतस्थे=बभूव।

**व्याकरणम्** – अञ्चितरोमकञ्चुकम्- अञ्चिताः रोमकञ्चुकाः यस्मिन् तत्। सकलकलाकलापकलनः- सकलानां कलानां कलापः, तस्य कलनः। मरूकरोति- अमरुं मरुं करोतीति। मन्दुरीक्रियन्ते-अमन्दुराः मन्दुराः क्रियन्ते इति। पयः पूरितानि- पयसापूरेणपूरितानि। सिंहव्याघ्रभल्लूकगण्डकफेरुशश-सहस्रव्याप्तानि-सिंहानां व्याघ्राणां भल्लूकानां गण्डकानां फेरुणां शशानां च स्रहस्राणि, तैः व्याप्तानि। विमनायमानम्- वि+मन+क्यच्+शानच्। कम्पमानम्- कम्प्+शानच्। जिग्लापयिष्यामि-ग्लैहर्षक्षये+पुक्+णिच्+सन्+लट्+मिप्। चिखेदयिषामि- खिद्+णिच्+सन्+मिप्। कलनः-कल्+ल्युट (अन्)। व्ययाजिषत्- वि+यज्+कर्मणिलुङ्, (प्र.पु.ब.व.)। विदीर्यन्ते-वि+दृ+यक्+लट्+झि। अतापिषत्-तप्+लुङ्+झ (भावकर्म)। अवतस्थे- अव+स्था+लिट+त।

**भावार्थः** – आचार्यमुखाद् देशस्य दुर्दशावृतान्तंश्रुत्वा, आचार्यस्य कम्पमानम् अधरंभज्ज्यमानं स्वरञ्च दृष्ट्वा योगिराट् ज्ञातवान् यत् दुर्दशा स्मरणेनापि अपि आचार्य खिद्यते। इदानींम् इतोऽपि न प्रष्टव्य इति विचिन्त्य योगिराट् कथयति महर्षे! सर्वेषां स्रष्टा संहर्ता च महाकाल एव। स एव समुद्रतलानि मरुस्थलानि करोति, वनानि नगराणि करोति मन्दिरप्रासादादि बहुलानि नगराणि वनानि करोति। कदाचिदस्मिन् देशे याजिकाः यज्ञान् कुवन्ति स्म। कदाचिद् कष्टानि सोढ्वा तपांसि तपन्तिस्म। इदानीं तु यवनाः धेनून् घातयन्ति, वेदस्मृतिमन्दिराणि नाशयन्ति, पतिव्रताः पातयन्ति एतत्सर्वं महाकालस्यैव प्रभावोऽस्ति। अतः भवान् धैर्यमवलम्ब्य संक्षेपेण यवनराज्यवृतान्तं कथयतु। अनावश्यकमपि वृतान्तमिदं श्रोतुमिच्छति मे मनः।

**मूलम्** – **अथ स मुनिः 'भगवन्! धैर्येण, प्रसादेन, प्रतापेन, तेजसा, वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण विद्यया च सममेव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये, शनैः शनैः पारस्परिकविरोध-विशिथिलीकृतस्नेहबन्धनेषु राजसु, भामिनी-भ्रूभङ्ग-भूरिभाव प्रभाव-पराभूत-वैभवेषु, भटेषु, स्वार्थचिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, ''इन्द्रस्त्वं वरुणस्त्वं कुबेरस्त्वम्'' इति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजिनी-स्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमां विभिद्य, परश्शतान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।'**

**प्रसङ्गः** – योगिराजस्य आज्ञामनुसृत्य तदानींतनभारतदेशस्य दशां वर्णयति आचार्यः।

**व्याख्या** – अथ=अनन्तरम्, स मुनिः=ब्रह्मचारिगुरुः, अवदत् इति शेषः। भगवन!=योगिराट्, धैर्येण=धीरतया, प्रसादेन=प्रसन्नमनसा प्रतापेन=प्रभावेण, तेजसा=कान्त्या, वीर्येण=बलेन, विक्रमेण=पराक्रमेण, शान्त्या=शमेन, श्रिया=शोभया, सौख्येन=धनेन, धर्मेण=सत्कृतेन, विद्यया=ज्ञानेन, च,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सममेव=साकमेव, परलोकम्=स्वर्गम्, सनाथितवति=सनाथंकृतवति, तत्रभवति=पूज्ये, वीरविक्रमादित्ये=एतन्नामके नृपे, शनैः शनैः- मन्दंमन्दम्, पारस्परिक विरोधविशिथिली-स्नेहवन्धनेषु=अन्योऽन्यविरोधशिथिली कृत प्रेमसम्बन्धेषु, राजसु=नृपेषु, भामिनीभ्रूभङ्गभूरि-भावप्रभाव पराभूतवैभवेषु=कामिनी भ्रूविलासबहुभावप्रभावपराजितधनेषु, भटेषु=वीरेषु, स्वार्थचिन्तासन्तानवितानैकतानेषु=स्वार्थचिन्तनमात्रपरायणेषु, अमात्यवर्गेषु=सचिवजनेषु, प्रशंसामात्रप्रियेषु=आत्मश्लाघाश्रवणप्रियेषु, प्रभुषु=शासकेषु, इन्द्रस्त्वम्=पुरन्दरस्त्वम्, कुबेरस्त्वम्=धनाधिपस्त्वम्, इति=एवम्प्रकारेण, वर्णनामात्रसक्तेषु=प्रशंसनमात्रतत्परेषु, बुधजनेषु=विद्वत्सु, कश्चन=कोऽपि, गजिनीस्थान निवासी=गजिनीदेशवास्तव्यः, महामदः=महमूदः, यवनः=म्लेच्छः, ससेनः=चमूसहितः भारतवर्षे=अस्माकं देशे, प्राविशत=समागच्छत, स च=महमूदः प्रजाः=भारतीय जनान्, विलुण्ठ्य=लुण्ठयित्वा, मन्दिराणि=देवालयान्, निपात्य=प्रध्वंस्य, प्रतिमाः =देवमूर्तीः, विभिद्य =विदीर्य, परःशतान्=शताधिकान्, जनान्=भारतीयान् च, दासीकृत्य=भृत्यान् विधाय, शतशः=शतसंख्यकेषु, उष्ट्रेषु=क्रमेलकेषु, रत्नानि=माणिक्यादीनि, आरोप्य=संस्थाप्य, स्वदेशम्=गजनीम्, अनैषीत्=नीतवान्।

**व्याकरणम्** - पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु- पारस्परिकेण विरोधेन विशिथिलीकृतानि स्नेह बन्धनानि यैः तेषु। स्वार्थचिन्ता-स्वार्थस्य चिन्ता। ससेनः- सेनया सहितः।
सनाथितवति- सनाथ+णिच्+क्त वतु+ङि। विभिद्य- वि+भिद्+क्त्वा+ल्यप्। प्राविशत्-प्र+विश्+लङ्+तिप्। अनैषीत्- नी+लुङ्+तिप्। आरोप्य- आ+रोप्+क्त्वा>ल्यप्।

**भावार्थः** - तदनन्तरं ब्रह्मचारिगुरुः वदति भगवन् सर्वगुण सम्पन्न वीर विक्रमः यदा परलोकमगात तदारभ्य एव पतनं प्रारम्भः जातः। राजानः पारस्परिकविरोधे निमग्ना अभवन्। वीराः तिरस्कृतवैभवाः, अमात्या स्वार्थचिन्तनपरायणाः विद्वांसश्च प्रशंसावर्णनतत्परा अभूवन्। तदा गजिनीवास्तव्य महमूद नामकः कश्चन यवनः ससेनया भारते प्राविशत्। स जनान् विलुण्ठ्य प्रतिमाः विभिद्य बहुषु क्रमेलकेषु रत्नानि संस्थाप्य गजिनीमनयत्।

**मूलम्** - **एवं स ज्ञातास्वादः पौनः पुन्येन द्वादशवारमागत्य भारतम लुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेशचूडायितं सोमनाथतीर्थमपि धूली- चकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदूर्य पद्मरागमाणिक्य-मुक्ताफलादि-जटितानि कपाटानि, स्तम्भान्, गृहावग्रहणीः भित्तीः, वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय, शतद्वय-मणसुवर्ण-शृंखलावलम्बिनीं चञ्चच्चाकचक्य-चकितीकृतावलोचक-निचयां महाघण्टां प्रसह्य सङ्गृह्य, महादेवमूर्तावपि गदामुदतूलुलत्।**

**प्रसङ्गः** - अभूतपूर्ववैभवसम्पन्नं गुर्जरदेशस्थितं सोमनाथतीर्थं कथं लुण्ठितवान् महमूदः इत्येवं वर्णयति ग्रन्थकारः।

**व्याख्या** - एवम्=अनेन प्रकारेण, सः=आक्रमणकर्त्ता, ज्ञातास्वादः=गृहीतरसः, पौनः पुन्येन=वारंवारम्, आगत्य=आक्रम्य, भारतम्=एतद्देशम्, अलुलुण्ठत्=लुण्ठितवान्, तस्मिन्नेव=लुण्ठनविषयक एव, स्वसंरम्भे=स्वकीय आक्रमणे, एकदा=एकवारम्, गुर्जरदेशचूडायितम्=गुर्जरप्रदेशभूषणभूतम्, सोमनाथतीर्थमपि=एतन्नामकं मन्दिरमपि धूलिचकार=प्रणष्टवान्, अद्यतु=साम्प्रतं तु, तत्तीर्थस्य=सोमनाथस्य, नामपि=अभिधानमपि, केनापि=केनापि नागरिकेन, न=नहि, स्मर्यते=स्मरणं क्रियते, परं=किन्तु, तत्समये=तस्मिन्काले, तस्य=सोमनाथस्य, वैभवम्=समृद्धिः, लोकोत्तरम्= अपरिमितम्, आसीत्=अर्वतत्, तत्र=तस्मिन् मन्दिरे, हि=निश्चयेन, महार्हवैदूर्यपद्मरागमाणिक्य-



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मुक्ताफलादिजटितानि=बहुमूल्यवैदूर्यलोहितकमणिमौक्तिकादिजटितानि, कपाटानि=द्वाराणि, स्तम्भान्=स्थूणान्, गृहावग्रहणी:=गेहदेहली:, भित्ती:=कुड्यानी, वलभी:=गोपानसी:, विटङ्कानि च =कपोतपिञ्जराणि च, निर्मथ्य=मथित्वा, रत्ननिचयम्= रत्नराशिम्, आदाय=गृहीत्वा, शतद्वयमणसुवर्णशृङ्खलावलम्बिनीम्=द्विशतमणहेमशृङ्खलावलम्बिनीम्, चञ्चच्चाकचक्यचकिती-कृतावलोचकलोचननिचयाम्=समुच्छलच्चाकचक्य-विस्मेरीकृतद्रष्टुजननेत्र समूहाम्, महाघण्टाम्=बृहदाकारघण्टिकाम्, प्रसह्य=बलाद्, संग्रह्य=समादाय, महादेवमूर्तावपि= शङ्करविग्रहेऽपि, गदाम्=शस्त्रविशेषम्, उदतूतुलत्=उदतिष्ठिपत्।

**व्याकरणम्** – ज्ञातास्वाद:- ज्ञात: आस्वाद: येन स:। गृहावग्रहणी:- गृहस्य अवग्रहणी:। रत्ननिचयम्- रत्नानां निचयम्। शतद्वयमण सुवर्णशृङ्खलावलम्बिनीम्- शतद्वयमणसुवर्णस्य शृङ्खलायाम् अवलम्बिनीम्। चूडायितम्- चूडा+क्यङ्+क्त। धूलीचकार- धूलि+च्वि+कृ+लिट्। निर्मथ्य- निर्+मथ्+ल्यप्। प्रसह्य+प्र+सह+ल्यप्। अलुलुण्ठत्- लुठि+लुङ्+तिप्।

**भावार्थ:** – इत्थं लब्धरस: स महमद: द्वादशवारं भारतं लुण्ठितवान्। एकदा स गुर्जरदेशस्थसोमनाथतीर्थमपि प्रणष्टवान्। बहुमूल्यवैदूर्यादिरत्नखचितानि कपाटानि स्थूणादीनि निर्मथ्य, माणिक्यनिकरं संगृह्य शतद्वयमणहेमशृंखलालम्विनीं महाघण्टां बलाद् संग्रह्य शंकरविग्रहेऽपि गदां उदतिष्ठिपत।

**मूलम्** – **अथ ''वीर! गृहीतमखिलं वित्तम्, पराजिता आर्य्यसेना:, बन्दीकृता वयम्, सञ्चितममलं यश:, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय कर्तय, ज्वलय, किन्तु त्यजेमामकिञ्चित्करीं जडां महादेव-प्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षी:'' इति साम्रेडं कथयत्सु रुदत्सु पतत्सु विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु ''नाहं मूर्तीर्विक्रीणामि, किन्तु भिनद्मि'' इति सङ्गर्ज्य जनताया हाहाकार-कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसम- कालमेव चानेकार्बुदपद्ममुद्रामूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुख: तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।**

**प्रसङ्ग:** – अर्चकानां प्रार्थनां तिरस्कृत्य मदोन्मत्त: म्लेच्छ: महमूद: महादेवमूर्त्तिं खण्डं कृतवानिति वर्णयति ग्रन्थकार:।

**व्याख्या** – अथ=तदनन्तरम्, वीर!=शूर!, गृहीतम्=स्वायत्तीकृतम्, अखिलम्=समस्तम्, वित्तम्=धनम्, पराजिता:=पराजयमुपगता:, आर्यसेना=हिन्दूसेना:, बन्दीकृता=निबद्धा:, वयम्-आर्या:, सञ्चितम्=संकलितम्, अमलम्=स्वच्छम्, यश:=कीर्ति:, इतोऽपि=एतावतापि, न शाम्यति=शान्तिमेति, ते=तव, क्रोध:=कोप:, चेत्=यदि, अस्मान्=पूजकान्, ताडय=प्रताडय, मारय=प्राणनाश विधेहि, छिन्धि=विदारय, भिन्धि=भेदय, पातय=प्रक्षिप, मज्जय=निमम्नं कुरु, खण्डय=खण्डं खण्डं कुरु, कर्तय=कर्तनं कुरु, ज्वलय=अग्नौदा हय, किन्तु=परञ्च, इमाम्=एताम्, अकिञ्चित्करीम्=असमर्थाम्, जडाम=विश्चेष्टाम्, महादेवप्रतिमाम्=शिवमूर्तिम्, त्यज=मुञ्च, यदि एवम्=यद्येतत् न स्वीकरोषि=न मन्यसे, तत्=तर्हि, अस्मत:=अर्चकवर्गत:, अन्यदपि=एतदधिकमपि, सुवर्णकोटिद्वयम्=कोटिद्वयंसुवर्णमुद्राम्, गृहाण=ग्रहणं कुरु, इति=एवम्, साम्रेडम्=वारंबारम्, कथयत्यु=निवेदयत्सु, रुदत्सु=विलपत्सु, पतत्सु=चरणयोर्निपतत्सु, विलुठत्सु=भूमौ प्रपतत्सु, पूजकवर्गेषु=अर्चकसमूहेषु, अहम्=महमूद:, मूर्ती:=प्रतिमा:, न विक्रीणामि=न विक्रयं करोमि, किन्तु, भिनद्मि=खण्डयामि, इति=एवम्, संगर्ज्य=गर्जनं विधाय, जनताया:=जनसमूहस्य,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

हाहाकारकलकलम्=हाहेतिकरुणध्वनिम्, आकर्णयन्=शृण्वन्, घोरगदया=भीषणगदया, मूर्तिम्=प्रतिमाम्, अतुत्रुटत्=भेदितवान् गदापातसमकालमेव=गदाप्रहारसममेव, अनेकार्बुदपद्ममुद्रामूल्यानि=बहुसंख्यमूल्यानि, रत्नानि=पद्मरागादीनि, मूर्तिमध्यात्=प्रतिमान्तरात्, उच्छलितानि=उत्पतितानि, परितः=इतस्ततः, अवाकीर्यन्त=प्रकीर्णानि जातानि, स च=महमूदः, दग्धमुखः=महादुष्टः, तानि=विकीर्णितानि, रत्नानि=मौक्तिकानि, मूर्तिखण्डानि=प्रतिमाशकलानि, च क्रमेलक पृष्ठेषु=उष्ट्रपृष्ठभागेषु, आरोप्य=संस्थाप्य, सिन्धुनदम्=एतन्नामिकांनदीम् उत्तीर्य=उल्लङ्घ्य, स्वक्रीयां=निजाम्, विजयध्वजिनीम्=जयपताकिनीम् गजिनीम्=एतन्नामिकाम्, राजधानीम्=शासनकेन्द्रम्, प्राविशत्=प्रविवेश।

**व्याकरणम्** – अकिञ्चित्करी– न किञ्चित्करी। महादेवप्रतिमाम्–महादेवस्य प्रतिमा, ताम्। पूजकवर्गेषु–पूजकानां वर्गेषु। घोरगदया– घोरया गदया। दग्धमुखः– दग्धं मुखं यस्य सः। क्रमेलकपृष्ठेषु–क्रमेलकानां पृष्ठेषु।

अमलम्– न विद्यते मलं यस्मिन् तत्। सञ्चितम्–सम् चिञ्+क्त। गृहीतम्– ग्रह+क्त। त्रायस्व–त्रै+लोट्+सिप्। स्प्राक्षी स्पृश्+लुङ्+सिप्। अतुत्रुटत–त्रुट्+णिच्+लुङ्+तिप्।

**भावार्थः** – शङ्करविग्रहं खण्डयितुम् उद्यतं महमदं अर्चकाः अकथयन् वीर! गृहीतं सर्वधनम्, अस्माकं मारणं, छेदनं, भेदनं, मज्जनं, कर्तनं, ज्वालनं किमपि कुरु परमेनां जडमूर्तिं मा त्रोटय, मा स्पृश एवं बारम्बारं पूजकेषु वदत्सु, पतत्सु, प्रणमत्सु च सत्सु 'अहं मूर्तिं न विक्रीणामि किन्तु भिनद्मि इति गर्जनं कृत्वा मूर्तिम् अत्रोटयत्। गदाप्रहारेण मूर्तिमध्याद् बहुमूल्यानि रत्नानि उच्छलितानि। तानि उष्ट्रेषु संस्थाप्य गजिनीं गतवान्।'

**मूलम्** – **अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (1087) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणाँस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून् गृहान् निर्माय, चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतल-शोणितानप्यसयन् पञ्चाशदुत्तरद्वादश-शतमितेऽब्दे (1250) दिल्लीमश्वयाम्बभूव।**

**प्रसङ्गः** – इदानीं ब्रह्मचारिगुरुः शहाबुद्दीन नामकस्य गोरदेशवास्तव्यस्य म्लेच्छस्य यवनराजस्य भारतदेशे आक्रमणं वर्णयति।

**व्याख्या** – अथ=तत्पश्चात्, कालक्रमेण=कालप्रवाहेण, सप्ताशीत्युत्तरसहस्रतमे=एतत्संख्यके, वैक्रमाब्दे=विक्रमसंवत्सरे, सशोकम्=शोकसन्तप्तम्, सकष्टम्=सखेदं च, महामदे=महमूदे, प्राणान्=असून् त्यक्तवति=परित्यक्ते, महामदे=महमूदे, गोरदेशवासी=गोरदेशनिवासी, कश्चित्=कोऽप्येकः, शहबुद्दीननामा=तन्नामकः, प्रथमम्=पूर्वम् गाजिनीदेशम्=महामददेशम्, आक्रम्य=आक्रमणं विधाय, महामद कुलम्=महमूदवंशम्, धर्मराजलोकाध्वनि=यमलोकपथि, अध्वनीनम्=पान्थम्, विधाय=सम्पाद्य, सर्वाः=समग्राः, प्रजाः=जनताः, पशुमारम्=पशुवत्प्रहारैः, मारयित्वा=निहत्य, तद्रुधिरार्द्रमृदा=तद्रक्तक्लिन्नमृतिकया, गोरदेशे=स्वदेशे, बहून् गृहान्=भवनानि, निर्माय=संरच्य, चतुरङ्गिग्या=चतुर्भिरङ्गैः, सहितया, अनीकिन्या=सेनया, भारतवर्षम्=एतद्देशम्, प्रविश्य=आगत्य, शीतलशोणितान्=अनुष्णरक्तान्, असयन्=असिनाघातयन् पञ्चाशदुत्तरद्वा-दशशतमितेऽब्दे=एतस्मिन् संवत्सरे, दिल्लीम्=एतन्नामिकां नगरीम्, अश्वयाम्बभूव=अश्वारोहैः समतिचक्राम।

**व्याकरणम्** – कालक्रमेण– कालस्य क्रमः, तेन। वैक्रमाब्दे– विक्रमस्यायमिति वैक्रमः, वैक्रमश्चासौ अब्दः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तस्मिन्। तद्रुधिरार्द्रमृदा– तेषां रुधिरेण आर्द्रा मृत्, तया। शीतलशोणितान्– शीतलं शोणितं येषां, तान्।

आक्रम्य– आ+क्रम+क्त्वा>ल्यप्। पशुमारम्– पशु+मृ+ण्मुल। असयन्– असि+णिच्+शतृ। निर्माय– निर्+मा+क्त्वा>ल्यप्। प्र+विश्+क्त्वा>ल्यप्।

**भावार्थः** – अनन्तरं १०८७ (1087) तमे वैक्रमाब्दे महामदस्य मृत्योरनन्तरं गौर देश निवासी शहाबुद्दीनाख्या यवन गजिनीमाक्रम्य महमूदवंशीयान् हतवान्। तेषां रक्तेन आर्द्रमृदभि स्वदेशे गृहनिर्माणं विधाय स्वसेनया सह भारतं प्रविश्य १२५० (1250) तमे वर्षे दिल्लीं तुरगैः अचिचक्राम!

**मूलम्** – **ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रं च पारस्परिक- विरोध-ज्वर-ग्रस्तं विस्मृत-राजनीतिं भारतवर्ष-दुर्भाग्यायमाण-माकलय्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण्डमण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः, रिङ्गत्तरङ्ग-भङ्गापङ्गाऽपि शोणित-शोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि।**

**स एव प्राधान्येन भारते यावनराज्याङ्कुराऽऽरोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीननामा प्रथमभारतसम्राट् सञ्जातः।**

**प्रसङ्गः** – पृथ्वीराजजयचन्द्रयोः पारस्परिक विरोधं, वाराणस्यां यवनशासकेन कृतजनसंहारं चवर्णयति ग्रन्थकारः

**व्याख्या** – ततः=तदनन्तरम्, दिल्लीश्वरम्=दिल्लीप्रदेशाधिपतिम्, पृथ्वी राजम्=एतन्नामकम्, कान्यकुब्जेश्वरम्=कन्नोजाधिपतिम्, जयचन्द्रम्=एतन्नामानम्, च, पारस्परिकविरोधज्वरग्रस्तम्= पारस्परिककलहरुजादूषितम्, विस्मृतराजनीतिम्=नृपनयज्ञानशून्यम्, भातरवर्षदुर्भाग्यायमाणम्= भारतवर्षस्य समायान्तं दौर्भाग्यम्, आकलय्य=ज्ञात्वा, अनायासेन=सहजेन, उभौअपि=द्वावपि, विशस्य=विनाश्य, वाराणसीपर्यन्तम्=वाराणसीं यावत्, अखण्डमण्डलम्=समस्तजनपदम्, अकण्ठक्रम्=विघ्नरहितम्, अकीटकीट्टम्=कीटमलरहितम्, महारत्नम्=महामणिम् इव=यथा, अङ्गीचकार=स्वायत्तीकृतवान्, तेन=शहाबुद्दीनेन, वाराणस्यामपि=वाराणसी पुर्यामपि, बहवः=अत्यधिकाः, अस्थिगिरयः=अस्थिपर्वताः, प्रचिताः=निर्मिताः, रिङ्गतरङ्गभङ्गा=चल दूर्मिप्रचुरा, गंगा=भागीरथी, अपि, शोणितशोणा=रक्तरञ्जिता, शोणीकृता=शोणनदमिव प्रापिता, परसहस्राणि=सहस्राधिकानि, देवमन्दिराणि=देवायतनानि, भूमिसात्कृतानि=धूलिसात्कृतानि।

स एव=शहाबुद्दीन एव, प्राधान्येन=प्रामुख्येन, भारते=अस्मिन देशे, यवनराज्याङ्कुरऽऽरोपकः=यवनराज्यबीजारोपकः, अभूत=आसीत्, तस्य=शहाबुद्दीनस्य, एव कश्चित्=एकः, क्रीतदासः=सेवकः कुतुबुद्दीननामा=एतन्नामकः, प्रथमभारतसम्राट्=प्रथममुगल–शासकः, सञ्जातः=अभवत्।

**व्याकरणम्** – कान्यकुब्जेश्वरम्– कान्यकुब्जस्य ईश्वरम्। राजनीतिः– राज्ञां नीतिः। भारतवर्षदुर्भाग्यायमाणम्– भारतवर्षस्य दौर्भाग्यम्, तदिव आचरतीति भारतवर्षदुर्भाग्यायमाणः, तम्। अस्थिगिरयः– अस्थ्नां गिरयः। अकण्टकम्– न विद्यन्ते कण्टकाः यस्मिन् तत्। शोणितशोणा शोणितेन शोणा। भारतसम्राट्– भारतस्य सम्राट्। आकलय्य– आ+कल्+क्त्वा+ल्यप्। विशस्य वि+शस्+क्त्वा>ल्यप्। प्रचिताः– प्र+चिञ्+क्त। सञ्जातः– सम्+जन्+क्त।

**भावार्थः** – तदनन्तरं शहाबुद्दीन पारस्परिककलहग्रस्तौ पृथ्वीराजजयचद्रौ सारल्येन हत्वा वाराणासीपर्यन्तं निष्कण्टकं साम्राज्यं स्थापितवान्। तेन वाराणसी अपि रक्तरञ्जिता कृता। सहस्राणि देव मन्दिराणि नाशितानि। स एव भारते यवनराज्यस्य वीजरोपकः। तस्यैव कुतुबुद्दीनाख्य सेवकः प्रथमः सम्राट्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभवत्।

**मूलम्** – **तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाहनामा यद्यपि गूढशत्रु भारतवर्षस्य, तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं, गृहीतविग्रह इव चाधर्मः आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिल्लीवल्लभतां कलङ्कयति। अस्यैव पताकाः केकयेषु, मत्स्येषु, मगधेषु अङ्गेषु, बङ्गेषु, कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।**

**प्रसङ्गः** – विधर्मिम्लेच्छराजा अवरङ्गजीवस्य साम्राज्य कैकयतः आरभ्य कलिङ्गपर्यन्तं विस्तृतमिति वर्णयति ग्रन्थकारः

**व्याख्या** – तमारभ्य=कुतुबुद्दीनात् प्रारभ्य, अद्यावधि=साम्प्रतं यावत् राक्षसा एव=यवना एव, राज्यम्=शासनम्, अकार्षुः=कृतवन्तः, दानवा एव=म्लेच्छा एव, दीनान्=दुःखितान्, अदीदलन्=अनाशयन्, केवलम्=एकः, अकबरशाहनामा=एतन्नामकः, अभूत्=अजायत्, यद्यपि, गूढशत्रुः=प्रच्छन्न रिपुः, भारतदेशस्य=अकबरस्यैव, प्रपौत्र=पौत्रतनयः, मूर्तिमदिव=विग्रहइव, कलियुगम्=कलिकालम्, इव=यथा, गृहीतविग्रहः=धृतशरीरः, अधर्म इव=पाप इव, आलमगीरोपाधिधारी=एतदुपाधिधारकः, अवरङ्ग जीव=एतदाख्यः सम्प्रति=इदानीम्, दिल्लीवल्लभताम्=दिल्लीश्वरताम्, कलङ्कयति=विदूषयति, अस्यैव=अवरङ्गजीवस्य, पताकाः=ध्वजाः, केकयेषु=पञ्जाबदेशेषु, मत्स्येषु=मत्स्यदेशेषु, मगधेषु=बिहारप्रान्तेषु, वङ्गेषु=बङ्गप्रदेशेषु, कलिङ्गेषु=उत्कलप्रान्तेषु, च दोधूयन्ते=उद्धूयन्ते, केवलम्=एकः, दक्षिणदेशे=अवाचीभागे, अधुनाऽपि=इदानीमपि, अस्य=म्लेच्छराज्ञः, परिपूर्णः=समग्ररूपेण, अधिकारः=आधिपत्यम्, न=नहि, संवृत्त=सञ्जातः।

**व्याकरणम्** – विद्वत्प्रियः– विद्वांसः प्रियाः यस्य सः। गूढशत्रु– गूढश्चासौ शत्रुः। गृहीतविग्रहः– गृहीतः विग्रहः येन सः। शान्तिप्रियः शान्तिः प्रिया यस्मै सः।

अकार्षुः– कृ+लुङ्+झि। अदीदलन्– दल् (चुरादि)+लुङ्+झि। मूर्तिमत्– मूर्ति+मतुप्। संवृतः– सम्+वृत+क्तः।

**भावार्थः** – तदारभ्य अद्यावधि पर्यन्तं यवना एव राज्यं कुर्वन्ति भारतीयान् पीडयन्ति च। यवनेषु केवल अकबर एव शन्तिप्रियः आसीत्। इदानीं तस्यैव प्रपौत्र अवरङ्गजीव दिल्लीश्वरतां कलङ्कयति। महाराष्ट्रदेशं विहाय सर्वत्र अस्यैव राज्यमस्ति।

**मूलम्** – **दक्षिणदेशो हि पर्वतबहुलोऽस्ति, अरण्यानीङ्कुऽऽलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेश-शासकत्वेन ''शास्तिखान'' नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेश- रत्नम्, यवन-शोणितपिपासाऽऽकुलकृपाणः, वीरतासीमन्तिनीसीमन्तसुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमानदोर्दण्डः मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भट्टानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातः-स्मरणीयः, स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धं वैरम्। ''कार्यं वा साधयेयं देहं वा पातयेयम्।'' इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनाम्, सताम्, त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशा-सन्तान-वितानस्यायमेवाऽऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकं विनिवेदयामो योगबलावगतसकलगोप्यतम-वृत्तान्तेषु योगिराजेषु'' इति कथयित्वा विरराम।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः** – दक्षिणदेशस्थितस्य सनातनधर्मोद्धारकस्य महाराष्ट्रसिंहस्य शिववीरस्य शौर्य वर्णनं करोति कविः।

**व्याख्या** – दक्षिणदेशः=भारतवर्षस्य दक्षिणप्रदेशः, हि=निश्चयेन, पर्वतबहुलः=गिरिनिचितः, अरण्यानीसङ्कुलः=महद्वनव्याप्तः, च, अस्ति=वर्तते, इति=एतस्मात्कारणात्, चिरोद्योगेनापि=बहुप्रयासेनापि, न=नहि, अयम्=अवरङ्गजेबः, महाराष्ट्रकेसरिणः, महाराष्ट्रसिंहान्, हस्तयितुम्=वशीकर्तुम्, न, अशकत्, समर्थोऽभवत, साम्प्रतम्=अधुना, अस्यैव=अवरङ्गजेबस्यैव, आत्मीयः=स्वजनः, दक्षिणदेशशासकत्वेन=दक्षिणप्रान्ताधीश्वरत्वेन, शास्तिखान नाम्ना=एतन्नामकः, प्रेष्यते=गमयिष्यते, इति=एवम् श्रूयते=आकर्ण्यते, महाराष्ट्रदेशरत्नम्= तद्देशाभूषणम्, यवनशोणितपिपासाऽऽ-कुलकृपाणः=यवनरक्तपाने व्याकुलखड्गः, वीरतासीमन्तिनी-सीमन्तसुन्दरसान्द्रसिन्दूरदान-देदीप्यमानदोर्दण्डः=शूरताङ्गनाकेश वेशसुन्दरघननागकेशरचर्चनदेदीप्यमानभुजदण्डः, मुकुटमणिः=किरीटमणिः, महाराष्ट्राणाम्=एतद्देशानाम्, भूषणम्=अलङ्करणम्, भटानाम्=शूराणाम्, निधिः=कोषः, नीतीनाम्=राजनयानाम्, कुलभवनम्=निवासस्थानम्, कौशलानाम=दक्षतानाम्, पारावारः=सागरः, परमोत्साहानाम्=अतिशयसाहसानाम्, कश्चन=कोऽपि प्रातःस्मरणीयः= प्रातःनमस्करणीयः, स्वधर्माऽऽग्रहगृहग्रहिलः=सनातनधर्मदृढपरिपालकः, शिव इव=शङ्कर इव, धृतावतारः=गृहीतावतारः शिववीरः=शिवाजी इति विख्यातः, अस्मिन्=अत्र, पुण्यनगरात्=पूना इतिनगरात्, नेदीयस्येव=अतिनिकटे एव, सिंह दुर्गे=सिंहगढे ससेनः=सेनाभिः सह, निवसति=तिष्ठति, साम्प्रतम्=अधुना, अस्य=शिववीरस्य, प्रवृद्धम्=प्रकृष्टरूपेण वृद्धम्, वैरम्=शत्रुत्वम्, कार्यम्=कर्म वा, साधयेयम्=सम्पादयेयम्, देहम्=शरीरं वा, पातयेयम्=नाशयेयम्, इति अस्य=शिववीरस्य, सारगर्भा=सारयुक्ता, महती=भीषणा, प्रतिज्ञा=संकल्पः, सतीनाम्=कुलव्रतानाम्, सताम्=सज्जनानाम्, त्रैवर्णिकस्य=द्विजादिकस्य आर्यकुलस्य= आर्यपरिवारस्य, धर्मस्य=सनातन धर्मस्य, भारतवर्षस्य=हिन्दुस्थानस्य, च=पुनः, आशासन्तानवितानस्य=आशापरम्परा-विस्तारस्य, अयमेव=शिववीर एव, आश्रयः=आधारः, इयमेव=एषैव, वर्तमाना=साम्प्रतिकी, दशा=अवस्था भारतवर्षस्य=हिन्दुस्थानस्य, अस्तीति, किमधिकम्=किमितो अधिकम्, विनिवेदयामः=संसूचयामः, योगबलावगतसकलगोप्यतमवृतान्तेषु =ध्यानबलज्ञातसकलरहस्यमयोदन्तेषु, योगिराजेषु=योगिवर्येषु, इति=एवम्प्रकारेण, कथयित्वा= निगद्य, विरराम=मौनंबभूव, ब्रह्मचारिगुरुरितिभावः।

**व्याकरणम्** – महाराष्ट्रकेसरिणः– महाराष्ट्रकेसरिण इव तान्। पर्वतबहुलः– पर्वतैः बहुलः। अरण्यानीसङ्कुलः– महद् अरण्यम् अरण्यानी ताभिः सङ्कुलः।मुकुटमणिः– मुकुटस्यमणिः। स्वधर्माऽऽग्रहगृहग्रहिलः– स्वधर्माय आग्रहः तस्य गृहेग्रहिलः। आशासन्तानवितानस्य– आशानाम् सन्तानम् तस्य वितानस्य। योगबलावगतसकलगोप्यतमवृतान्तेषु योगस्य बलेन अवगताः सकलाः गोप्यतमाः वृतान्ताः यैस्तेषु। अरण्यानी– अरण्य+आनुक्+ङीष्। हस्तयितुम्– हस्त+णिच्+रम्+लिट्+तिप्।

**भावार्थः** – चिरप्रयासेनापि अवरङ्गजीवः महाराष्ट्रं हस्तयितुं नाशक्नोत्। सम्प्रति तस्य सेवकः शस्तिखानाख्य शिववीरं जेतुं प्रेष्यते। शिववीरस्तु पूना नगर समीपे सिंहदुर्गे ससेनया निवसति। वस्तुतः सः देशरत्नस्वरूपः म्लेच्छरक्त पिपासाकुलकृपाणः, महाराष्ट्राणां मुकुटमणिः भटानां भूषणः उत्साहानां सागरः सुशोभमान भुजदण्डः सनातनधर्मपालनतत्पर भगवान् शिव इवास्ति। स एव शिववीरः भारतवर्षस्य आशा समूहस्य आश्रयो वर्तते। ''कार्यं वा साधयेयं देहं वा पातयेयम्'' इति सारपूर्णा प्रतिज्ञा तेन कृताऽस्ति। किमधिकं भगवन्। एषैव दशा वर्तते भारतस्य अधुना।

**मूलम्** – **तदाकर्ण्य विविध-भाव-भङ्ग-भासुर-वदनो योगिराजो मुनिराजं तत्सहचरांश्च निपुणं**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गीकृत्य, मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य ''विजयतां शिववीरः, सिद्ध्यन्तु भवतां मनोरथाः'' इति मन्दं व्याहार्षीत्।**

**प्रसङ्ग** – शिववीरस्य प्रतिज्ञां सश्रुत्य योगिराजः तस्य विजयकामनां करोति।

**व्याख्या** – तदाकर्ण्य=तच्छ्रुत्वा, विविधभावभङ्गभासुरवदनः– अनेकभावभङ्गिमादीप्तमुखः, योगिराजः= महामुनिः, मुनिराजम्=ब्रह्मचारिगुरुम् तत्सहचरांश्च=तत्सहायकाञ्च, निपुणम्=सम्यक्, निरीक्ष्य=विलोक्य तेषाम्=आश्रमवासिनाम्, शिववीरान्तरङ्गताम्=शिववीरस्य सहायकत्वम् अङ्गीकृत्य=स्वीकृत्य, मुनिवेषव्याजेन=मुनिवेशछद्मना, स्वधर्म रक्षाव्रतिनः=स्वधर्मरक्षण-सङ्कल्पशीलान्, च, उररीकृत्य=अङ्गीकृत्य, विजयताम्=विजयं लभताम्, शिववीरः=शिवराजः, भवताम्=युष्माकम् मनोरथाः=अभिलाषाः, सिद्ध्यन्तु=सफलीभवन्तु, इति=एवम्, मन्दम्=अनुच्चैः, व्याहार्षीत्=सहर्षमकथयत्।

**व्याकरणम्** – योगिराजः– योगिनां राजा। विविधभावभासुरवदनः– विविधानां भावानां भङ्गैः भासुरं वदनं यस्य सः। शिववीरान्तरङ्गताम् शिववीरस्य अन्तरङ्गताम्। स्वधर्मरक्षाव्रतिनः– स्वस्य धर्मस्य रक्षया व्रतिनः।

आकर्ण्य– आङ्+कर्ण+क्त्वा>ल्यप्। निरीक्ष्य– निर्+ईक्ष+ल्यप्। व्याहार्षीत्– वि+आ+हृ+लुङ् (प्र.पु.ए.व.)

**भावार्थः** – एतत्सर्वं वृतान्तं विज्ञाय विविधभावैः भ्रासुरमुखः योगिराजः आचार्यं तस्य सहचरान् आश्रमवासिनश्च सम्यक् निरीक्ष्य तान् सर्वान् मुनिवेशव्याजेन सनातनधर्मरक्षणतत्पराः शिवसेवकाश्च ज्ञात्वा ''शिववीरः विजयतु सिद्ध्यन्तु भवतां मनोरथाः'' इति मन्दम् अवोचत्।

**मूलम्** – **अथ 'किमपि पिपृच्छिषामी' ति शनैरभिधाय बद्धकरसम्पुटे सोत्कण्ठे जटिलमुनौ ''अवगतम् यवनयुद्धे विजय एव, दैवादापद्ग्रस्तोऽपि च सखि-साहाय्येनात्मानमुद्धरिष्यति'' इति समभाणीत्। मुनिश्च 'गृहीतमि'- त्युदीर्य, पुनः किञ्चिद् विचार्येव स्मृत्वेव च, दीर्घमुष्णं निःश्वस्य, रोरुध्यमानैरपि किञ्चिदुद्गतैर्वाष्पविन्दुभिराकुलनयनो ''भगवन्! प्रायो दुर्लभो युष्मादृक्षाणां साक्षात्कारः इत्यपराऽपि पृच्छाऽऽच्छादयति माम्'' इति न्यवेदीत्। स च आम। ऊरीकृतम् जीवति सः सुखेनैवाऽऽस्ते इत्युदतीतरत्। अथ ''तं कदा द्रक्ष्यामि'' इति पुनः पृष्टवति ''तद्विवाहसमये द्रक्ष्यसि'' इत्यभिधाय, बहूनि सान्त्वनावचनानि च गम्भीरस्वरेणोक्त्वा, सपदि उपत्यकाम्, गण्डशैलान् अधित्यकाञ्चाऽऽरूह्य पुनस्तस्मिन्नेव पर्वतकन्दरे तपस्तप्तुं जगाम।**

**प्रसङ्गः** – 'यवनयुद्धे शिववीरस्य एव विजय' इति सूचनात्परं योगिराजः पुन स्तपश्चरितुं शीघ्रमेव गण्डशैलान् आरुह्य पर्वतकन्दरे गच्छतीति वर्णयति ग्रन्थकारः।

**व्याख्या** – अथ=अनन्तरम्, किमपि=किञ्चिदपि, पिपृच्छिषामि=प्रष्टुमभिलषामि, इति=इत्थम्, शनैः=मन्दम्, अभिधाय=कथयित्वा, बद्धकरसम्पुटे=रचिताञ्जलौ, सोत्कण्ठे=जिज्ञासासहिते, जटिलमुनौ= जटाधारिमुनौ, अवगतम्=ज्ञातम्, यवनयुद्धे=यवनैः सह सङ्ग्रामे, विजय एव=जय एव, दैवात्=भाग्यवशात्, आपद्ग्रस्तोऽपि=विपद्ग्रस्तोऽपि, च, सखिसहाय्येन=मित्रसहयोगेन, आत्मानम्=स्वम्, उद्धरिष्यति=उद्धारं करिष्यति, इति=एवम्, समभाणीत=अकथयत्, मुनिः=ब्रह्मचारिगुरुः, च=पुनः, गृहीतम्=बुद्धम्, इति=एवम्, उदीर्य=कथयित्वा पुनः=भूयः, किञ्चिद=किमपि, विचार्य=विचिन्त्य, इव, स्मृत्वा=संस्मृत्य, इव च, दीर्घम्=बहुकालिकम्, उष्णम्=तप्तम्, निःश्वस्य=उच्छ्वस्य, रोरुध्यमानैः=भृशंवार्यमाणैः, अपि, किञ्चिदुद्गतैः=



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ईषन्नि:सृतै:, वाष्पबिन्दुभि:=अश्रुकणै:, आकुलनयन:=व्याकुललोचन: भगवन्!=महात्मन!, प्राय:=सामान्यतया, युष्मादृक्षाणाम्=भवत्सदृशानाम्, साक्षात्कार:=दर्शनम्, इति=अनेन हेतुना, अपराऽपि=अन्याऽपि, पृच्छा=प्रश्नेच्छा, माम्=मुनिम्, आच्छादयति=आवृणोति, इति, न्यवेदीत्=निवेदितवान्, स:=योगिराड, च आम्=स्वीकृतम्, उरीकृतम्=विज्ञातम्, स:, जीवति=जीवनंधारयति, सुखेनैव=सुखपूर्वकमेव आस्ते=तिष्ठति, इति, उदतीरत्=उत्तरं दत्तवान्। अथ=तत:, तम्, कदा=कस्मिन् काले, द्रक्ष्यामि=अवलोकयिष्यामि, इति=इत्थम्, पुन:=भूय: पृष्टवति=सम्पृष्टेसति, तद्विवाहसमये=तदुद्वाहकाले, द्रक्ष्यसि=अवलोकयिष्यसि, इति=एवम्, अभिधाय=प्रोच्य, बहूनि=अनेकानि सान्त्वनावचनानि=आश्वासन वचांसि, च, गम्भीरस्वरेण=धीरवचसा, उक्त्वा=कथयित्वा, सपदि=तत्कालमेव, उपत्यकाम्=पर्वतोध: भागम्, गण्डशैलान्=पर्वतपतितान्पाषाणखण्डान्, अधित्यकाम्=पर्वतोपरिभूभागम्, च, आरुह्य=अधिरुह्य, पुन:=भूय:, तस्मिन्नेव=पूर्वनिर्दिष्टैव, पर्वतकन्दरे=शैलगुहायाम्, तपस्तप्तुम्=तपश्चरितुम्, जगाम=अगच्छत्।

**व्याकरणम्** – बद्धकरसम्पुटे– बद्ध: करयो: सम्पुटो येन स:, तस्मिन्। सोत्कण्ठे=उत्कण्ठयासहित: सोत्कण्ठ:, तस्मिन्। यवनयुद्धे–यवनानां युद्धे=यवनयुद्धे। वाष्पबिन्दुभि:– वाष्पाणां बिन्दुभि:। युष्मादृक्षाणाम्– यूयमिव दृष्यन्ते इति युष्मादृक्षा: तेषाम्। गम्भीरस्वरेण–गम्भीरेण स्वरेण। पर्वतकन्दरे– पर्वतस्य कन्दरे।

पिपृच्छिषामि– पृच्छ+सन्+लट्+मिप्। अभिधाय– अभि+धा+क्त्वा>ल्यप्। अवगतम्– अव+गम+क्त। समभाणीत– सम्+भण्+लुङ्+तिप्। रोरुध्यमानै:– रुध्+यङ्+शानच्। उद्गतै:– उद्+गम्+क्त। आच्छादयति– आ+छद्+लट्+तिप्। न्यवेदीत्– नि+विद्+लुङ्+तिप्। उदतीरत्– उद्+तृ+णिच्+लुङ्+तिप्।

**भावार्थ:** – तदनन्तर योगिराज: अवदत् ''यवनयुद्धे विजयो भविष्यति दैवाद् विपद्ग्रस्तोऽपि मित्रसहाय्येन आत्मानं रक्षिष्यति इति। मुनिरपि 'गृहीतम्' इत्युक्त्वा किमपि विचार्य उष्णं नि:श्वस्य अवदत् युष्मादृक्षाणां महात्मनां साक्षात्कारो दुर्लभ एव एका जिज्ञासा इतोऽप्यस्ति, योगिराज: आम् इत्युक्त्वा उत्तरंवदति स सुखेन जीवति तस्य दर्शनं च तद्विवाह काले भविष्यति इत्युक्त्वा सत्वरम् गण्डशैलान् आरुह्य पर्वतकन्दरे गतवान्।''

**मूलम्** – **तत: शनै: शनैर्यातेष्वपरिचितजनेषु, संवृत्ते च निर्मक्षिके, मुनिगौरबटुमाहूय, विजयपुराधीशाऽऽज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य अफजलखानस्य विषये यावत् किमपि प्रष्टुमियेष, तावत् पादचारध्वनिमिव कस्याप्यश्रौषीत्। तमवधार्याऽन्यमनस्के इव मुनौ गौरवटुरपि तेनैव ध्वनिना कर्णयोराकृष्ट इव समुत्थाय, निपुणं परितो निरीक्ष्य, पर्य्यट्य, 'कोऽयम्?' इति च साम्रेडं व्याहृत्य, कमप्यनवलोक्य, पुनर्निवृत्य, 'मन्ये मार्जार: कोऽपि' इति मन्दं गुरवे निवेद्य, पुनस्तथैवोपविवेश। मुनिश्च 'मा स्म कश्चिदितर: श्रौषीत्' इति सशङ्क: क्षणं विरम्य पुनरुपन्यस्तुमारेभे।**

**प्रसङ्ग:** – अत्र आचार्य: गौरवटुमाहूय अफजलखान विषये वृत्तान्तं पृच्छति।

**व्याख्या** – तत:=तदनन्तरम्, शनै: शनै:=मन्दं मन्दम्, अपरिचितजनेषु=अज्ञातजनेषु, निर्यातेषु=गतेषु, निर्मक्षिके=एकान्ते च संवृते=जाते, मुनि:=ब्रह्मचारिगुरु:, गौरबटुम्=गौरवर्णब्रह्मचारिणम्, आहूय=आमन्त्र्य, विजयपुराधीशाज्ञया=विजयपुराधिपादेशेन, शिववीरेण=शिवराजेन, सह=साकम्, योद्धुम=युद्धार्थम्, ससेनम्=सेनासहितम्, प्रस्थितस्य=विहितप्रस्थानस्य, अफजलखानस्य=



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एतन्नामकस्य, विषये=सम्बन्धे, यावत्=यस्मिन् काले, किमपि=किञ्चिदपि, प्रष्टुम्=जिज्ञासितुम्, इयेष=इच्छितवान्, तावत्=तस्मिन्नेव काले, पादचारध्वनिमिव=चरणसंचलनध्वनिमिव, अश्रौषीत्=श्रुतवान्, तम्=ध्वनिम्, अवधार्य=विज्ञाय, अन्यमनस्के=निरुत्साहिते, इव=यथा, मुनौ=ब्रह्मचारिगुरौ, गौरबटुः=गौरब्रह्मचारी, अपि, तेनैव=श्रुतेनैव, ध्वनिना=शब्देन, कर्णयोः=श्रोत्रयोः, कृष्ट इव=समाकृष्ट इव, समुत्थाय=उत्तिष्ठितोभूत्वा, निपुणम्=सम्यग्प्रकारेण, परितः=समन्तात्, निरीक्ष्य=विलोक्य, पर्यटय्य=परिभ्रम्य, कोऽयम्=कोऽस्ति, इति=एवम्, च, साम्रेडितम्=बहुवारम्, व्याहृत्य=निगद्य, कमपि=कञ्चिदपि, अनवलोक्य=न दृष्ट्वा, पुनर्निवृत्य=भूयः प्रत्यागत्य, मन्ये=जाने, कोऽपि मार्जारः=बिडालः, इति, गुरवे=मुनये, मन्दम्=शनैः, निवेद्य=कथयित्वा, पुनस्तथैव=भूयः तेनैवप्रकारेण, उपविवेश=उपाविशत्। मुनिः=ब्रह्मचारिगुरुः, च, कञ्चिदितरः= कश्चिदन्यः, मास्म श्रौषीत्=नहि शृणुयात्, इति=एतस्मात्, सशङ्कः=आशङ्कितः सन्, क्षणम्=किञ्चित्कालम्, विरम्य=तूष्णींभूय, पुनः-भूयः, उपन्यस्तुम्=स्वकथनं वक्तुम्, आरेभे=समारभत।

**व्याकरणम्** – अपरिचितजनेषु– न परिचिताः, अपरिचिताः, अपरिचिताश्च ते जनाश्च, अपरिचितजनाः, तेषु। निर्मक्षिके– मक्षिकाणाम् अभावो निर्मक्षिकम्, तस्मिन् निर्मक्षिके। ससेनम्=सेनया सहितम्, अन्यमनस्के– अन्यस्मिन् मनोयस्य सः अनन्यमनस्कः, तस्मिन्। सशङ्कः– शङ्कया सहितः।
संवृत्ते– सम्+वृत्+क्त। निर्यातेषु– निर्+या+क्त। योद्धुम्– युध्+तुमुन्। प्रस्थितस्य– प्र+स्था+क्त (ष.ए.व.)। अवधार्य– अव+धृ+णिच्+ल्यप्। समुत्थाय– सम्+उद्+स्था+ल्यप्। उपन्यस्तुम्– उप+नि+अस्+तुमुन्। आरेभे– आ+रभ्+लिट्।

**भावार्थः** – ततः अपरिचितजनेषु गते सति आचार्यः गौरवटुमाहूय शिववीरेण सह योद्धुं प्रस्थितस्य अफजलखानस्य विषये किञ्चित् प्रष्टुमिच्छति स्म, तदा एव कस्यापि पादध्वनिश्रुतिपथमायाति खिन्नः मुनिः गौरवटुश्चध्वनेः कारणं ज्ञातु परितः पश्यति भ्रमति च। परं कमपि अदृष्ट्वा 'कश्चन मार्जारो प्रतीयते' इत्युक्त्वा पुनरुपाविशत्। मुनिश्च क्षणं विरम्य पुनः वदति।

**मूलम्** – **''वत्स गौरसिंह! अहमत्यन्तं तुष्यामि त्वयि, यत्त्वमेकाकी अफजलखानस्य त्रीनश्वान् तेन दासीकृतान् पञ्चब्राह्मणतनयांश्च मोचयित्वा आनीतवानसीति। कथं न भवेदीदृशः? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्। तावत् पुनरश्रूयत मर्मरः पादक्षेपश्च। ततो विरम्य, मुनिः स्वयमुत्थाय, प्रोच्चं शिलापीठमेकमारुह्य, निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामास चरणाक्षेपशब्दस्य। अतः पुनरेकतानेन निपुणं निरीक्षमाणेन गौरसिंहेन दृष्टम् यत् कुटीरनिकटस्थनिष्कुटकदलीकूटे द्वित्रास्तरवोऽतितरां कम्पन्ते इति।''**

**प्रसङ्गः** – गौरवटुं किमपि वक्तुम् उद्यतः मुनि पुनः पादाचारस्य ध्वनिं शृणोति। अनुक्षणमेव उभावपि तत्कारणमन्वेष्टुं तत्परौ भवतः।

**व्याख्या** – वत्स=पुत्र!, गौरसिंह=गौरबटु, अहम्=गुरुः, त्वयि=भवति, अत्यन्तम्=अत्यधिकम्, तुष्यामि=प्रीणामि, यत्=यस्मात् त्वमेकाकी=त्वमेव केवलः, अफजलखानस्य=तन्नामकस्य, त्रीन श्वान्=त्रीन् घोटकान्, तेन=अफलजखानेन, दासीकृतान्=भृत्यीकृतान्, पञ्चब्रह्मणतनयान्= पञ्चविप्रबालकान्, च, मोचयित्वा तद्बन्धनाद् उन्मुच्य, आनीतवान् असि=समानयः इति, कथम्=केन प्रकारेण, न भवेः=न स्याः, ईदृशः=एवं विधः, राजपूतदेशीयक्षत्रियाणाम्=''राजपूताना'' इति देशस्य क्षत्रियाणाम्, कुलमेव=वंशमेव, ईदृशम्=एतादृशम्।
तावत्=तदैव, पुनः=भूयः, मर्मरः=शुष्कपर्णध्वनिः, पादक्षेपः=चरणसञ्चारः, च,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अश्रूयत=श्रुतिमापतत्, ततः=तदनन्तरम्, विरम्य=क्षणं स्थित्वा, मुनिः=ब्रह्मचारिगुरुः, स्वयमुत्थाय=उत्थानं विधाय, प्रोच्चम=अत्युन्नतम्, एकम्=अन्यतमम् शिलापीठम्=पाषाणखण्डम्, आरुह्य=आरोहणं विधाय, निपुणतया=सम्यग्रूपेण, परितः=समन्ततः, पश्यन्=अवलोकयन्, अपि, चरणाक्षेपशब्दस्य=पादक्षेपस्य, किमपि=किञ्चिदपि, कारणम्=निमित्तम्, न अवलोकयामास=न अपश्यत्। अतः=अनेन कारणेन, पुनः=+भूयः, एकतानेन=एकचित्तेन, निपुणम्=सम्यक्, निरीक्षमाणेन=विलोक्यमानेन, गौरसिंहेन=गौरब्रह्मचारिणा दृष्टम्=विलोकितम्, यत्, कुटीरनिकटस्थनिष्कुटककदलीकूटे=पर्णशालासमीपस्थवाटिकारम्भासमूहे, द्वित्रा=द्वौ त्रयो वा, तरवः=पादपः अतितराम्=अधिकतराम्, कम्पन्ते=वेपन्ते, इति।

**व्याकरणम्** – मोचयित्वा– मुच्+णिच्+क्त्वा। आनीतवान्– आ+नी+क्तवतु। विरम्य– वि+रम्+ल्यप्। निरीक्षमाणेन– निर्+ईक्ष+शानच्। दृष्टम्–दश्+क्त। अतितरा– अति+तरप्।

ब्राह्मणतनयान्– ब्राह्मणानां तनयान्। पादक्षेपः–पादयोः क्षेपः। शिलापीठम्– शिलायाः पीठम्। कुटीरनिकटस्थ निष्कुटककदलीकूटे– कुटीरस्य निकटस्थाः निष्कुटकाः, तेषु कदलीनां कूटे।

**भावार्थः** – पुत्रगौरसिंह ! त्वमेकाकी एव अफजलखानस्य त्रीन् अश्वान् पञ्चब्राह्मणान् च मोचयित्वा आनीतवान् अतोऽहं प्रसन्नोऽस्मि। राजपुत्रदेशे समुत्पनाः क्षत्रियाः एतादृशा एव भवन्ति। तदैव भूयः पादक्षेपः श्रूयते ततः मुनि स्वयमेव प्रोच्चं शिलाखण्डमारूह्य परितः पश्यति ध्वनेः कारणं न ज्ञायते। पुनः सावधानतया पश्यता गौरसिंहेन दृष्टं यत् पर्णोटजसमीपे कदलीगुल्मे द्वित्रावृक्षाः अतिकम्पमाना वर्तते।

**मूलम्** – **तदेव संशयस्थानमित्यङ्गुल्या निर्दिश्य कुटीरवलीके गोपयित्वा स्थापितानामसीनामेकमाकृष्य, रिक्तहस्तेनैव मुनिना पृष्ठतोऽनुगम्यमानः, कपोलतलविलम्बमानान् चक्षुचुम्बिनः, कुटिलकचान् वामकराङ्गुलिभिरपसारयन्, मुनिवेषोऽपि किञ्चित् कोपकषायितनयनः, करकम्पितकृपा-कृपणकृपाणो महादेव-माराधयिषुस्तपस्विवेषोऽर्जुन इव शान्तवीररसद्वयस्नातः सपदि समागतवान् तन्निकटे, अपश्यच्च लता-प्रतान-वितान-वेष्टित-रम्भा-स्तम्भा-त्रितयस्य मध्ये नीलवस्त्र-खण्डवेष्टितमूर्द्धानं हरितकञ्चुकं श्यामवसनानद्धकटितट- कर्बुराधोवसनम् काकासनेनोपविष्टम्, रम्भालवाललग्नाधोमुखखड्गत्सरुन्यस्तविपर्यस्त हस्तयुगलम्, लशुनगन्धिभिर्निःश्वासैः कदलीकिसलयानि मलिनयन्तम्, नवाङ्कुरितश्मश्रुश्रेणिच्छलेन कन्यकापहरणपङ्ककलङ्कितानम् विंशतिवर्षकल्पं यवनयुवकम्। ततः परस्परं चाक्षुष सम्पन्ने दृष्टोऽहमिति निश्चित्य, उत्प्लुत्य, कोशात् कृपाणमाकृष्य, युयुत्सुः सोऽपि सम्मुखमवतस्थे। ततस्तयोरेव सञ्जाताः परस्परमालापाः।**

**प्रसङ्गः** – कुटीर समीपे संशयस्थानं निरीक्ष्यमाणः गौरसिंहः वृक्षपर्णेषु निलीनं म्लेच्छं पश्यति एतस्य वर्णनं करोति ग्रन्थकारः

**व्याख्या** – तदेव=एतदेव, संशयस्थानम्=सन्देहास्पदम्, इति=एवम्, अङ्गुल्या=अङ्गुलिसङ्केतेन, निर्दिश्य= सन्दर्श्य, कुटीरवलीके=पर्णशालापटले, गोपयित्वा=गोपनं कृत्वा, स्थापितानाम्= निहितानाम्, असीनाम्=कृपाणानाम्, एकम्=अन्यतमम् आकृष्य=निष्कास्य, रिक्तहस्तेनैव= शून्यहस्तेनैव, मुनिना=गुरुणा पृष्ठतोऽनुगम्यमानः=पृष्ठतोऽनुस्रियमाणः, कपोलतलविलम्बमानान्= गण्डसंलग्नान्, चक्षुश्चुम्बिनः=नेत्रसंस्पर्शिनः, कुटिलकचकान्= वक्रकुन्तलान्, वामकराङ्गुलिभिः= वामहस्ताङ्गुलिभिः, निवारयन्, दूरी कुर्वन्, मुनिवेषः=ऋषिवेषः, अपि, किञ्चितकोपक–



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

षायितनयन:=ईषत्क्रोधकलुषितनेत्र:, करकम्पितकृपाकृपणकृपाण:= हस्तकम्पित दयाविरहितासि:, महादेवम्=शिवम्, आरिराधयिषु=सेवितुमिच्छु: तपस्विवेषोऽर्जुन इव=तापसवेषधारि पार्थ इव, शान्वीररसद्वयस्नात:= शमोत्साहनिष्पन्नरसयुगलावगाहित:, सपदि=सत्वरम्, समागतवान्= समागच्छत्, तन्निकटे=तत्समीपे, अपश्यत्=अवलोकयत् लताप्रतानवितान वोष्टितरम्भास्तम्भा-त्रितयस्य=व्रततिसूक्ष्मतन्तुविस्तारवलयितकदलीस्तम्भत्रयस्य, मध्ये=आभ्यन्तरे, नीलवस्त्रखण्ड-वेष्टितमूर्द्धानम्=नीलाम्बरखण्डवेष्टितशिरोभागम्, हरितकञ्चुकम्=हरित चोलकम्, श्यामवस-नानद्धकटितटकर्बुराधोवसनम्=कृष्णपटानद्धकटिभागकर्बुराधोवस्त्रम्, काकासनेनोपविष्टम्= वायसासनेन तिष्ठन्तम् रम्भालवाललग्नाधोमुखखड्गत्सरुन्यस्तविपर्यस्त हस्तयुगलम्= कदल्यावा-पलग्ननिम्नमुखासिमुष्टिकोपपरिधृतविपर्यस्तकरद्वयम्, लशुनगन्धिभि:=रसोनगन्धिभि:, नि: श्वासै:=श्वासै:, कदलीकिसलयानि=रम्भापलाशान्, मलिनयन्तम्=दूषयन्तम्, नवाङ्कुरितश्म-श्रुश्रेणिच्छलेन=नवस्फुरितश्मश्रुव्याजेन, कन्यकापहरण पङ्कलङ्कपङ्कलङ्कितानम्=बालिका-चौर्य-पङ्कपङ्किलवदनम्, विंशतिवर्षकल्पम्=विंशतिवर्षदेशीयम्, यवनयुवकम्=म्लेच्छयुवकम्, तत:=दर्शनोत्तरम्, परस्परम्=अन्योन्यम्, चाक्षुषे=चक्षुरिन्द्रियजन्यप्रत्यक्षे, सम्पन्ने=जाते, दृष्टोऽहम्=अवलोकितोऽहम्, इति=एवम्, निश्चित्य=निश्चयंकृत्वा, उत्प्लुत्य=उत्पत्य कोशात्, कृपाणम्=खडगम्, आकृष्य=निष्कास्य, युयुत्सु:=योद्धुमिच्छु:, सोऽपि=यवनोऽपि, सम्मुखम्=गौरसिंहसमक्षम्, अवतस्थे=संस्थितो बभूव, तत:=तदनन्तरम्, तयो:=गौरसिंहयव-नयुवकयो:, एवम्=इत्थंप्रकारेण, सञ्जाता:=सम्पन्ना:, परस्परम्=अन्योन्यम्, आलापा:=वार्तालापा:

**व्याकरणम्** – संशयस्थानम्- संशयस्य स्थानम्। कुटिलकचकान्-कुटिला: कचा: कुटिलकचा:, तान्। रिक्तहस्तेन-रिक्त: हस्त: यस्यासौ रिक्तहस्त:, तेन। कोपकषायितनयन:- कोपेन कषायिते नयने यस्य स:। करकम्पितकृपाकृपणकृपाण:- करे कम्पित: कृपाकृपण: कृपाणो यस्य स:। तपस्विवेष:- तपस्विनां वेषो यस्य स:। हरितकञ्चुकम्-हरितं कञ्चुकं यस्य, तम्। लताप्रतानवितान-वेष्टितरम्भास्त-म्भत्रितयस्य- लतानां प्रतानानि लताप्रतानानि, तेषां वितानम्, तेन वेष्टितम्, रम्भास्तम्भानां त्रितयम्, तस्य। काकासनेन- काकानाम् आसनेन। रम्भालवाललग्ना-धोमुखखड्गत्सरुन्यस्तविपर्यस्त-हस्तयुगलम्-रम्भालबाले लग्नाधोमुखखड्ग: तस्य त्स्रु:, विपर्यसतं च तद् हस्तयुगलम्। निर्दिश्य- निर+दिश्+क्त्वा+ल्यप्। गोपयित्वा- गुप्+णिच्+क्त्वा। आकृष्य- आ+कृष्+ल्यप् अनुगम्यमान:- अनु+गम्+णिच्+शानच्, अपसारयन्- अप+सृ+णिच्+शतृ। आरिराधयिषु+आ+राध्+सन्+उ। उत्प्लुत्य- उत्+प्लुङ्+क्त्वा>ल्यप्। युयुत्सु: युध्+सन्+उ। अवतस्थे-अव+स्था+लिट्।

**भावार्थ:** – अफलजखानविषयकं विमर्शावसरे मर्मरध्वनिं श्रुत्वा 'कुत इदमिति अन्वेषणपर: गौरसिंह: कुटीर निकटस्थे कदली समूहे कम्पमानान् वृक्षान् पश्यति, स च गुरुणा अनुगम्यमान: सकृपाण: तत्र गच्छति, कन्यापहारकं यवनहतकं च पश्यति। सोऽपि 'अहं दृष्ट' इति निश्चित्य युद्धं कर्तुं सम्मुखं स्थितो भवति। ततश्च तयो: सञ्जाता: परस्परमालापा:।'

**मूलम्** – **गौरसिंह:- कुतो रे यवनकुलकलङ्क?**

**यवन-युवक:- आ:! वयमपि कुत इति प्रष्टव्या:? भारतीय- कन्दरिकन्दरेष्वपि वयं विचराम:, श्रृंग-लाङ्गूलविहीनानां हिन्दुपदव्यवहार्याणाञ्च युष्मादृक्षाणां पशूनामाखेटक्रीडया रमामहे।**

**गौरसिंह:- ( सकोध्रं विहस्य ) वयमपि स्वाङ्कागतसत्वृत्तय: शिवस्य गणा-अत्रैव निवसाम:,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तत् सुप्रभातमद्य स्वयमेव त्वं दीर्घ-दावदहने पतङ्गायितोऽसि।**
**यवन-युवकः- अरे रे वाचाल! ह्यो रात्रौ युष्मत्कुटीरे रुदतीं समायातां ब्राह्मणतनयां सपदि प्रयच्छथ, तत् कदाचिद् दयया जीवतोऽपि त्यजेयम्, अन्यथा मदसिभुजङ्गिन्या दंष्टाः क्षणात् कथावशेषाः संवर्त्स्यथ।**

**प्रसङ्गः** – गौरसिंह-यवनयुवकयोः पारस्परिकवार्तालापं वर्णयति ग्रन्थकारः।

**व्याख्या** – गौरसिंह- रे यवनकुलकलङ्क! =रे यवनवंशपातक! कुतः=कस्मात् स्थानात् समागतोऽसि।
यवनयुवकः- आः=इतिखेदे, वयमपि=यवनाअपि, कुतः=कुत्रत्यः इति=एवम्प्रकारेण, प्रष्टव्याः= प्रश्नस्य विषयाः, सन्ति किम? भारतीयकन्दरिकन्दरेष्वपि=भारतवर्षीयशैलगह्वरेषुअपि, वयम्=यवनाः विचरामः=+अटामः, शृङ्गलाङ्गूलविहीनानाम्=विषाणलाङ्गूलरहितानाम्, हिन्दुपदव्यवहार्याणाम्= हिन्दुपदवाच्यानाम् च, युष्मादृक्षाणाम् भवादृशानाम्, पशूनाम्=जन्तूनाम्, आखेटक्रीऽया= मृगयाखेलया, रमामहे=प्रमोदामहे।
गौरसिंहः- (सक्रोधम्=सकोपम्, विहस्य=हसित्वा) वयमपि=आश्रमवासिनोऽपि, स्वाङ्कागतसत्ववृत्तयः=निजक्रोडागतप्राणिवृत्तयः, शिवस्य=शङ्करस्य, गणाः=रुद्रादयः, अत्रैव=इहैव, निवसामः=वासं कुर्मः, तत्=तस्माद्धेतोः अद्य=अधुना, सुप्रभातम्=सुदिवसः, त्वम्=यवनयुवकः, स्वयमेव=आत्मनैव, दीर्घदावानले=पतङ्गायितोऽसि=पतङ्गमिव समाचरसि।
यवनयुवकः- अरे रे वाचाल=वृथाजल्पक! ह्यः=विगते, रात्रौ=निशायाम्, युष्मत्कुटीरे=भवदुटजे, रुदतीम्=विलपन्तीम्, समायाताम्=आगतवतीम्, ब्राह्मणतनयाम्=विप्रसुताम्, प्रयच्छथ=निवर्तयथ, तत् कदाचित्, दयया=ममकृपया, जीवतः=प्राणान्धारयतः, त्यजेयम्=मुञ्चेयम्, अन्यथा= एतद्विपरीते, मदसिभुजङ्गिन्या=मत्कृपाणसर्पिण्या, दंष्टाः=कर्तिताः, क्षणात्=क्षणानन्तरम्, कथावशेषाः=नाममात्रावशेषाः, संवर्त्स्यथ=स्थास्यथ।

**व्याकरणम्** – भारतीयकन्दरिकन्दरेषु- कन्दराःसन्ति अस्मिन् इति कन्दरी, भारतीयाः कन्दरिणः तेषां कन्दराः, तासु। स्वाङ्कागत सत्ववृत्तयः- स्वाङ्के आगता, स्वाङ्कागताः ते च सत्वाः, स्वाङ्कागत सत्वाः वृत्तिर्येषां ते।
पतङ्गायति- पतङ्ग+क्यङ्+क्त। प्रष्टव्या- प्रच्छ+तव्य+जस। रुदती- रुद्+शतृ+ङीप्। दंष्टाः- दंश+क्त। संवत्स्यर्थ- सम्+वृत+लृट्।

**भावार्थः** – गौरसिंह वदति- रे यवनकुलकलङ्क कुत आगतोऽसि उत्तरे म्लेच्छयुवकः वदति कुत वयमितिन पृष्टव्याः, भारतीयपर्वतकन्दरासु हिन्दुपशूनां मृगयया विचरणं कुर्मः। गौरसिंह वदति अद्यत्वं दीर्घ दावानले पतङ्गमिव स्वयमेव पतितोऽसि। यवनः वदति रेवाचाल! गतरात्रौ युष्मत् कुटीरे समागतां ब्राह्मण कन्यां शीघ्रं प्रयच्छथ न चेद् मदसिभुजङ्गिन्या दंष्टाःशीघ्रमेव मृत्युं प्राप्स्यथ।

**मूलम्** – **कलकलमेतमाकर्ण्य श्यामवटुरपि कन्यासमीपादुत्थाय दृष्ट्वा च हन्तुमेतं यवनवराकं पर्याप्तोऽयं गौरसिंह इति मा स्म गमदन्योऽपि कश्चित् कन्यकामपजिहीर्षुरिति वलीकादेकं विकटखड्गमा-कृष्य त्सरौ गृहीत्वा कन्यकां रक्षन् तदध्युषित-कुटीर-निकट एव तस्थौ। गौरसिंहस्तु 'कुटीरान्तः कन्यकाऽस्ति, सा च यवन-वध- व्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं नाम स्प्रष्टुम्? तद् यावत् तव कवोष्ण-शोणित-तृषित एष चन्द्रहासो न चलति, तावत् कूर्दनं वा उत्फालं वा यच्चिकीर्षसि तद् विधेहि' इत्युक्त्वा व्यालीढमर्य्यादया सज्जः समतिष्ठत।**

**प्रसङ्गः** – गौरसिंह-यवनयुवकयोवार्तालापं श्रुत्वा कुटीरस्थो श्यामवटुरपि सन्नद्धो भवति। गौरसिंहश्च यवन



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

युवकमुत्तरं वदति।

**व्याख्या** – कलकलम्=कोलाहलम्, एतम्=समीपस्थम्, आकर्ण्य=निशम्य, श्यामबटुः=द्वितीयब्रह्मचारी, कन्यासमीपात्=बालिकापार्श्वातृ, उत्थाय=उत्तिष्ठितोभूत्वा=दृष्ट्वा=विलोक्य, च, एतम्=समागतम्, यवनवराकम्=क्षुद्रयवनम्, हन्तुम्=मारयितुम्, अयं गौरसिंहः=अयं गौरवटुः, पर्याप्त=अलम्, इति=इत्थम्, विचार्य=निश्चित्य, मा स्म, गमदन्योऽपि कश्चित्=अन्यो जनो न आयातु, कन्यकाम्=बालिकाम्, अपाजिहीर्षुः=अपहरणंकर्तुमिच्छुः, इति=एतस्मात्, वलीकात्=पटलात्, एकम्=अन्यतमम्, विकटखड्गम्=भयंकरकृपाणम्, आकृष्य=समादाय, त्सरौ=मुष्टिकायाम्, गृहीत्वा=संगृह्य, कन्यकाम्=ब्राह्मणबालिकाम्, रक्षन्=रक्ष्यमाणः, तदध्युषितकुटीरनिकटे= बालिकासेवितपर्णशाला समीपे, एव, तस्थौ=स्थितो वभूव।

गौरसिंहस्तु=तन्नामको ब्रह्मचारी तु, कन्यकाः बालिका कुटीरान्तः=कुटीरमध्ये, अस्ति=वर्तते, सा=बालिका, च, यवनवधव्यसनिनि=म्लेच्छवधसंकल्पशीले, मयि=गौरसिंहे, जीवति= प्राणान्धारयति सति, द्रष्टुमपि=अवलोकयितुमपि, न शक्या=न सम्भवा, किंनाम= का चर्चा, स्प्रष्टुम्=स्पर्शकर्तुम्, तद्=तस्मात्, यावत्=यावत्कालम्, तव=यवनस्य, कवोष्णशोणित तृषित=कोष्णरक्तपिपासितः, एषः=अयम्, चन्द्रहासः=कृपाणः, न चलति=न परिस्फुरति, तावत=तत्कालं यावत्, कूर्दनम्=उत्पातनम्, वा=अथवा, उत्फालम्=उत्प्लवनं वा, यत् चिकीर्षसि=कर्तुमिच्छसि, तद्विधेहि=तत्कुरु, इत्युक्त्वा=एवं कथयित्वा, व्यालीढमर्य्यादया= युद्धावस्थानविशेष मर्यादया, सज्जः=उद्यतः, समतिष्ठत्=संस्थितोऽभवत्।

**व्याकरणम्** – कन्यासमीपात्– कन्यायाः समीपात्। विकटश्च खड्गश्च, तं विकटखड्गम्। यवनवधव्यसनिनि– यवनानांवध एव व्यसनं यस्य, तस्मिन्। व्यालीढमर्यादया– व्यालीढस्य मर्यादा, तया।

हन्तम्– हन्+तुमुन्। अपजिहीर्षुः– अप्+हृ+सन+उ। अध्युषित– अधि+वस्+क्त। शक्या– शक्+यत्+टाप्। कूर्दनम्– कूर्द+ल्युट्। उत्फालनम्– उद्+फाल्+ल्युट्। चिकीर्षसि– कृ+सन्+लट्+सिप्। समतिष्ठत– सम्+स्था+लङ्।

**भावार्थः** – गौरसिंह यवनयुवकयोर्वार्तालापं श्रुत्वा श्याम वटुरपि सज्जो अभवत्। यवन हन्तुं गौरसिंहरेव पर्याप्त इति विचिन्त्य, अन्य कोऽपि न समागच्छेत् इति च विचार्य हस्ते खडगमादायकन्यारक्षणे तत्परोऽभूत् गौरसिंहश्च यवनयुवकमवोचत् यावत् तव कोष्णरुधिरपिपासितोऽयं खड्गः न चलति तावत् कूदनं उत्फालं वा कुरु। अनुक्षणमेव सः प्रहारे तत्परोऽभूत्।

**मूलम्** – **ततो गौरसिंहः दक्षिणान् वामांश्च परश्शतान् कृपाणमार्गा- नङ्गीकृतवतः दिनकरस्पर्शचतुर्गुणी-कृतचाकचक्यैः चञ्चच्चन्द्रहासचमत्कारैश्चक्षूंषि मुष्णतः, यवनयुवकहतकस्य, केनाप्यनुलक्षितो-द्योगः, अकस्मादेव स्वासिना कलितक्लेदसंजा- तस्वेदजलजालं विशिथिलकचकुलमालं भग्नभ्रूभयानकभालं शिरश्चिच्छेद।**

**प्रसङ्गः** – अत्र परस्परं संलापानन्तरं अनुक्षणमेव स्वकीयेन खड्गेन अपाजिहीर्षुःम्लेच्छयुवकस्य शिरश्छिनत्ति इति वर्णयति ग्रन्थकारः।

**व्याख्या** – ततः=तदनन्तरम्, गौरसिंह=गौरबटुः, दक्षिणान्=सव्यान्, वामांश्च=सव्येतरांश्च, परश्शतान्=शताधिकान्, कृपाणमार्गान्=खड्गयुद्धपथान्, अङ्गीकृतवतः=स्वीकृतवतः, दिनकरकरस्पर्शचतुर्गुणीकृतचाकचक्यैः=रवि किरणसम्पर्कचतुर्गुणीकृतप्रतिभासविशेषैः, चञ्चच्चन्द्रहासचमत्कारैः=सञ्चरत्खड्गचमत्कारैः, चक्षूंषि=नेत्राणि, मुष्णतः=चोरयतः, यवनयुवकहतकस्य=दुष्टमलेच्छयुवकस्य, कलितक्लेदसञ्जातस्वेद जलजालम्=व्याप्तश्रमजनित–



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

घर्मजलसमूहम्, विशिथिलकचकुलमालम्=परिभ्रष्टकेशसमूहपङ्क्तिम्, भग्नभ्रूभयानकभालम्=छिन्नभ्रूभीषण ललाटम्, शिरः=मस्तकम्, केनापि, अनुपलक्षितोद्योगः=अदृष्ट प्रयासः, अकस्मादेव=सहसैव, स्वासिना=स्वकृपाणेन, चिच्छेद=अच्छिनत्।

**व्याकरणम्** – कृपाणस्य मार्गान् कृपाणमार्गान्। दिनकरकरस्पर्श चतुर्गुणीकृतचाकचक्यैः– दिनकरस्य कराणां स्पर्शेन चतुर्गुणीकृतंचाकचक्यं यैस्तैः। चञ्चच्चन्द्रहासचमत्कारैः– चञ्चतः चन्द्र हासस्य चमत्कारैः। अनुपलक्षितोद्योगः– कलितेन क्लेदेन सञ्जातस्य स्वेदजलस्य जालं यस्मिन् तत्। विशिथिलकच-कुलमालम्– विशिथिलाः, कचानां कुलस्य माला: यस्मिन् तत्।
मुष्णतः– मुष्+तसिल्। कलित– कल्+क्त। भा+लच्। चिच्छेद– छिद्+लिट्।

**भावार्थः** – तत्पश्चात् गौरसिंहः दक्षिणवामान् शताधिकान् खड्गप्रहारान् अङ्गीकृतवतः रविकिरण-स्पर्शसंवर्धितचाकचक्यैः सञ्चरत् खड्गचमत्कारैः नेत्राणिश्चोरयतः तस्य म्लेच्छस्य सहसैव निजचन्द्रहासेन शिरः कर्तयामास

**मूलम्** – **अथ मुनिरपि दाडिमकुसुमास्तरणाच्छन्नायामिव गाढरुधिर- दिग्धायां ज्वलदङ्गरचितायां चितायामिव वसुधायां शयानं वियुज्यमानभारत- भुवमालिङ्गन्तमिव निर्जीवीभवदङ्गबन्धचालनपरं शोणितसंङ्घातव्याजेनान्तः स्थितरजोराशिमिवोदगिरन्तं कलितसायन्तनघनाऽऽडम्बरविभ्रमं सतत-ताम्रचूडभक्षणपातकेनेव ताम्रीकृतं छिन्नकन्धरं यवनहतकमवलोक्य सहर्षं ससाधुवादं सरोमोद्गमञ्च गौरसिंहमाश्लिष्य, भ्रूभङ्गमात्राज्ञप्तेन भृत्येन मृतककञ्चुककटि- बन्धोष्णीषादिकमन्विष्याऽऽनीतम् पत्रमेकमादाय सगणः स्वकुटीरं प्रविवेश।**

**प्रसङ्गः** – ब्राह्मणकन्यापहरणपरस्य म्लेच्छयुवकस्य शिरच्छेदनात् प्रसन्नः ब्रह्मचारिगुरुः गौरसिंहमालिङ्गते।

**व्याख्या** – अथ=तत्पश्चात् मुनिः=ब्रह्मचारिगुरुः, अपि, दाडिमकुसुमास्तरणाच्छन्नायामिव=करकप्रसूनविष्टर-युक्तायामिव, गाढरूधिरदिग्धायाम्=घनीभूतरक्तलिप्तायाम्, ज्वलदङ्गारचितायाम्=प्रज्वलदङ्गारैः व्याप्तायाम्, चितायाम्=चितौ, इव=यथा, वसुधायाम्=धरायाम्, शयानम्=सुप्तम्, वियुज्यमानभारतभुवम्=विरहय्यमानभारतवसुन्धराम्, आलिङ्गन्तम्=आश्लिष्यन्तम्, इव, निर्जीवीभवदङ्गबन्धचालनपरम्=निष्प्राणतांगच्छदङ्गसन्धिचालननिरतम्, शोणितसंघातव्याजेन=रुधिर प्रवाहच्छलेन, अन्तः स्थितरजोराशिम्=शरीराभ्यन्तरस्थरजोगुणसमूहम्, इव, उद्गिरन्तम्=वमन्तम्, कलितसायन्तनघनाऽऽडम्बरविभ्रमम्=धृतसायम्भवमेघविडम्बनविलासम्, सततताम्र चूडभक्षणपातकेनेव=निरन्तरचरणायुधभक्षणपापेनेव, ताम्रीकृतम्=रक्तीकृतम्, छिन्नकन्धरम्=भग्नग्रीवम्, यवनहतकम्=दुष्टयवनम्, अवलोक्य=दृष्ट्वा, सहर्षम्=सानन्दम्, ससाधुवादम्=प्रशंसासहितम्, सरोमोद्गमम्=सरोमाञ्चम्, च, गौरसिंहम्=गौरवटुम्, आश्लिष्य=समालिङ्ग्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन=भ्रूवक्रतामात्रनिर्देशेन, भृत्येन=सेवकेन, मृतककञ्चुककटिबन्धोष्णीषादिकम्=मृत्युङ्गतयवनस्यकञ्चुक जघनपट्टिकोष्णीषादिकम्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्विष्य=अन्वेषणं विधाय, आनीतम्=समुपस्थापितम्, एकं पत्रम्=लेखमेकम्, आदाय=गृहीत्वा, सगणः=ससमूहः, स्वकुटीरम्=निजपर्णशालाम्, प्रविवेश=प्रविष्टः।

**व्याकरणम्** - दाडिमकुसुमास्तरणम्- दाडिमस्य कुसुमानि, तेषाम् आस्तरणम्। गाढरुधिरदिग्धायाम्- गाढ़ैः रुधिरैः दिग्धायाम्।ज्वलदङ्गारचितायाम्- ज्वलद्भिः अङ्गारैः चितायाम्। वियुज्यमानभारतभुवम्- वियुज्यमानां भारतस्य भुवम्। शोणितसंघात व्याजेन- शोणितानां संघातस्यव्याजेन। सतताम्रचूडभक्षणपातकेन- सततं यत् ताम्रचूडस्य भक्षणम्, तदेव पातकम्, तेन। छिन्नकन्धरम्- छिन्ना कन्धरा यस्य सः, तम्। आच्छन्ना- आ+छद्+क्त+टाप्। शयानम्- शीङ्+शानच् वियुज्यमानम्=वि+युज्+शानच्, निर्जीवीभवत्- निर्+जीव+च्वि+भू+शतृ। उद्गिरन्तम्- उद्+गिर+शतृ। ताम्रीकृतम्- ताम्र+च्वि+कृतम्। आश्लिष्य- आ+श्लिष्+ल्यप्।

**भावार्थः** - यवनवधानन्तरं करकप्रसूनविष्टरयुक्तायामिव गाढरक्त लिप्तायां ज्वलदङ्गारचितायामिव भूमिमालिङ्गनपरमिव प्रतीयमानं, निरन्तर कुक्कुटभक्षणजन्यपापेन ताम्रीकृतम् इव प्रतीयमानम् छिन्नकन्धरं म्लेच्छयुवकं दृष्ट्वा आचार्यः अपि सहर्षं सरोमाञ्चं गौरसिंहमालिङ्गितवान्। सङ्केतेन आदिष्टेन भृत्येन यवनचोलकाद् प्राप्तं पत्रं स्वीकृत्य स्वोटजं प्रविष्टवान् इति।

## वस्तुनिष्ठप्रश्नाः-

1. ''अभिनवबाण'' इति नाम्ना कः सम्बोध्यते?
   - (अ) बाण भट्टः
   - (ब) पं. अम्बिकादत्तव्यासः
   - (स) दण्डी
   - (द) कालिदासः
2. पं. अम्बिकादत्तव्यासस्य जन्म कदाऽभवत्?
   - (अ) 1858 तमे वर्षे
   - (ब) 1900 तमे वर्षे
   - (स) 1880 तमे वर्षे
   - (द) 1800 तमे वर्षे
3. पं. अम्बिकादत्तव्यासस्य जन्म कुत्र अभवत्?
   - (अ) जयपुरनगरे
   - (ब) अजयमेरुनगरे
   - (स) वाराणस्याम्
   - (द) बिहार प्रदेशे
4. एकस्यामेव घटिकायां श्लोक शतकनिर्माणाद् काशी-ब्रह्मामृतवर्षिणी सभायां ''घटिकाशतक'' इत्युपाधिना कः अलङ्कृतोऽभूत्?
   - (अ) पण्डितराज जगन्नाथः
   - (ब) भारविः
   - (स) पं. अम्बिकादत्त व्यासः
   - (द) महाकविमाघः
5. ''शतावधान'' इति प्रसिद्धिं को ऽवाप?
   - (अ) दण्डी
   - (ब) महाकविकालिदासः
   - (स) माघः
   - (द) पं. अम्बिकादत्त व्यासः
6. ''शिवराजविजयम्'' कीदृशो उपन्यासः विद्यते?
   - (अ) सामाजिकः
   - (ब) राजनैतिकः
   - (स) धार्मिकः
   - (द) ऐतिहासिकः
7. शिवराजविजयस्य कथावस्तु कतिविरामेषु विभक्तमस्ति?
   - (अ) त्रिषु
   - (ब) पञ्चसु
   - (स) चतुर्षु
   - (द) षट्सु
8. शिवराजविजये ऽङ्गीरस रूपेणाङ्गीकृतः?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(अ) वीररस: (ब) भयानकरस:
(स) रौद्ररस: (द) शान्तरस:

9. शिवराजविजये नायक: क:?
(अ) शिववीर: (ब) पं. अम्बिकादत्तव्यास:
(स) अवरङ्गजीव: (द) रघुवीरसिंह:

10. शिववीर: कीदृश: नायक:?
(अ) धीरोदात्त: (ब) धीरोद्धत:
(स) धीरललित: (द) धीरप्रशान्त:

11. शिवराजविजये प्रतिनायक: क:?
(अ) अवरङ्ग जीव: (ब) रघुवीरसिंह
(स) महमूद: (द) शिववीर:

12. शिवराजविजये उपनायक: क:?
(अ) शिववीर: (ब) रघुवीरसिंह:
(स) अवरङ्गजीव: (द) गौरसिंह:

13. शिवराजविजये कविकल्पनावतीर्णा भारतीया रमणी का?
(अ) सौवर्णी (ब) माया
(स) रसनारी (द) सौवर्णी सखी

14. ''विक्रमराज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रव:'' इति कस्य कथनम्?
(अ) ब्रह्मचारिगुरो: (ब) योगिराजस्य
(स) शिववीरस्य (द) रघुवीरसिंहस्य

15. कन्यापहरणं क: कृतवान्?
(अ) अवरङ्गजीव: (ब) कश्चन दुष्टयवन:
(स) महमूद: (द) गौरसिंह:

16. भारतवर्षमाक्रम्य पौन: पुन्येन द्वादशवारं क: अलुण्ठत् विपुलं धनञ्च स्वदेशमनयत्?
(अ) महामदो महमूद: (ब) कुतुबुद्दीन:
(स) शहाबुद्रदीन: (द) अवरङ्ग जीव:

17. प्रथमभारतवर्ष सम्राट् को ऽभूत्?
(अ) अवरङ्गजीव: (ब) कुतुबुद्दीन:
(स) शिववीर: (द) शास्तिखान:

18. यवनहतकाद् सप्तवर्षदेशीयां बालिकां क: रक्षितवान्?
(अ) गौरसिंह: (ब) रघुवीरसिंह:
(स) श्यामसिंह: (द) योगिराज:

19. दिल्लीश्वरत्वं क: कलङ्कयति?
(अ) शास्तिखान: (ब) शहाबुद्दीन:
(स) अवरङ्गजीव: (द) महमूद:

20. महाराष्ट्रप्रदेशं क: प्रशास्ति?
(अ) शिववीर: (ब) अवरङ्गजीव:
(स) रघुवीरसिंह: (द) शास्ति खान:

21. शिववीर: कुत्र निवसति?
(अ) सिंहदुर्गे (ब) चन्द्र दुर्गे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(स) तोरण दुर्गे (द) सूर्य दुर्गे

22. शिववीरं वशीकर्त्तुं क: यवनसेनानी प्रेषित:?
(अ) अवरङ्ग जीव: (ब) कुतुबुद्दीन:
(स) शास्ति खान: (द) महमूद:

23. बीजापुरं क: प्रशास्ति?
(अ) शास्तिखान: (ब) अवरङ्गजीव:
(स) शिववीर: (द) कुतुबुद्दीन:

24. "विजयतां शिववीर:, सिद्धयन्तु भवतां मनोरथा:" इति कस्य कथनम्?
(अ) योगिराजस्य (ब) शिववीरस्य
(स) ब्रह्मचारिगुरो: (द) रघुवीरसिंहस्य

25. कन्यापहारकं यवन हतकञ्च क: पश्यति हन्ति च?
(अ) श्यामसिंह: (ब) ब्रह्मचारि गुरु:
(स) गौरसिंह: (द) रघुवीर सिंह:

## अतिलघूत्तरात्मकप्रश्ना:-

1. शिवराजविजय: काव्यस्य कतमां कोटिमाटिकते?
2. शिवराजविजयस्य कर्त्ता क:?
3. श्रीमदम्बिकादत्त व्यासस्य जन्म कदाऽभवत्?
4. श्रीमदम्बिकादत्त व्यासस्य मृत्यु: कदाऽभवत्?
5. शिवराजविजयो गद्यकाव्यं पद्यकाव्यं वा?
6. शिवराजविजयस्य नायक: क:?
7. शिवराजविजयस्य प्रतिनायक: क:?
8. मरीचिमाली कस्य नाम विद्यते?
9. गौरवटु: श्यामवटुश्च कौ स्त:?
10. महामद: कस्य देशस्य निवास्यासीत्?
11. सोमनाथतीर्थम् कस्मिन् प्रदेशे वर्तते?
12. प्रथमभारत सम्राट् क: सञ्जात:?

## लघूत्तरात्मक प्रश्ना: -

1. विष्णोर्माया भगवतीत्यादि वाक्यं कुत उद्धृतम्?
2. पर्वतस्य कन्दरे क आसीत्?
3. सप्तवर्षदेशीया बालिका का आसीत्?
4. वीरविक्रमस्य काले भारतवर्षे किमभवत्?
5. शहाबुद्दीन: क आसीत्?
6. पृथिवीराज: कुत्रत्यो राजा आसीत्?
7. जयचन्द्र: कुत्रत्यो राजा आसीत्?
8. कुतुबुद्दीन: क आसीत्?
9. शास्तिखान: क आसीत्?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

10. शिववीरः कुत्र निवसतिस्म ससेनः?
11. शिववीरेण का प्रतिज्ञा कृता?
12. अफजलखानः क आसीत्?

**निबन्धात्मक प्रश्नाः -**

1. रुदन्त्याः बालिकायाः विषये योगिराजेन पृष्टः किं प्राह ब्रह्मचारिगुरुः?
2. यवनानां राज्ये भारतवर्षे किमभवत्?
3. शिववीरस्य कीदृशं वैशिष्ट्यमासीत्?
4. प्रथमनिःश्वासस्य सारांश स्वशब्देषु लिखत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भूमिका

## संस्कृतं नाम दैविवागन्वाख्याता महर्षिभिः, दण्डी

संस्कृतभाषा सर्वभाषाजननी देवभाषा श्रेष्ठभाषा चेति ख्याता। अस्यामेव भारतीयसंस्कृतेः प्राणभूताः वेदोपनिषद्रामायण-महाभारत-पुराणादयः ग्रन्थाः संरचिताः विद्यन्ते। संस्कृतसाहित्यं द्विविधम्- वैदिकं लौकिकञ्च। वेदोपनिषदः वैदिकसाहित्ये समायान्ति। लौकिकसाहित्यस्य काव्यस्य प्रारम्भः आदिकवि-महर्षि-वाल्मीकि-रचितात् रामायणादेवाभवत्। काव्यं द्विविधम्- दृश्यं श्रव्यञ्च। दृश्यं रूपकाणि उपरूपकाणि च। श्रव्यकाव्यस्य उपभेदत्रयम्-गद्य-पद्य-चम्पू इति। पद्यकाव्यस्य उपभेदत्रयम्- महाकाव्यं, खण्डकाव्यं गीतिकाव्यञ्च। महाकाव्यं सर्गबन्धं महापुरुषचरितात्मकं विद्यते। खण्डकाव्यं मानवजीवनोचितमेकदेशीयकथानकाधारितं दृश्यते। गीतिकाव्यस्योपभेदद्वयं कर्तुं शक्यते- प्रबन्धात्मकं मुक्तकञ्च। संस्कृते शतकग्रन्थाः अस्यामेव कोटौ समाविष्टाः सन्ति। यथा-अग्निपुराणे उक्तं - **मुक्तकं श्लोक एवैकश्चमत्कारक्षमं सताम्।** यत्र सहृदयाहृदयाह्लादाः श्लोकाः विद्यन्ते, तत् काव्यं मुक्तककाव्यं कथ्यते। ध्वन्यालोके आचार्य-आनन्दवर्धनेन प्रोक्तं 'पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम्' अर्थात् मुक्तककाव्ये श्लोकाः पूर्वापरप्रसङ्गरहिताः रसास्वादनाय स्वतन्त्रकाव्यत्वक्षमाश्च भवन्ति । महाकविभर्तृहरेः शतकत्रयं मुक्तककाव्यत्वं भजते।

**जीवनपरिचयः**- संस्कृतसाहित्ये प्रसिद्धानां कालिदासादीनां कवीनां सदृशः अस्य कवेः जीवनपरिचयविषये प्रामाणिकं किमपि नोपलभ्यते तथापि अन्तः-बाह्यप्रमाणानुसारं वक्तुं शक्यते यत् कवेः जीवनं राजकीयं भोगैश्वर्ययुक्तमासीत्। वाक्यपदीयस्य मङ्गलश्लोकः '**अनादिनिधनं ब्रह्म**' नीतिशतकस्य मङ्गलश्लोकः '**अनन्तचिन्मात्रमूर्तये**' एताभ्यां श्लोककाभ्यां कविरयं ब्रह्मवादीति प्रतीयते। अस्य कवेः जीवनवृत्तविषये अनेकाः जनश्रुतयः प्रचलिताः सन्ति। तदनुसारं कविरयं मालवाप्रदेशनिवासी क्षत्रियः आसीत्। पितुः नाम गन्धर्वसेनः। गन्धर्वसेनस्य पत्नीद्वयमासीत्। तयोः द्वौ पुत्रौ जातौ।

**भर्तृहरिः** विक्रमादित्यश्च। धाराधिपतेः पुत्री विक्रमादित्यस्य मातासीत्। कालक्रमेण सन्तानरहितः धारानृपतिः स्वराज्यं विक्रमादित्याय प्रदातुमिष्टवान् परन्तु विक्रमादित्यः अग्रजाय भर्तृहरये राज्यं प्रदाय तस्य मन्त्रीत्वेन कार्यं कृतवान्। मालवाप्रदेशस्य राजधानी धारानगरी परिवर्त्य उज्जयिनी अभवत्। राजसत्तां प्राप्य भर्तृहरिः विषयासक्तः संजातः। एकदा प्रेयसीकथनेन कुपितः सन् विक्रमादित्यं राज्यात् बहिष्कृतवान्।

**भर्तृहरेः** जीवनस्य एका महत्त्वपूर्णा घटना- एकदा केनचित् ब्राह्मणेन वा यतिना नृपाय भर्तृहरये एकमायुवर्द्धकं दिव्यं फलं प्रदत्तम्। तत् फलं नृपः स्वयं अखादित्वा स्वप्रियपत्न्यै पद्माक्ष्यै वा अनङ्गसेनायै वा पिङ्गलायै प्रदत्तवान्। सा तत् फलं स्वप्रियतमाय बलाध्यक्षाय दत्तवती। सः बलाध्यक्षोऽपि प्रेमिकावेश्यायै अयच्छत्। सा वेश्या तत् फलं महाराजाय भर्तृहरये प्रदत्तवती। तत् फलं विलोक्य नृपः चकितोऽभवत्। अनन्तरं संपूर्णं रहस्यं विज्ञाय स नृपः दुःखितो जातः। प्रसङ्गेऽस्मिन् श्लोकोऽयं विरचितः-

**यां चिन्तयामि सततं मयि सा विरक्ता, साऽप्यन्यमिच्छति जनं स जनोऽन्यसक्तः।**
**अस्मत्कृते च परितुष्यति काचिदन्या, धिक् ताञ्च तञ्च मदनञ्च इमाञ्च माञ्च।**

अनन्तरं नृपः भर्तृहरिः अनुजाय विक्रमादित्याय राज्यं समर्प्य वैराग्यं गृहीतवान्। योगिगोरखनाथस्य शिष्यत्वं गृहीत्वा योगसाधनामकरोत्। ततः भगिनीपुत्रेण गोपीचन्देन सह तीर्थानि भ्रमित्वा समाधौ लीनः संजातः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कवेः कृतित्वम्**– (मुक्तककाव्यत्रयम्)१. नीतिशतकम्, २. शृङ्गारशतकम्, ३. वैराग्यशतकम्,। (व्याकरणशास्त्रमेकम्) ४. वाक्यपदीयम्।

**नीतिशतकस्य परिचयः**– अत्र शतके प्रतिपाद्यश्लोकाः लोकव्यवहारोपयोगिनः विद्यन्ते। कश्चित् मनुष्यः एतान् श्लोकान् पठित्वा नैतिकसिद्धान्तान् सद्गुणान् च स्वजीवने समाचर्य्य सत्पुरुषः भवितुं शक्नोति। नीतिशतकमिदं मुक्तककाव्यं विद्यते। कविना बहुविधाः प्रसङ्गाः सुवर्णिताः। यथा– सद्गुणमहिमा, नीचजनस्य दुष्टता, मूर्खस्य जडता, विद्या–महत्त्वम्, विवेकहीनजनस्य अधोगतिः, धनस्य महत्ता, सत्सङ्गतेः महत्त्वम्, परोपकारस्य महत्त्वञ्च। नीतिशतकमिदं सर्वश्रेष्ठं नीतिप्रधानमुपदेशात्मकं व्यावहारिकञ्चास्ति। रचनेयं संस्कृतसाहित्यस्यामूल्यनिधिस्वरूपा विद्यते। सत्यमुक्तम्–

**जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः। नास्ति येषां यशः काये जरामरणजं भयम्।**

**सूक्तयः**– १. न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्। २. विभूषणं मौनमपण्डितानाम्। ३. नहि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्। ४. विवेकभ्रष्टानां भवति विनिपातः शतमुखः। ५. मूर्खस्य नास्त्यौषधम्। ६. वाग्भूषणं भूषणम्। ७. विद्याविहीनः पशुः। ८. सत्संगतिः कथय किं न करोति पुंसाम्। ९. प्रारब्धमुत्तमजना न परित्यजन्ति। १०. न खलु वयस्तेजसो हेतुः। ११. सर्वे गुणाः काञ्चनमाश्रयन्ति। १२.नानाफलैः फलति कल्पलतेव भूमिः /विद्या १३. वाराङ्गनेव नृपनीतिरनेकरूपा। १४. सेवाधर्मः परमगहनो योगिनामप्यगम्यः। १५. मणिना भूषितः सर्पः किमसौ न भयङ्करः। १६. स्वभाव एवैष परोपकारिणाम्। १७. न निश्चितार्थाद् विरमन्ति धीराः। १८. मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्। १९. शीलं परं भूषणम्। २०. न्यायात् पथः प्रविचलन्ति पदं न धीराः। २१. विधिरहो बलवानिति मे मतिः। २२. रक्षन्ति पुण्यानि पुरा कृतानि। २३. प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः। २४. लोकत्रयं जयति कृत्स्नमिदं स धीरः। २५. सुखमसूनपि सन्त्यजन्ति सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम्।

डॉ. निरञ्जन साहुः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### महाकविभर्तृहरिविरचितम्

## नीतिशतकम्

### मङ्गलाचरणम्

**दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये।**
**स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ।। १ ।।**

**अन्वयः**-दिक्कालादि+अनवच्छिन्न+अनन्तचिन्मात्रमूर्तये स्व+अनुभूति+एकमानाय शान्ताय तेजसे नमः।

**प्रसङ्गः**- अत्र महाकविना भर्तृहरिणा नमस्कारात्मकं मङ्गलाचरणं प्रस्तूयते।

**व्याख्या**-दिक्=दिशा, कालादि=भूत-भविष्यत्-वर्तमान-समयादि, अनवच्छिन्ना=अखण्डा, अनन्ता=अन्तरहिता, चिन्मात्रं-ज्ञानमयी मूर्ति-स्वरूपं यस्य तस्मै ज्ञानस्वरूपाय, स्वानुभूत्येकमानाय=स्वस्य अनुभूतिः अनुभवः एकं मानं =प्रमाणं यस्य तत् तस्मै शान्ताय =शान्तस्वरूपाय, तेजसे=ज्योतिषे परब्रह्मणे, नमः=नमोनमः।

**भावार्थः**- दिशा-समयादि-विभेदक-तत्त्वरहिताय अखण्ड-ज्ञानस्वरूपाय निजानुभवप्रमाणाय शान्तस्वरूपाय ज्योतिःस्वरूपिणे परब्रह्मणे नमोनमः।

अत्र नमस्कारात्मकं मङ्गलाचरणम्, अनुष्टुप् छन्दः।

**बोद्धारः मत्सरग्रस्ताः, प्रभवः स्मयदूषिताः।**
**अबोधोपहताश्चान्ये, जीर्णमङ्गे सुभाषितम्।। २ ।।**

**प्रसङ्गः**-अत्र कवेः आशयः यत् अधुना सर्वे जनाः ईर्ष्याहंकारपीडिताः सन्ति अतः सुभाषितं शरीरे जीर्णतां गतम्।

**अन्वयः**- बोद्धारः मत्सरग्रस्ताः प्रभवः स्मयदूषिताः अन्ये च अबोधोपहताः सुभाषितम् अङ्गे जीर्णम्।

**व्याख्या**- बोद्धारः=ज्ञानिनः, मत्सरग्रस्ताः=ईर्ष्यापीडिताः, प्रभवः=स्वामिनः, स्मयेन दूषिताः= अहंकारेण मलिनाः संजाताः, अन्ये= इतरे जनाः, अबोधेन उपहताः=अज्ञानेन नष्टाः, सुभाषितम्=साधु वचनम्, अङ्गे=अवयवे, जीर्णम्=अन्तर्जातम् / नष्टम्।

**भावार्थः**-ज्ञानिजनाः ईर्ष्याग्रस्ताः सन्ति, स्वामिनः धनिकाः अहंकारयुक्ताः वर्तन्ते, अन्ये सामान्यजनाः ज्ञानरहिताः अतः सुन्दरं वचनं हृदये अन्तर्हितं विद्यते।

व्याकरणम्-बोद्धारः = बुध्+तृच् कर्तरि। मत्सरेण ग्रस्ताः=मत्सरग्रस्ताः तृ 0 तत् 0। स्मयदूषिताः= स्मयेन + दूषिताः तृ 0 तत् 0 । सुभाषितम् = सु + भाष् +क्त भावे। जीर्णम्= जॄ+क्त।

**छन्दः**-अनुष्टुप्,

**अलङ्कारः**-काव्यलिङ्गम्।

**अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।**
**ज्ञानलवदुर्विदग्धं ब्रह्मापि तं नरं न रञ्जयति।। ३ ।।**

**प्रसंगः**- सर्वे जनाः बोधयितुं शक्यन्ते परन्तु अल्पज्ञानगर्विष्ठं (अल्पज्ञानपण्डितमानिजनं) ब्रह्मापि प्रसादयितुं नैव समर्थः।

**अन्वयः**-अज्ञः सुखम् आराध्यः विशेषज्ञः सुखतरम् आराध्यते ज्ञानलवदुर्विदग्धं नरं ब्रह्मापि न रञ्जयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या**- अज्ञः= न जानाति इति अज्ञः मूर्खः, सुखम्= अनायासेन, आराध्यः= आराधयितुं शक्यः, **विशेषज्ञः**= विशेषं जानातीति पण्डितजनः, सुखतरम्=अधिकसरलेन, आराध्यते=प्रसाद्यते, ज्ञानलवदुर्विदग्धं=अल्पज्ञानेन गर्विष्ठम्, नरं= जनम्, ब्रह्मापि=पितामहोऽपि, न रञ्जयति= न प्रसादयति।

**व्याकरणम्**- अज्ञः = न ज्ञः = ज्ञा + क। आराध्यः = आ+ राध्+ ण्यत् । सुखतरम्=सुख+तरप् । ज्ञानलवदुर्विदग्धम्= ज्ञानस्य लवेन दुर्विदग्धः तम् तृ0 तत्0।

**भावार्थः**-यः किमपि न जानाति सः सुखेन आराधयितुं शक्यते, विद्वज्जनः अधिकसुखेन वशीक्रियते। परन्तु अल्पज्ञानेन स्वं पण्डितमानिनं जनं विधातापि प्रसादयितुं नैव समर्थो भवति।

**छन्दः**-आर्या।

**प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात् ,**
**समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम्।**
**भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-**
**न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।४।।**

**प्रसङ्गः**-सर्वाणि असम्भवानि कार्याणि कर्तुं शक्यन्ते परन्तु दुराग्रहाविष्टमूर्खजनचित्तं कदापि आराधयितुं नैव शक्यते।

**अन्वयः**-मकरवक्त्रदंष्ट्रान्तरात् प्रसह्य मणिमुद्धरेत्। प्रचलत् ऊर्मिमालाकुलं समुद्रम् अपि सन्तरेत्, कोपितं भुजङ्गमपि शिरसि पुष्पवद्धारयेत् तु प्रतिनिविष्टमूर्खजनचित्तं न आराधयेत्।

**व्याख्या**-मकरो जलजन्तुविशेषः तस्य वक्त्रस्य मुखस्य दंष्ट्राणाम् अग्रदन्तानाम् अन्तरात् मध्यात् , प्रसह्य=बलात्, मणिम्=रत्नम्, उद्धरेत्=बहिः निष्कासयितुं शक्नुयात्, प्रचलत्=उत्तिष्ठत् , ऊर्मिमालाकुलम्=तरङ्गसमूहैः आकुलम्=व्याप्तम्, समुद्रम् अपि= सागरम् अपि, सन्तरेत्=तर्तुं समर्थो भवेत्, कोपितम्=क्रुद्धम्, भुजङ्गमपि=सर्पमपि, शिरसि=मस्तके, पुष्पवत्= कुसुमवत् धारयेत्=धारयितुं शक्नुयात्, तु प्रतिनिविष्टमूर्खजनचित्तम्= परन्तु दुराग्रहाविष्टं मूढजनस्य चित्तं मनः, न आराधयेत्=प्रसादयितुं समर्थो भवेत्।

**भावार्थः**=मानवः मकरस्य दन्तमध्यात् बलपूर्वकं रत्नं निःसारयितुं समर्थो भवेत्। महातरङ्गाकुलं सागरमपि तर्तुं शक्नुयात्। क्रुद्धं सर्पमपि मालावत् मस्तके धारयितुं शक्नुयात्। परन्तु जडबुद्धिमनुष्यमनः समाधातुं न समर्थो भवेत् अर्थात् दुराग्रहाविष्टस्य मूर्खजनस्य पुरतः सुभाषितवचनानि निरर्थकानि भवन्ति।

व्याकरणम्- प्रसह्य = प्र + सह् + ल्यप्। प्रतिनिविष्टमूर्खजनचित्तम्= प्रतिनिविष्टश्चासौ मूर्खजनः (कर्मधा) तस्य चित्तम्।

**छन्दः**-पृथ्वी।

**अलङ्कारः**-उपमा रूपकातिशयोक्तिश्च।

**लभेत सिकतासु तैलमपि यत्नतः पीडयन्,**
**पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः।**
**कदाचिदपि पर्यटञ्छशविषाणमासादयेत्,**
**न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्।।५।।**

**प्रसङ्गः**- सर्वाणि असम्भवानि कार्याणि कर्तुं शक्यन्ते परन्तु दुराग्रहाविष्टमूर्खजनचित्तं कदापि आराधयितुं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

नैव शक्यते।

**अन्वयः**– यत्नतः पीडयन् सिकतासु तैलमपि लभेत। पिपासार्दितः मृगतृष्णिकासु सलिलं पिबेत् च। कदाचिदपि पर्यटन् शशविषाणम् आसादयेत्। तु प्रतिनिविष्टमूर्खजनचित्तम् न आराधयेत्।

**व्याख्या**– यत्नतः= प्रयत्नात्, पीडयन् = मर्दयन्, सिकतासु= बालुकासु, तैलमपि=स्नेहमपि, लभेत=लब्धुं प्रभवेत्। पिपासार्दितः=तृष्णार्दितः, मृगतृष्णिकासु = मृगमरीचिकासु, सलिलम्=जलम्, पिबेत्= पातुं शक्नुयात्। कदाचिदपि=कर्हिचिदपि, पर्यटन्= भ्रमन्, शशविषाणम्=शशकस्य शृङ्गम्, आसादयेत्=प्राप्तुं शक्नुयात्। तु=किन्तु, दुराग्रहाविष्टं मूढजनस्य चित्तं, मनः, न आराधयेत्=प्रसादयितुं समर्थो न भवेत्।

**भावार्थः**–कोऽपि मानवः प्रयत्नात् मर्दयन् बालुकास्वपि तैलं प्राप्तुं समर्थो भवेत्। तृष्णातुरः जनः मृगमरीचिकासु जलं पातुं शक्नुयात्। सर्वत्र भ्रमन् कदाचिदपि शशकस्य शृङ्गं लब्धुं समर्थो भवेत्। परन्तु दुराग्रहिजनस्य मूर्खस्य प्रसादने न कोऽपि समर्थो भवेत्।

**व्याकरणम्**– पीडयन्= पीड् + शतृ। पिपासार्दितः= पिपासया अर्दितः (तृ0 तत्0)। पर्यटन्=परि+अट्+शतृ। शशविषाणम्= शशस्य विषाणः (ष0 तत्0) तम्।

**छन्दः**–पृथ्वी। **अलङ्कारः**– रूपकातिशयोक्तिः।

**व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते,**
**छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यते।**
**माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते,**
**नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः।। ६।।**

**प्रसङ्गः**–महाकविना भर्तृहरिणा विरचिते श्लोके वर्णितं यत् दुष्टजनानामुपरि सुभाषितस्य न कोऽपि प्रभावः भवति।

**अन्वयः**– यः खलान् सुधास्यन्दिभिः सूक्तैः सतां पथि नेतुं वाञ्छति, असौ बालमृणालतन्तुभिः व्यालं रोद्धुं समुज्जृम्भते, शिरीषकुसुमप्रान्तेन वज्रमणिं छेत्तुं सन्नह्यते, मधुबिन्दुना क्षाराम्बुधेः माधुर्यं रचयितुम् ईहते।

**व्याख्या**–यः जनः खलान्= दुष्टान्, सुधास्यन्दिभिः = अमृतवर्षिभिः, सूक्तैः = प्रियोक्तिभिः, सतां=सज्जनानाम्, पथि= मार्गे, नेतुम्= प्रापयितुम्, वाञ्छति= इच्छति, असौ अयं जनः ,बालमृणालतन्तुभिः = कोमल–कमल–सूत्रैः, व्यालम्=दुष्टगजम्, रोद्धुम्= बद्धुम्, समुज्जृम्भते= प्रयतते, शिरीषकुसुमप्रान्तेन= अतिकोमल–शिरीषपुष्पस्य अग्रभागेन, वज्रमणिम्= कठोरहीरकमणिम्, छेत्तुम्=विदारयितुम्, सन्नह्यते= चेष्टते, मधुबिन्दुना=मधुकणेन, क्षाराम्बुधेः=लवणसमुद्रस्य, माधुर्यम्=मधुरताम्, रचयितुम्=विधातुम्, ईहते= अभिलषति।

**भावार्थः**–यो जनः दुष्टजनान् प्रियवचनैः सज्जनमार्गे नेतुमभिलषति। सः जनः कोमलैः पङ्कजसूत्रैः उन्मत्तं गजं बद्धुमिच्छति। कोमलशिरीषपुष्पस्याग्रभागेन कठिनं हीरकं भेत्तुमभिलषति तथा मधुकणेन लवणार्णवस्य मधुरतां रचयितुं वाञ्छति इति।

**व्याकरणम्**–माधुर्यम्= मधुर+ष्यञ् । रोद्धुम् =रुध् +तुमुन्। नेतुम् = नी + तुमुन्। रचयितुम् = रच् + णिच् +तुमुन्।

**छन्दः**–शार्दूलविक्रीडितम्, **अलंकारः**–निदर्शना।

**स्वायत्तमेकान्तगुणं विधात्रा विनिर्मितं छादनमज्ञतायाः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम्।। ७।।**

**प्रसङ्गः**– मूर्खजनानां कृते प्रजापतिना मौनम् अज्ञतायाः छादनरूपेण विनिर्मितम्।

**अन्वयः**– विधात्रा अपण्डितानां स्वायत्तम् एकान्तगुणं मौनम् अज्ञतायाः छादनं विनिर्मितम्, सर्वविदां समाजे विशेषतः विभूषणम् भवति।

**व्याख्या**– विधात्रा= प्रजापतिना, अपण्डितानाम्= अज्ञजनानाम्, स्वायत्तम्= स्वस्य आयत्तं स्वाधीनम्, एकान्तगुणं= निश्चितगुणं हितकरम्, मौनम्= मुनेर्भावं मूकत्वम्, अज्ञतायाः=मूर्खतायाः, छादनम्= आवरणम्, विनिर्मितम्= विहितम्, सर्वविदाम्= सर्वज्ञानाम्, समाजे= समूहे, विशेषतः= विशेषरूपेण, विभूषणम्=अलङ्करणं भवति।

**व्याकरणम्**– विधात्रा = वि+धा+तृच्–तेन। अपण्डितानाम् = न पण्डिताः नञ् समासः तेषाम्। स्वायत्तम्= स्वस्य आयत्तम्(ष0 तत्0)। छादनम्=छद्+णिच्+ल्युट्। विनिर्मितम्= वि+नि+मा+क्त। सर्वविदाम्= सर्व +विद् +क्विप् तेषाम्। विशेषतः=वि + शिष् +घञ् +तस्। विभूषणम्= वि+भूष्+ल्युट्।

**भावार्थः**–ब्रह्मणा मूर्खाणां कृते स्वाधीनं हितकरं मूकाश्रयणमावरणम् अज्ञतालोपकं विहितम्। विदुषां समाजे विशेषरूपेण मौनं तेषामाभरणं भवति।

**यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवं,**
**तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।**
**यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं,**
**तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः।। ८।।**

**प्रसङ्गः**– अहंकारिजनस्य मदः सज्जनसंगमे ज्वरः इव दूरीभवति।

**अन्वयः**–– यदा किञ्चित् ज्ञः अहं द्विप इव मदान्धः समभवं, तदा सर्वज्ञः अस्मि इति अभवत् अवलिप्तं मम मनः। यदा बुधजनसकाशात् किञ्चित् किञ्चिद् अवगतं, तदा मूर्खः अस्मि इति ज्वर इव मदः मे व्यपगतः।।

**व्याख्या**– यदा= यस्मिन् काले, किञ्चित्=अल्पम्, ज्ञः=जानाति इति, अहं द्विपः=गजः, इव मदान्धः=मदेन अन्धः, समभवम्=भूतवान् , तदा=तस्मिन् काले, सर्वज्ञः=सर्वं जानामि इति, अस्मि इति अभवत्=अभूत्, अवलिप्तम्=सगर्वमभवत्, मम= मे, मनः=चित्तम्। यदा= यस्मिन् काले, बुधजनसकाशात्=विद्वज्जनसम्पर्कात्, किञ्चित् किञ्चिद् =स्वल्पं स्वल्पम्, अवगतम्=ज्ञातम्, तदा= तस्मिन् काले, मूर्खः= मूढः, अस्मि इति ज्वरः=संतापः, इव मदः=गर्वम्, मे=मम, व्यपगतः=दूरीभूतः।।

**व्याकरणम्**– ज्ञः= ज्ञा+क। मदान्धः=मदेन अन्धः(तृ0 तत्0)। अवलिप्तम् = अव+लिप्+क्त। अवगतम् =अव+गम्+क्त। व्यपगतः= वि+अप्+गम्+क्त।

**भावार्थः**–अहं यथाकथञ्चिदपि अल्पज्ञानमासाद्य सर्ववेत्तास्मि इति अहंकारेण गज इव मदान्धः अभवम्। परन्तु यदा विद्वज्जनसम्पर्कात् स्वल्पं स्वल्पं ज्ञातवान्। तदा अहं मूढः अस्मि इति मदीयः मदः ज्वरः इव विनष्टः।

**छन्दः**–शिखरिणी।

**कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**निरुपमरसं प्रीत्या खादन्नरास्थि निरामिषम्।**
**सुरपतिमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते,**
**न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम्।। ९ ।।**

**अन्वयः**- श्वा कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं निरामिषं नरास्थि निरुपमरसं प्रीत्या खादन् सुरपतिम् अपि श्वा पार्श्वस्थं विलोक्य न शङ्कते। क्षुद्रो जन्तुः परिग्रहफल्गुतां न हि गणयति ।।

**व्याख्या**-श्वा = कुक्कुरः, कृमीनां कुलानि तैः चितं कृमिकुलचितम् = कीटसमूहव्याप्तम्, लालाभिः क्लिनम् लालाक्लिन्नम् = लालासिक्तम्, विगन्धि = दुर्गन्धयुतम्, जुगुप्सितम्=घृणास्पदम्, निर्गतम् आमिषं निरामिषं = मांसरहितम्, नराणाम् अस्थि नरास्थि= मानवकीकसम्, निरुपमरसम् = अपूर्वं स्वादु, प्रीत्या= सानन्देन, खादन् = भक्षयन्, सुराणां पतिं सुरपतिम् = इन्द्रम्, अपि पार्श्वस्थम् = समीपस्थम्, विलोक्य = दृष्ट्वा, न शङ्कते= न सन्दिह्यते। हि=यतोहि, क्षुद्रः=नीचः, जन्तुः = प्राणी, परिग्रहस्य फल्गुतां परिग्रहफल्गुतां =परिग्रहणासारताम्, न गणयति = न विचारयति ।।

व्याकरणम्= लालाक्लिन्नम् = लालाभिः क्लिनम् (तृ 0 तत् 0)। निरामिषम् = निर्गतम् आमिषं यस्मात् तत्, बहुव्रीहिः। निरुपमरसम् = निरुपमो रसः यस्य तत् बहुव्रीहिः। पार्श्वस्थम् = पार्श्व + स्था +क। खादन् = खाद् + शतृ। सुरपतिम् = सुराणां पतिः (ष0तत्0 )तम्। विलोक्य= वि + लुक् +ल्यप्।

**भावार्थः**-कुक्कुरः कीटसमूहव्याप्तं मुखरससिक्तं दुर्गन्धं घृणास्पदं मांसरहितं मानवकीकसं भक्षयन् समीपस्थं सुरपतिं दृष्ट्वा न लज्जते। यतोहि नीचः जीवः स्वीकृतपदार्थस्य निःसारतां न विचारयति।

**छन्दः**-हरिणी। **अलङ्कारः**- अर्थान्तरन्यासः अप्रस्तुतप्रशंसा च।

**शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं,**
**महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम्।**
**अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा,**
**विवेकभ्रष्टानां भवति विनिपातः शतमुखः।। १०।।**

**प्रसङ्गः**-अत्र विवेकरहितजनानां पतनं बहुधा भवति इति कविना वर्णितम्।

**अन्वयः** - इयं गङ्गा स्वर्गात् शार्वं शिरः, पशुपतिशिरस्तः क्षितिधरम्, उत्तुङ्गात् महीध्रात् अवनिम्, अपि च अवनेः जलधिम्, अधः अधः स्तोकं पदम् उपगता । अथवा विवेकभ्रष्टानां विनिपातः शतमुखः भवति ।

**व्याख्या**-इयम् = एषा, गङ्गा = भागीरथी, स्वर्गात्=स्वर्गलोकात्, शार्वम् = शिवस्य, शिरः= मस्तकम्, पशुपतिशिरस्तः = महादेवशिरसः, क्षितिधरम् = हिमालयम्, उत्तुङ्गात् = अत्युन्नतात्, महीध्रात् = हिमालयात्, अवनिम्=पृथिवीम्, अपि च अवनेः = पृथिव्याः, जलधिम् = सागरम्, अधः अधः = नीचान्नीचतरम्, स्तोकं = तुच्छम्, पदम् = स्थानम्, उपगता= प्राप्ता । अथवा विवेकभ्रष्टानाम् = अविवेकिनाम्, विनिपातः = पतनम्, शतमुखः = बहुप्रकारः, भवति = वर्तते।

**व्याकरणम्**= शार्वम् = शर्वस्य इदम्, शर्व + अण्। पशुपतिशिरस्तः = पशुनां पतिः तस्य शिरः तस्मात्। क्षितिधरम्= क्षितेः धरः तम्। जलधिम् = जल +धा + कि। उपगता = उप + गम् +क्त +टाप् । विनिपातः = वि +नि+ पत् +घञ्। विवेकभ्रष्टानाम् = विवेकात् भ्रष्टाः तेषाम् । शतमुखः= शतानि मुखानि यस्य सः बहुव्रीहिः।

**भावार्थः**-यथा भागीरथी स्वर्गलोकात् महादेवस्य शिरसि शिवशिरसः हिमालयं हिमालयात् पृथिवीं पृथिवीतः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सागरमेवं क्रमेण निम्ननिम्नतरं स्थानं प्राप्नोति। तथैव अविवेकिनां जनानामधोऽधः पतनं जायते।
**छन्दः**–शिखरिणी, **अलङ्कारः**–अर्थान्तरन्यासः।

**शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो,**
**नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।**
**व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं,**
**सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।।११।।**

**प्रसङ्गः**– कविना प्रतिपादितं यत् शास्त्रे कथितं सर्वस्य औषधमस्ति परन्तु मूढतानिवारणाय न कोऽपि प्रतिकारोऽस्ति।

**अन्वयः**– हुतभुक् जलेन, सूर्यातपो छत्रेण, समदः नागेन्द्रः निशिताङ्कुशेन, गोगर्दभौ दण्डेन, व्याधिः भेषजसंग्रहैः, विषं च विविधैः मन्त्रप्रयोगैः, वारयितुं शक्यः। सर्वस्य शास्त्रविहितम् औषधम् अस्ति (किन्तु) मूर्खस्य औषधं नास्ति।

**व्याख्या**– हितभुक्= हुतं भुङ्क्ते इति अग्निः, जलेन=वारिणा, छत्रेण=आतपत्रेण, सूर्यातपः=सूर्यस्य आतपः घर्मः, समदः =मदेन सहितः, नागेन्द्रः=गजेन्द्रः, निशिताङ्कुशेन =तीक्ष्णाङ्कुशेन, गोगर्दभौ= गौश्च गर्दभश्च गोरासभौ, दण्डेन = लगुडेन, व्याधिः = रोगः, भेषजसंग्रहैः = औषधसंकलनेन सेवनेन च, विषञ्च = गरलञ्च, विविधैः = अनेकैः, मन्त्रप्रयोगैः = मन्त्रानुष्ठानैः, वारयितुं = दूरीकर्तुं , शक्यः = योग्यः। सर्वस्य =पदार्थजातस्य, शास्त्रविहितम् = शास्त्रसम्मतम्, औषधम् = भेषजम्, अस्ति = विद्यते (किन्तु) मूर्खस्य = मूढजनस्य, औषधम् = प्रतिकारः, नास्ति = न विद्यते।।

**व्याकरणम्**– हुत+भुज्+क्विप् = हुतभुक्। वारयितुम् = वृ +णिच् +तुमुन्। शक्यः = शक् + यत्।, निशिताङ्कुशेन = निशितश्चासौ अङ्कुशः (कर्म.) तेन। गोगर्दभौ= गौश्च गर्दभश्च (द्वन्द्व)। शास्त्रविहितम् = शास्त्रेण विहितम्(तृ.तत्.) शास् + ष्ट्रन् =शास्त्रम्, विहितम् = वि + धा+क्त।औषधम् = ओष +धा+कि।

**भावार्थः**– यथा अनलः जलेन, घर्मः छत्रेण, मदयुक्तगजः तीक्ष्णाङ्कुशेन, गोरासभौ दण्डेन, रोगः भेषजसेवनेन, विषं विविधमन्त्रप्रयोगेण शाम्यति एवं सर्वस्य शास्त्रसम्मतं भेषजमस्ति परन्तु मूर्खजनस्य किमप्यौषधं नास्ति।

**छन्दः** – शार्दूलविक्रीडितम्।

**साहित्यसङ्गीतकलाविहीनः साक्षात्पशुपुच्छविषाणहीनः।**
**तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्।।१२।।**

**प्रसङ्गः**– अत्र कविना वर्णितं यत् साहित्यसंगीतकलारहिताः मानवाः पशुतुल्याः भवन्ति।

**अन्वयः**– साहित्यसङ्गीतकलाविहीनः (नरः) पुच्छविषाणहीनः साक्षात्पशुः (अस्ति)। । (एषः)तृणं न खादन् अपि जीवमानः(भवति) तत् पशूनां परमं भागधेयम् (अस्ति)।

**व्याख्या**– साहित्यसङ्गीतकलाविहीनः =हितेन सह सहितं, सहितस्य भावः तत् साहित्यम्, सम्यग् गीतं सङ्गीतम् गानविद्या, चतुःषष्ठिसंख्याकाः कलाः ताभिः विहीनः (नरः) पुच्छविषाणहीनः = लाङ्गुलशृङ्गरहितः, साक्षात्पशुः = मूर्तिमान् पशुः (अस्ति)। । (एषः)तृणम् = घासम्, न खादन् = अभक्षयन्, अपि जीवमानः=जीवनं धारयति (भवति) ।तत् पशूनाम्= वास्तविकगवादिजन्तूनाम्, परमम् = चरमम्, भागधेयम् = सौभाग्यम् (अस्ति)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्**- साहित्यसङ्गीतकलाविहीनः=साहित्यं च सङ्गीतं च कलाश्च (द्वन्द्वः) ताभिर्विहीनः। पुच्छविषाणहीनः= पुच्छं च विषाणौ चेति (द्वन्द्वः) तैः हीनः। खादन्=खाद्+शतृ। जीवमानः= जीव् +शानच्।

**भावार्थः**- यः मनुष्यः साहित्यशास्त्रे सङ्गीतकलासु च न किञ्चिद् जानाति सः मूर्तिमान् पशुरस्ति। सः नरः घासं न भक्षयन्नपि जीवति तत् पशूनां महत् सौभाग्यमस्ति। (यदि नरपशुः तृणं खादेत् तर्हि वास्तविकपशूनां कृते भोजनमपि अवशिष्टं न भवेत्)।

**छन्दः**- उपजातिः, **अलङ्कारः**- रूपकम्।

**येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति।।१३।।**

**प्रसङ्गः**-येषां मनुष्याणां विद्यादिसुगुणाः न सन्ति ते पृथिव्यां मनुष्यरूपेण पशव एव भवन्ति।

**अन्वयः**- येषां विद्या न, तपो न, दानं न, ज्ञानं न, शीलं न, गुणो न, धर्मः न। ते मर्त्यलोके भुवि भारभूता मनुष्यरूपेण मृगाः चरन्ति।।

**व्याख्या**- येषाम्= मनुष्याणाम्, विद्या=ज्ञानकारकं शास्त्रं न, तपः =उपवासव्रतादिकं कष्टं न, दानम् = सत्पात्रे दापनं न, ज्ञानम् = सदसद्विवेकः न, शीलम् = सदाचरणं न, गुणः = दयादाक्षिण्यादिकः न, धर्मः= वेदादिशास्त्रप्रतिपादितः कर्त्तव्यविशेषः न। ते = एतादृशा नराः, मर्त्यलोके =मनुष्यलोके, भुवि = धरायाम्, भारभूताः = भारस्वरूपाः (सन्ति) मनुष्यरूपेण = मानवरूपेण (ते) मृगाः = पशवः , चरन्ति=इतस्ततः विचरन्ति।

**व्याकरणम्**- मर्त्यलोके = मर्त्यानां लोकः(ष.तत्) तस्मिन्। मनुष्यरूपेण =मनुष्याणां रूपं (तृ.तत्) तेन। मृगाश्चरन्ति = मृगाः + चरन्ति।।

**भावार्थः**- ये मानवाः विद्यया तपसा दानेन ज्ञानेन चरित्रेण सद्गुणेन धर्मेण च हीनाः सन्ति ते मरणशीले संसारे भारयुक्ताः सन्तः पृथिव्यां मनुष्यरूपेण पशव एव भवन्ति।

**छन्दः**- उपजातिः, **अलङ्कारः**-रूपकम्।

**वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।**
**न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि।।१४।।**

**प्रसङ्गः**- अत्र श्लोके कविना प्रतिपादितं यत् मूर्खजनसम्पर्कः सर्वथा त्याज्यः।

**अन्वयः**- वनचरैः सह पर्वतदुर्गेषु भ्रान्तं वरम् । सुरेन्द्रभवनेषु अपि मूर्खजनसम्पर्कः न (वरम् )।

**व्याख्या**- वनचरैः = वने चरन्ति इति अरण्यवासिनः तैः अरण्यवासिभिः, सह= साकम्, पर्वतदुर्गेषु=गिरिदुर्गमेषु स्थानेषु, भ्रान्तम् = भ्रमणम्, वरम् = श्रेयस्करम्। (किन्तु) सुरेन्द्रभवनेषु = सुरपतिप्रासादेषु, अपि मूर्खजनसम्पर्कः = अपि दुष्टजनसंसर्गः, न (वरम् )= नहि श्रेष्ठम्।

**व्याकरणम्**- वनचरैः = वने+चर्+ट। पर्वतदुर्गेषु= पर्वतानां दुर्गाणि (ष.तत्. ) पर्वताः च दुर्गाणि च (द्वन्द्वः ) तेषु। पर्वाणि सन्ति एतेषाम् इति पर्वताः, दुःखेन गम्यते इति दुर्गम्। सुरेन्द्रभवनेषु = सुराणाम् इन्द्रः तस्य भवनानि (ष.तत्. ) तेषु।

**भावार्थः**-वन्यपशुभिः सह पर्वतदुर्गेषु निवासः श्रेयस्करः भ्रमणञ्च श्रेयस्करं परन्तु मूर्खजनैः साकं देवराजस्य भवनेषु अपि वासः नैव श्रेष्ठः।

**छन्दः**- अनुष्टुप्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयाऽऽगमाः,**
**विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः।**
**तज्जाड्यं वसुधाधिपस्य कवयो ह्यर्थं विनापीश्वराः,**
**कुत्स्याः स्युः कुपरीक्षका हि मणयो यैरर्घतः पातिताः।।१५।।**

**प्रसङ्गः**– अत्र कविना वर्णितं यत् विदुषामनादरः जडतायाः परिचायकोऽस्ति।

**अन्वयः**–शास्त्रोपस्कृतशब्दसुन्दरगिरः, शिष्यप्रदेयागमाः, विख्याताः कवयः यस्य प्रभोः विषये निर्धनाः वसन्ति। तत् वसुधाधिपस्य जाड्यम्। हि कवयः अर्थं विना अपि ईश्वराः, (सन्ति) हि कुपरीक्षकाः कुत्स्याः स्युः यैः मणयः अर्घतः पातिताः।

**व्याख्या**– शास्त्रोपस्कृतशब्दसुन्दरगिरः = शास्त्रैः व्याकरणादिभिः उपस्कृताः परिष्कृताः शब्दाः तैः सुन्दराः गिरः येषां ताः शास्त्र–परिष्कृत–शब्दसुन्दर–रचनाः, शिष्यप्रदेयागमाः = अन्तेवासिप्रदानयोग्याः विद्यारहस्याः, विख्याताः= विशेषेण ख्याताः प्रसिद्धाः, कवयः = काव्यकर्तारः पण्डिताः , यस्य प्रभोः=नृपस्य, विषये = समीपे राज्ये वा, निर्धनाः = दरिद्राः, वसन्ति = निवसन्ति। तत् वसुधाधिपस्य = राज्ञः, जाड्यम्= मान्द्यम्। हि=यतोहि, कवयः= काव्यकर्मकुशलाः, अर्थम् = धनम्, विना अपि ईश्वराः = समर्थाः पूज्याः, (सन्ति) हि = यतोहि, कुपरीक्षकाः = कुत्सिताः परीक्षकाः गुणदोषानभिज्ञाः, कुत्स्याः = निन्दनीयाः, स्युः = भवेयुः, यैः = कुपरीक्षकैः, मणयः = रत्नानि, अर्घतः = मूल्यतः, पातिताः = अल्पमूल्यत्वेन नीताः।

**व्याकरणम्**= उपस्कृतः= उप+कृ+क्त+सुट्, शिष्यप्रदेयागमाः= शिष्येभ्यः प्रदेयाः आगमाः येषां ते, शिष्य–शास्+क्यप्, प्रदेय–प्र+दा+यत्, आगम–आ+गम्+अप् ।विख्याताः= वि+ख्या+क्त+ते। कुत्स्याः = कुत्स्+यत् जाड्यम्= जड + ष्यञ्। अर्घतः = अर्घ + तसिल्। पातिताः= पत्+णिच्+क्त।

**भावार्थः**– शास्त्ररचनाकुशलाः अन्तेवासिभ्यः ज्ञानप्रदानपटवः लोकप्रसिद्धाः कवयः यस्य नृपस्य प्रदेशे निर्धनाः निवसन्ति तत् नृपतेः एव जाड्यसूचकम्। कविकर्मनिपुणाः कवयस्तु धनं विनापि प्रभवः एव भवन्ति। यदि मणिपरीक्षकाः बहुमूल्यस्य रत्नस्य मूल्यं न जानन्ति तत् तेषामेव निन्दाजनकम्। रत्नानि तु स्वमूल्यानि धारयन्ति एव। अतः कथितमस्ति यत् अपारे काव्यसंसारे कविरेव प्रजापतिः।

**छन्दः**– शार्दूलविक्रीडितम्, **अलङ्कारः**–काव्यलिङ्गम्।

**हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा–**
**ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम्।**
**कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं,**
**येषां तान्प्रति मानमुज्झत नृपाः! कस्तैः सह स्पर्धते।। १६।।**

**प्रसङ्गः**– अत्र श्लोके कविः सप्रमाणं वर्णयति यत् नृपैः सदैव विद्वांसः समादरणीयाः ।

**अन्वयः**– यत् हर्तुः गोचरं न याति, सर्वदा किमपि शं पुष्णाति, अर्थिभ्यः अनिशं प्रतिपाद्यमानम् अपि परां वृद्धिं प्राप्नोति ।कल्पान्तेषु अपि निधनं न प्रयाति, विद्याख्यम् अन्तर्धनं येषाम् (अस्ति) तान् प्रति हे नृपाः! मानम् उज्झत। तैः सह कः स्पर्धते।

**व्याख्या**– हे नृपाः! = हे राजानः!, यत् = विद्याधनम्, हर्तुः = अपहरणशीलस्य चोरस्य, गोचरम्–दृष्टिपथम्,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

न याति – न गच्छति, सर्वदा = सर्वस्मिन् समये कालत्रये, किमपि = अनिर्वचनीयम्, शम् =शुभम्, पुष्णाति= वर्धयति, अर्थिभ्यः = याचकेभ्यः, अनिशम्= सततम्, प्रतिपाद्यमानम् = दीयमानम् अपि, पराम् = विपुलाम्, वृद्धिम् = समृद्धिम्, प्राप्नोति= लभते । कल्पान्तेषु= प्रलयेषु अपि, निधनम् = नाशम्, न प्रयाति = न गच्छति, विद्याख्यम्= विद्यानामकम्, अन्तर्धनम् =गुप्तवित्तम्, येषाम्= विदुषाम् (अस्ति) तान् = विद्याधनान्, प्रति मानम् = अहङ्कारम्, उज्झत = त्यजत । तैः सह = विद्वद्भिः साकम्, कः स्पर्धते = कः स्पर्धां करोति।

**व्याकरणम्**- हर्तुः= हृ + तृच् , तस्य। गोचरम्=गो+चर्+घ। अर्थिभ्यः = अर्थ +इनि, तेभ्यः। विद्याख्यम्= विद्या +आख्या यस्य।

**भावार्थः** – न चोरहार्यं सदा शुभङ्करं याचकेभ्यः निरन्तरं प्रदानात् अत्यन्तं वर्धमानं प्रलयेष्वप्यविनाशि एतादृशं विद्याधनं येषां विदुषां विद्यते तान् विदुषः प्रति हे नृपाः ! गर्वं परित्यजत। तैः पण्डितैः सह न कोऽपि स्पर्द्धां कर्तुं शक्नोति।

**छन्दः** = शार्दूलविक्रीडितम्, **अलङ्कारः** = व्यतिरेकः।

**अधिगतपरमार्थान् पण्डितान् माऽवमंस्था-**
**स्तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि।**
**अभिनवमदलेखाश्यामगण्डस्थलानां,**
**न भवति विसतन्तुर्वारणं वारणानाम्।। १७।।**

**प्रसङ्गः** – तत्त्वज्ञाः विद्वांसः धनलोलुपाः न भवन्ति अतः ते सम्माननीयाः।

**अन्वयः**- अधिगतपरमार्थान् पण्डितान् माऽवमंस्थाः लघु तृणमिव लक्ष्मीः तान् न एव संरुणद्धि। अभिनवमदलेखाश्यामगण्डस्थलानां वारणानाम् विसतन्तुः वारणं न भवति ।

**व्याख्या**- अधिगतपरमार्थान् = परमश्चासौ अर्थश्च परमार्थः अधिगतः परमार्थः तैः तान् = सदसद्विवेकिनः, विदुषः, = पण्डितान्, मा अवमंस्थाः = मा तिरस्कुरु, लघु = क्षुद्रम्, तृणमिव = घासमिव, लक्ष्मीः = कमला, तान् = पण्डितान्, न एव संरुणद्धि= बाधितुं नैव शक्नोति। अभिनवमदलेखाश्यामगण्डस्थलानाम् = अभिनवः यः मदः दानं तस्य लेखा पङ्क्तिः तया श्यामानि कृष्णवर्णानि गण्डस्थलानि कपोलस्थलानि येषां तेषां वारणानां गजानाम्, विसतन्तुः = पङ्कजनालसूत्रम्, वारणम् = रोधकम्, न भवति = न जायते।

**व्याकरणम्**-- पण्डितान् = पण्डा + इतच्-तान्। वारणम् = वृ + णिच् +ल्युट्।

**भावार्थः** – हे राजन् ! तत्त्वज्ञानशीलान् पण्डितान् मा तिरस्कुरु। कमलया ते पण्डिताः क्षुद्रं घासमिव रोद्धुं न शक्यन्ते। यथा नवीनमदेन आर्द्रगण्डस्थलानां गजानां कोमलकमलनालसूत्रं वारणाय न भवति।

**छन्दः**- मालिनी, **अलङ्कारः** – दृष्टान्तः।

**अम्भोजिनीवनविहारविलासमेव,**
**हंसस्य हन्ति नितरां कुपितो विधाता।**
**न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां,**
**वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः।। १८।।**

**प्रसङ्गः**- अस्मिन् श्लोके विदुषां गुणाः कविना प्रशंसिताः। कुपितो ब्रह्मापि हंसस्य यशोऽपहर्तुं नैव शक्नोति।

**अन्वयः**- नितरां कुपितः विधाता हंसस्य अम्भोजिनीवनविहारविलासम् एव हन्ति । न तु असौ अस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिम् अपहर्तुम् समर्थः।

**व्याख्या**= नितान्तम्, कुपितः =क्रुद्धः, विधाता = ब्रह्मा, हंसस्य =मरालस्य, अम्भोजिनीवनविहारविलासम् = कमलिनी-कानन-विहारम्, एव हन्ति =नष्टं कर्तुं शक्नोति । न तु असौ = किन्तु न विधाता, अस्य = हंसस्य, दुग्धजलभेदविधौ = क्षीरनीर-विभागविधाने, प्रसिद्धाम् = ख्याताम्, वैदग्ध्यकीर्तिम् = जगत्प्रसिद्धयशः, अपहर्तुम् = दूरीकर्तुम्, समर्थः = समर्थः भवति।

**व्याकरणम्**=- नितराम् = नि + तरप् +आम्। कुपितः = कुप् + क्त। विधाता = वि + धा + तृच्। अम्भोजिनीवनविहारविलासम् = अम्भस् + जन् +ड=अम्भज + इनि -ङीप्=अम्भोजिनी। वि + हृ +घञ्=विहार, वि +लस् + घञ्=विलास+तम्। प्रसिद्धाम्= प्र + सिध् +क्त +टाप्। वैदग्ध्यकीर्तिम् =विदग्धस्य भावः= वैदग्धम् तेन कीर्तिः (तृ.तत्.) ताम्। दुग्धजलभेदविधौ= दुग्धञ्च जलञ्च (द्वन्द्वः) तयोः भेदः तस्य विधिः (तत्पु.) तस्मिन् ।

**भावार्थः**--अत्यन्तं कुपितः ब्रह्मा हंसस्य कमलवनविहारलीलां नशितुं शक्नोति किन्तु कुपितः ब्रह्मापि तेषां हंसानां नीरक्षीरविवेकप्रसिद्धकीर्तिं नंष्टुं नैव समर्थो भवति।

**छन्दः**-वसन्ततिलका, **अलङ्कारः**-अप्रस्तुतप्रशंसा।

**केयूराणि न भूषयन्ति पुरुषं, हारा न चन्द्रोज्ज्वलाः,**
**न स्नानं, न विलेपनं, न कुसुमं, नालङ्कृता मूर्धजाः।**
**वाण्येका समलङ्करोति पुरुषं, या संस्कृता धार्यते,**
**क्षीयन्ते खलु भूषणानि सततं, वाग्भूषणं भूषणम्।।१९।।**

**प्रसङ्गः**- अत्र कविः समुपदिशति यत् वाग्भूषणं भूषणेषु सर्वोत्तमं विद्यते।

**अन्वयः**- पुरुषं केयूराणि न, चन्द्रोज्ज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्कृता मूर्धजा न भूषयन्ति। एका संस्कृता वाणी या धार्यते, (सा) पुरुषं समलङ्करोति। खलु भूषणानि क्षीयन्ते । वाग्भूषणं सततं भूषणम्।

**व्याख्या**- पुरुषम् = मानवम्, केयूराणि = अङ्गदादीनि बाहुभूषणानि, न भूषयन्ति = नालङ्कुर्वन्ति, चन्द्रोज्ज्वलाः = चन्द्रवद् उज्ज्वलाः, हाराः न = कण्ठमाला न, स्नानं न = अभिषेको न, विलेपनं न =अङ्गरागादिविलेपनं न, कुसुमं न = पुष्पं न, अलङ्कृताः = सम्यक् प्रसाधिताः, मूर्धजाः = मूर्ध्नि जाता केशाः न ,( भूषयन्ति)। एका = अद्वितीया, संस्कृता = संस्कारयुक्ता व्याकरणादिदोषरहिता शुद्धा, वाणी = वाक्, या = संस्कृतावाणी, धार्यते = मुखे संस्थाप्यते, (सा)= वाणी, पुरुषम् =मनुष्यम्, समलङ्करोति = भूषयति। यतोहि खलु = निश्चयेन, भूषणानि = केयूर-कटकादीनि, क्षीयन्ते=विनश्यन्ति । वाग्भूषणम्=संस्कृतवागलङ्करणम्, सततम् = निरन्तरम्, भूषणम्=अलङ्करणमेव भवति।

**व्याकरणम्**- स्नानम् = स्ना + ल्युट्। विलेपनम् = वि + लिप्+ ल्युट्। अलङ्कृताः = अलम् + कृ + क्त-ते। संस्कृता =सम् + कृ + क्त +टाप् -सुट्। वाग्भूषणम् = वाग् एव भूषणम् (कर्मधा.)।

**भावार्थः**- मनुष्यं बाहुभूषणानि, समुज्वलाः हाराः, जलावगाहनम्, अङ्गरागलेपनं, कुसुमं, प्रसाधिताः केशाश्च नालङ्कुर्वन्ति। एभिः अलङ्करणसाधनैः मानवस्य शोभा न भवति अपितु व्याकरणादिदोषरहिता शुद्धा या संस्कृता वाणी पुरुषेण धार्यते तया मानवः शोभते, यतोहि लोके प्रसिद्धाः अलङ्काराः कालक्रमेण विनश्यन्ति परन्तु संस्कृत-वाग्भूषणं सततम् अलङ्करणमेव भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**छन्दः**-शार्दूलविक्रीडितम्। **अलङ्कारः** -व्यतिरेकः।

**विद्या नाम नरस्य रूपमधिकं, प्रच्छन्नगुप्तं धनं,**
**विद्या भोगकरी, यशः सुखकरी, विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने, विद्या परं दैवतं,***
**विद्या राजसु पूज्यते, न हि धनं, विद्याविहीनः पशुः।। २० ।।**

**प्रसङ्गः**-अत्र श्लोके कविना विद्यायाः महत्ता वर्णिता।

**अन्वयः**- विद्या नाम नरस्य अधिकं रूपम् ,विद्या प्रच्छन्नगुप्तं धनं, विद्या भोगकरी, यशः सुखकरी, विद्या गुरूणां गुरुः। विद्या विदेशगमने बन्धुजनः, विद्या परं दैवतं, विद्या राजसु पूज्यते, हि धनं न। विद्याविहीनः पशुः।

**व्याख्या**- विद्या = वेदशास्त्रज्ञानात्मिका, नाम= प्रसिद्धवस्तु, नरस्य = मानवस्य, अधिकम् = भूयिष्ठम्, रूपम् = सौन्दर्यम्, विद्या प्रज्छन्नगुप्तम् = गूढरक्षितम्, धनम् = वित्तम्, विद्या भोगकरी = भोगपदार्थान् करोति, यशः सुखकरी = कीर्तिं सुखं च करोति, विद्या गुरूणाम् = पूज्यानाम्, गुरुः = पूज्यतमः। विद्या विदेशगमने = विद्या परदेशयात्रायाम्, बन्धुजनः = सुहृज्जनः, विद्या परम् (पाठान्तरे परा) = श्रेष्ठम्, दैवतम् (पाठान्तरे देवता)= देवः, विद्या राजसु = राजमण्डले, पूज्यते = अर्च्यते, हि = यतोहि, धनं न = वित्तं न। विद्याविहीनः = विद्यारहितः, पशुः=सदसद्विवेकरहितः पशुतुल्यः।

**व्याकरणम्**- यशः सुखकरी= यशश्च सुखञ्च (द्वन्द्वः) ते करोति। भोगकरी =भोग+कृ+ट+ङीप्। सुखकरी = सुख+कृ + ट+ङीप्। विद्याविहीनः = विद्यया विहीनः।

**भावार्थः**-विद्या नरस्य अधिकं सौन्दर्यं विद्यते। विद्या निगूढं रक्षितं च धनं वर्तते। विद्यया भोगः लभ्यते। यशांसि सुखानि च प्राप्यन्ते। विद्या पूज्यानां पूज्यतमा, विदेशयात्रायां सुहृज्जनः, श्रेष्ठं दैवतमस्ति। निश्चयेन विद्या राजमण्डले पूज्यते नहि वित्तम्। विद्यारहितः मानवः पशुतुल्य एव जीवति।

**छन्दः**-शार्दूलविक्रीडितम्। **अलङ्कारः**- अनुप्रासः।

* **पाठान्तरे 'परा देवता'**

**क्षान्तिश्चेत्कवचेन किं, किमरिभिः क्रोधोऽस्ति चेद्देहिनां,**
**ज्ञातिश्चेदनलेन किं, यदि सुहृद्दिव्यौषधैः किं फलम्।**
**किं सर्पैर्यदि दुर्जनाः, किमु धनैर्विद्याऽनवद्या यदि,**
**व्रीडा चेत्किमु भूषणैः, सुकविता यद्यस्ति राज्येन किम्।। २१ ।।**

**प्रसङ्गः**-अत्र कविना सुकवितायाः विद्यायाश्च सातिशयमहत्त्वं सुप्रतिपादितम्।

**अन्वयः**- देहिनां क्षान्तिश्चेत् कवचेन किम्? क्रोधोऽस्ति चेत् अरिभिः किम्?, ज्ञातिश्चेत् अनलेन किं ? यदि सुहृद् (अस्ति) दिव्यौषधैः किं फलम्? यदि दुर्जनाः (सन्ति) सर्पैः किं? यदि अनवद्या विद्या (अस्ति) धनैः किमु? व्रीडा चेद् भूषणैः किमु? यदि सुकविता अस्ति राज्येन किम् (फलम्)?

**व्याख्या**- देहिनाम् =शरीरधारिणां प्राणिनाम्, क्षान्तिश्चेत् = यदि क्षमा अस्ति, कवचेन = वर्मणा, किं फलम् = किं प्रयोजनम् ? क्रोधोऽस्ति चेत् = यदि कोपः विद्यते, अरिभिः =शत्रुभिः, किं (फलम्) = किं प्रयोजनम् ? ज्ञातिश्चेत् =यदि दायादः बन्धुवर्गः अस्ति, अनलेन किं = अग्निना किं प्रयोजनम् ? यदि सुहृद् = मित्रं चेत् (अस्ति), दिव्यौषधैः = सिद्धौषधैः, किं फलम् = किं प्रयोजनम् ? यदि दुर्जनाः = खलाः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(सन्ति), सर्पैः= भुजङ्गैः, किम् = किं प्रयोजनम् ?, यदि अनवद्या = दोषरहिता, विद्या = ज्ञानम् (अस्ति), धनैः = वित्तैः , किमु = किं फलम्?, चेत् व्रीडा = यदि लज्जा अस्ति, भूषणैः = अलङ्कारैः, किमु = किं प्रयोजनम्?, यदि सुकविता = चेत् पाण्डित्यं कवित्वं वा, अस्ति = विद्यते, राज्येन = राष्ट्रेण, किम् = किं प्रयोजनम् ?

**व्याकरणम्**–क्षान्तिः = क्षम् +क्तिन्। सुकविता = सु+कव्+इन्+तल्+टाप्।

**भावार्थः**– यदि नराणां क्षमा विद्यते तर्हि कवचस्यावश्यकता नास्ति, यदि कोपोऽस्ति शत्रुभिः किं प्रयोजनम्? क्रोध एव शत्रुरिति। यदि बन्धुजनाः सन्ति तर्हि अनलस्यावश्यकता न वर्तते, यदि सन्मित्राणि सन्ति तर्हि दिव्यौषधीनामावश्यकता नास्ति, यदि खलजनाः समीपे विद्यन्ते तर्हि सर्पाणां काऽवश्यकता यदि सुविद्यास्ति धनैः किं प्रयोजनम्? यदि लज्जा वर्तते तर्हि भूषणानां नाऽवश्यकता, यदि कवित्वं पाण्डित्यं वास्ति तर्हि राज्येन किं फलम्?अर्थात् राज्यस्य न कापि आवश्यकता ।

**छन्दः**– शार्दूलविक्रीडितम्। **अलङ्कारः**– अर्थापत्तिः।

**दाक्षिण्यं स्वजने, दया परिजने, शाठ्यं सदा दुर्जने,**
**प्रीतिः साधुजने, नयो नृपजने, विद्वज्जने चार्जवम्।**
**शौर्यं शत्रुजने, क्षमा गुरुजने, नारीजने धूर्तता,**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः।। २२।।**

**प्रसङ्गः**– अस्मिन् श्लोके महाकविना सांसारिकजीवनस्य लोकव्यवहारनियमः सुवर्णितः।

**अन्वयः**– स्वजने दाक्षिण्यं, परिजने दया, दुर्जने सदा शाठ्यं, साधुजने प्रीतिः, नृपजने नयः, विद्वज्जने च आर्जवम्, शत्रुजने शौर्यं, गुरुजने क्षमा, नारीजने धूर्तता, ये च पुरुषाः एवं कलासु कुशलाः तेषु एव लोकस्थितिः।

**व्याख्या**– स्वजने = बन्धुजने, दाक्षिण्यम् = औदार्यम्, परिजने = सेवकजने, दया =कृपा, दुर्जने = खलजने, सदा = सर्वदा, शाठ्यम्= वञ्चकत्वम्, साधुजने = सुजने, प्रीतिः = स्नेहः, नृपजने = नृपतौ, नयः = नीतिः, विद्वज्जने = पण्डितजने, च आर्जवम्= सरलता, शत्रुजने = रिपुजने, शौर्यम् = शूरता, गुरुजने = पूज्यवर्गे, क्षमा = सहिष्णुता, नारीजने = स्त्रीजने, धूर्तता = वञ्चकता, ये च पुरुषाः = नराः, एवं कलासु = जनरञ्जनविद्यासु, कुशलाः = निपुणाः, तेषु = मनुष्येषु, एव = हि, लोकस्थितिः = संसारव्यवहारः।

**व्याकरणम्**– स्वजने = स्वस्य जनः (ष.तत्.)तस्मिन्। दाक्षिण्यम् = दक्षिणस्य भावः –दक्षिण + ष्यञ्। शाठ्यम् = शठस्य भावः – शठ + ष्यञ्। प्रीतिः = प्री + क्तिन्। नयः = नी + अच्। आर्जवम् = ऋजोः भावः – ऋजु + अण्। नृपजने = नृपः चासौ जनः (कर्म.) तस्मिन्। विद्वज्जने= विद्वान् चासौ जनः(कर्म.) तस्मिन्। लोकस्थितिः = लोकस्य स्थितिः (ष.तत्) ।

**भावार्थः**– पुत्रभार्यादिप्रियजने औदार्यं, भृत्यवर्गे कृपा, खलजने शठता, सज्जने प्रीतिभावः, राज्ञि नीतिः, विद्वत्सु सारल्यं, रिपौ पौरुषं, पूज्यजने क्षमा, स्त्रीषु धृष्टता – एवमेतासु कलासु ये जनाः कुशलाः तेष्वेव लोकस्थितिः।

**छन्दः**– शार्दूलविक्रीडितम्। **अलङ्कारः** – काव्यलिङ्गम्।

**जाड्यं धियो हरति, सिञ्चति वाचि सत्यं,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मानोन्नतिं दिशति, पापमपाकरोति।**
**चेतः प्रसादयति, दिक्षु तनोति कीर्तिं,**
**सत्सङ्गतिः कथय किं न करोति पुंसाम्।। २३।**

**प्रसङ्गः**– प्रस्तुतेऽस्मिन् श्लोके सतां सङ्गतेः महत्त्वं कविना वर्णितम्।

**अन्वयः**– कथय सत्सङ्गतिः पुंसां किं न करोति ? (सा) धियः जाड्यं हरति, वाचि सत्यं सिञ्चति , मानोन्नतिं दिशति, पापमपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति।

**व्याख्या**– कथय = वद, सत्सङ्गतिः = सज्जनसमागमः, पुंसाम् = नराणाम्, किं न करोति = किं न साधयति? अर्थात् सर्वं करोति। (सा) = सतां सङ्गतिः, धियः = बुद्धेः, जाड्यम् = मन्दताम्, हरति = दूरीकरोति, वाचि = वचने, सत्यम् = ऋतम्, सिञ्चति = प्रयच्छति, मानोन्नतिम् =आदरसम्मानम्, दिशति = सम्पादयति, पापम् = कल्मषम्, अपाकरोति = दूरीकरोति, चेतः = मनः, प्रसादयति =आनन्दयति, दिक्षु = आशासु, कीर्तिम् = यशः, तनोति = विस्तारयति।

**व्याकरणम्** – सतां सङ्गतिः (ष.तत्.)। सङ्गतिः =सम् + गम् + क्तिन्। जाड्यम् = जडस्य भावः = जड + ष्यञ् । सत्यम् = सते हितम् – सत् + यत्। मानोन्नतिम् = मानः = मन् + घञ्। उन्नतिः = उद् +नम् +क्तिन्। मानस्य उन्नतिः (ष.तत्.)।

**भावार्थः**– सज्जनानां समागमः मनुष्याणां सर्वं साधयति – एषा मतेः मन्दतां नाशयति, वाण्यां सत्यं पल्लवयति, मानाधिक्यं ददाति, पापानि दूरीकरोति, चित्तं निर्मलीकरोति, दिगन्तरेषु यशः विस्तारयति।

**छन्दः** – वसन्ततिलका। अलङ्कारः – बहूनां क्रियाणां समुच्चयात् समुच्चयालङ्कारः।

**जयन्ति ते सुकृतिनः रससिद्धाः कवीश्वराः।**
**नास्ति येषां यशः काये जरामरणजं भयम्।। २४।।**

**प्रसङ्गः**– प्रस्तुतश्लोके कविना कवीश्वराणां लोकोत्तरं महत्त्वं प्रतिपादितम्।

**अन्वयः** – सुकृतिनः रससिद्धाः ते कवीश्वराः जयन्ति, येषां यशः काये जरामरणजं भयं नास्ति ।

**व्याख्या**– सुकृतिनः = पुण्यवन्तः, रससिद्धाः = शृङ्गारादिरसेषु पारङ्गताः, ते = प्रसिद्धाः, कवीश्वराः = महाकवयः, जयन्ति = सर्वोत्कर्षेण वर्तन्ते, येषाम् = महाकवीनाम्, यशःकाये = कीर्तिशरीरे, जरामरणजम् = जरामरणाभ्यां जातम्, भयम् = भीतिः, नास्ति = न विद्यते।

**व्याकरणम्**– कवीश्वराः = कविषु ईश्वराः (स.तत्.)। सुकृतिनः = सुकृतम् अस्ति एतेषाम् ते। रससिद्धाः = रसेषु सिद्धाः (स.तत्.)। यशःकाये = यशः एव कायः (कर्म.) तस्मिन्। जरामरणजम् = जरा च मरणं च (द्वन्द्वः) ताभ्यां जायते इति।

**भावार्थः**– शृङ्गारादिरसेषु निपुणाः क्रान्तदर्शिनः महाकवयः महामहिमशालिनः भवन्ति। तेषां कवीनां कीर्तिशरीरे जरामरणाभ्यामुत्पन्नं भयं न वर्तते।

**छन्दः**– अनुष्टुप्। **अलङ्कारः** –श्लेषमूला लुप्तोपमा।

**सूनुः सच्चरितः, सती प्रियतमा, स्वामी प्रसादोन्मुखः,**
**स्निग्धं मित्रमवञ्चकः परिजनो, निष्क्लेशलेशं मनः।**
**आकारो रुचिरः, स्थिरश्च विभवो, विद्यावदातं मुखं,**
**तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना।। २५।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः**– श्लोकेऽस्मिन् कविना वर्णितं यत् भगवतः विष्णोः दयया मनुष्यः सर्वविधानि सुखानि लभते।

**अन्वयः**– विष्टपकष्टहारिणि हरौ तुष्टे देहिना सच्चरितः सूनुः, सती प्रियतमा, प्रसादोन्मुखः स्वामी, स्निग्धं मित्रम्, अवञ्चकः परिजनः, निष्क्लेशलेशं मनः , रुचिरः आकारः, स्थिरः विभवः, विद्यावदातं च मुखं सम्प्राप्यते।

**व्याख्या**– विष्टपकष्टहारिणि = विष्टपस्य जगतः कष्टानि दुःखानि हरति नाशयति विष्टपकष्टहारी तस्मिन् = संसारदुःखनाशके, हरौ = विष्णौ, तुष्टे = प्रसन्ने, देहिना = मानवेन, सच्चरितः = सदाचारी, सूनुः = पुत्रः, सती = साध्वी, प्रियतमा = पत्नी, प्रसादोन्मुखः = सुप्रसन्नः , स्वामी = प्रभुः, स्निग्धम् = स्नेहयुक्तम्, मित्रम् = सखा, अवञ्चकः = विश्वस्तः, परिजनः = भृत्यवर्गः, निष्क्लेशलेशम् = सर्वथादुःखविरहितम्, मनः = चित्तम्, रुचिरः = सुन्दरः, आकारः = आकृतिः, स्थिरः = स्थायी, विभवः = धन-सम्पत्तिः, विद्यावदातम् = ज्ञानेन भास्वरम्, च मुखम् = वदनम्, सम्प्राप्यते = सम्यग् लभ्यते।

**व्याकरणम्** – सच्चरितः = सत् चरितं यस्य सः (बहुव्रीहिः)। प्रसादोन्मुखः = प्रसादे उन्मुखः (तत्पु.)। अवञ्चकः = न वञ्चकः (नञ् तत्.)। विद्यावदातम् = विद्यया अवदातम् (तत्पु.)।

**भावार्थः** – यदा संसारस्य पालकः हरिः प्रसन्नो भवति तदा सदाचारी पुत्रः, पतिव्रता स्त्री, प्रसन्नः प्रभुः, स्नेहयुक्तं सुहृद्, विश्वस्तः सेवकवर्गः, दुःखरहितं मनः, शोभनं रूपं, स्थिरम् ऐश्वर्यं, ज्ञानेन च सुन्दरं मुखं – इत्येतत् सर्वं सम्यग् लभ्यते।

**छन्दः**– शार्दूलविक्रीडितम्। **अलङ्कारः** – अनुप्रासः।

**प्राणाघातान्निवृत्तिः परधनहरणे संयमः, सत्यवाक्यं,**
**काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम्।**
**तृष्णास्रोतोविभङ्गो, गुरुषु च विनयः , सर्वभूतानुकम्पा,**
**सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः।। २६।।**

**प्रसङ्गः**– कविः समुपदिशति यत् मानवैः सदा कल्याणमार्गे चलनीयं येन लोकयात्रा प्रशस्ता भवेत्।

**अन्वयः**– प्राणाघातात् निवृत्तिः, परधनहरणे संयमः, सत्यवाक्यं, काले शक्त्या प्रदानम्, परेषां युवतिजनकथामूकभावः, तृष्णास्रोतोविभङ्गः, गुरुषु विनयः , सर्वभूतानुकम्पा च, एषः सर्वशास्त्रेषु सामान्यः अनुपहतविधिः श्रेयसां पन्थाः।

**व्याख्या**– प्राणाघातात् = जीवनघातात्, निवृत्तिः = विरामः, परधनहरणे = परद्रव्यलुण्ठने, संयमः = मनसो निग्रहः, सत्यवाक्यम् = सत्यभाषणम्, यथाकालं यथाशक्ति दानं काले = समये, शक्त्या = यथाशक्ति, प्रदानम् = द्रव्यादिप्रदानम्, परेषाम् = अन्येषाम्, युवतिजनकथामूकभावः = युवतिजनानां स्त्रीणां कथासु वार्तासु मूकभावः मौनम्, तृष्णास्रोतोविभङ्गः = तृष्णायाः लोभस्य स्रोतांसि प्रवाहाः तेषां विभङ्गः अवरोधः= लोभप्रवाहावरोधः, गुरुषु = पूज्येषु, विनयः = विनम्रता, सर्वभूतानुकम्पा = सर्वप्राणिदया, च एषः = अयम्, सर्वशास्त्रेषु = अखिलवेदादिशास्त्रेषु, अनुपहतविधिः = अनवरुद्धविधानम्, श्रेयसां = मङ्गलानाम्, सामान्यः = सकलजनसाधारणः, पन्थाः = मार्गः।

**व्याकरणम्**– प्राणाघातात् निवृत्तिः= प्राणानाम् आघातः (तत्पु.) तस्मात् निवृत्तिः, परधनहरणे = परेषां धनानि तेषां हरणं (तत्पु.)तस्मिन्, सत्यवाक्यम् = सत्यं च तत् वाक्यम् (कर्म.), तृष्णास्रोतोविभङ्गः = तृष्णायाः स्रोतांसि, तेषां विभङ्गः, सर्वशास्त्रेषु = सर्वाणि च तानि शास्त्राणि (कर्म.) तेषु, अनुपहतविधिः =



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अनुपहत: विधि: यस्य स: (बहु.)।

**भावार्थ:**– जीवहत्यात: विराम:, परद्रव्यलुण्ठने संयम:, यथाकालं यथाशक्ति दानं, परनारीणां कथाश्रवणे मौनाचरणं, लोभप्रशमनं, पूज्यजनेषु आदर:, सर्वप्राणिषु दयाभाव:– इत्थं सर्वशास्त्रेषु कथित: मङ्गलमार्गोऽस्ति।

**छन्द:**– स्रग्धरा–म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्।

**प्रारभ्यते न खलु विघ्नभयेन नीचै:,**
**प्रारभ्य विघ्नविहिता विरमन्ति मध्या:।**
**विघ्नै: पुन: पुनरपि प्रतिहन्यमाना:,**
**प्रारब्धमुत्तमजना न परित्यजन्ति।। २७।।**

**प्रसङ्ग:** – अत्र कवि: अधम–मध्यम–उत्तमजनानां कार्यकरणे कीदृशी स्थिति: भवति तत् वर्णयति।

**अन्वय:**– नीचै: विघ्नभयेन न प्रारभ्यते खलु, मध्या: प्रारभ्य विघ्नविहिता: विरमन्ति, उत्तमजना: विघ्नै: पुन: पुन: प्रतिहन्यमाना: अपि प्रारब्धं न परित्यजन्ति।

**व्याख्या**– नीचै: = अधमजनै:, विघ्नभयेन = प्रत्यूहभीत्या, न प्रारभ्यते = न कार्यारम्भ: क्रियते, खलु, मध्या: = मध्यमकोटिजना:, प्रारभ्य = कार्यारम्भं कृत्वा, विघ्नविहिता: = विघ्नपीडिता:, विरमन्ति = मध्ये एव कार्यं त्यजन्ति, उत्तमजना: = श्रेष्ठजना:, विघ्नै: = प्रत्यवायै: पुन: पुन: = वारं वारं, प्रतिहन्यमाना: = पीड्यमाना:, अपि प्रारब्धम् = क्रियमाणं कार्यं, न परित्यजन्ति = मध्ये त्यागं न कुर्वन्ति।

**व्याकरणम्**– विघ्नभयेन = विघ्नेभ्य: भयं (तत्पु.)तेन। विघ्नविहिता = विघ्नै: विहिता (तत्पु.)। प्रारभ्य = प्र +आ +रभ् + ल्यप्। प्रतिहन्यमाना: = प्रति + हन्+ शानच्, , प्रारब्धम् = प्र + आ + रभ् + क्त।

**भावार्थ:**– संसारे त्रिविधा: जना: विद्यन्ते। अधम–मध्यम–उत्तमाश्च। अधमजना: विघ्नभयेन कार्यस्यारम्भमेव न कुर्वन्ति। मध्यमजना: कार्यारम्भं कृत्वा मध्ये एव कार्यं त्यजन्ति परन्तु उत्तमजना: प्रत्यवायै: वारं वारं प्रताडिता: सन्तोऽपि प्रारब्धं कार्यं न परित्यजन्ति।

**छन्द:**– वसन्ततिलका।

**असन्तो नाऽभ्यर्थ्या:, सुहृदपि न याच्य: कृशधन:,**
**प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।**
**विपद्युच्चै: स्थेयं, पदमनुविधेयं च महतां,**
**सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्।। २८।।**

**प्रसङ्ग:**– श्लोकेऽस्मिन् कवि: समुपदिशति यत् महापुरुषै: समुपदिष्ट: मार्ग: सज्जनै: सदैवानुसरणीय:।

**अन्वय:**– असन्त: न अभ्यर्थ्या:, कृशधन: सुहृदपि न याच्य:, प्रिया न्याय्या वृत्ति:, असुभङ्गे अपि मलिनम् असुकरम्। विपदि उच्चै: स्थेयं, महतां च पदम् अनुविधेयम्, इदं विषमम् असिधाराव्रतं सतां केन उद्दिष्टम्।

**व्याख्या**– –असन्त: = असज्जना:, न अभ्यर्थ्या: = न प्रार्थनीया:, कृशधन: = अल्पवित्त:, सुहृदपि = मित्रमपि, न याच्य: = न प्रार्थनीय:, न्याय्या= न्याययुक्ता, वृत्ति: = आजीविका, प्रिया = इष्टा, असुभङ्गे = प्राणघाते, अपि मलिनम् = कुत्सितं कर्म, असुकरम्= न करणीयम्। विपदि = आपदि, उच्चै: = उच्चमना:, स्थेयम् = स्थातव्यम्, महताम् = श्रेष्टजनानाम्, च पदम्= च स्थानम्, अनुविधेयम्= वर्तितव्यम्, इदम् = एतत्, विषमम् = कठिनम्, असिधाराव्रतम् = खड्गधारावत्तीक्ष्णव्रतम्, सताम् = सज्जनानाम्, केन = केनापि विशिष्टपुरुषेण, उद्दिष्टम्= उपदिष्टम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याकरणम्**– –असन्तः = न सन्तः(नञ् तत्.), कृशधनः = कृशं धनं यस्य सः (बहुव्रीहिः), असुभङ्गे = असूनां भङ्गः (ष.तत्.) तस्मिन्,असिधाराव्रतम् = असेः धारा इव व्रतम्, याच्यः = याच् + ण्यत्, अनुविधेयम्= अनु + वि+ धा +यत्,उद्दिष्टम्=उद् + इष् +क्त।

**भावार्थः**– दुर्जनाः न याचनीयाः, दीनः सखापि न प्रार्थनीयः, न्यायोचिता आजीविका आलम्बनीया, प्राणसङ्कटेऽपि अकर्म न करणीयम्, विपत्तौ मानोन्नतिः न त्यक्तव्या, सज्जनानां मार्गः अनुसरणीयः। एतादृशं कठिनं खड्गवत्व्रतं महापुरुषैः सज्जनानां कृते कल्पितम्।

**छन्दः**– शिखरिणी, **अलङ्कारः**– समुच्चयः।

**क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा–**
**मापन्नोऽपि विपिन्नदीधितिरपि प्राणेषु नश्यत्स्वपि।**
**मत्तेभेन्द्रविभिन्नकुम्भ–कवल–ग्रासैकबद्धस्पृहः,**
**किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी।। २९।।**

**प्रसङ्गः**– कविना वर्णितं यत् मानिनः जनाः सङ्कटेष्वपि दुर्वृत्तिं न स्वीकुर्वन्ति।

**अन्वयः**– क्षुत्क्षामोऽपि, जराकृशः अपि, शिथिलप्राणः अपि, कष्टां दशाम् आपन्नः अपि, विपिन्नदीधितिः अपि मत्तेभेन्द्रविभिन्नकुम्भ–कवल–ग्रासैकबद्धस्पृहः मानमहतामग्रेसरः केसरी प्राणेषु नश्यत्सु अपि किं जीर्णं तृणमत्ति ?

**व्याख्या**– क्षुत्क्षामोऽपि = अतिबुभुक्षितः अपि, जराकृशः अपि =वृद्धावस्थया दुर्वलः अपि, शिथिलप्राणः अपि = क्षीणशक्तिः अपि, कष्टां = क्लेशयुक्ताम्, दशाम्= अवस्थाम्, आपन्नः अपि = सम्प्राप्तः अपि , विपिन्ना = क्षीणा, दीधितिः अपि = कान्तिः अपि, मत्तेभेन्द्रविभिन्नकुम्भ–कवल–ग्रासैकबद्धस्पृहः = मदयुक्ताः ये इभेन्द्राः गजेन्द्राः तेषां विभिन्ना विदारिता ये कुम्भाः कपोलाः तेषां कवलस्य (पाठान्तरे पिशितस्य) मांसस्य ग्रासे भक्षणे एकं केवलं बद्धा नियता स्पृहा रुचिः यस्य सः = मत्त–गजराज–विदारित–कुम्भ–मांस–भक्षणे एव रुचिशीलः, मानमहताम् = मानेन अभिमानेन महताम् उन्नतानाम्, अग्रेसरः = अग्रगण्यः, केसरी = सिंहः, प्राणेषु = असुषु, नश्यत्सु = प्रयाणेषु अपि, किं जीर्णं = किं शुष्कम्, तृणम् = घासम्, कि म् अत्ति = किं खादति ? अर्थात् कदापि न खादति।

**व्याकरणम्**– जराकृशः = जरया कृशः(तत्पु.)। क्षुत्क्षामः = क्षुध् +क्विप्, क्षामः = क्षै +क्त + म । आपन्नः = आ + पद् +क्त । विभिन्नः = वि + भिद् + क्त। केसरी = प्रशस्ताः केसराः सन्ति अस्य इति । शिथिलप्राणः = शिथिलाः प्राणाः यस्य सः (बहुव्रीहिः)।

**भावार्थः**– बुभुक्षया कृशः, शिथिलप्राणः, विपत्तिग्रस्तः, नष्टकान्तिः अपि मत्त–गजराज–विदारित–कुम्भ–मांसभोजी स्वाभिमानी पशुपतिः सिंहः प्राणप्रयाणकालेऽपि शुष्कं घासं कदापि न भक्षयति। अर्थात् स्वाभिमानी जनः कष्टेषु अपि कुकार्यं न करोति।

**छन्दः**– शार्दूलविक्रीडितम्। **अलङ्कारः**–:– अप्रस्तुतप्रशंसा।

**स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं,**
**श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये।**
**सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं,**
**सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम्।।३०।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः**- प्रस्तुतेऽस्मिन् श्लोके कविः वर्णयति यत् प्रत्येकं जनः कष्टापन्ने सति स्वपुरुषार्थानुसारं फलं कामयते तदनुसारं कार्यमपि करोति।

**अन्वयः**- श्वा स्वल्पस्नायुवसावशेषमलिनं निर्मांसम् अपि अस्थिकं लब्ध्वा परितोषम् एति, तु तत् तस्य क्षुधाशान्तये न (अस्ति)। सिंहः अङ्कमागतम् अपि जम्बुकं त्यक्त्वा द्विपं निहन्ति, कृच्छ्रगतः अपि सर्वः जनः सत्त्वानुरूपं फलं वाञ्छति ।

**व्याख्या**- श्वा = कुक्कुरः, स्वल्पस्नायुवसावशेषमलिनम् = स्वल्पः लेशमात्रस्थितः स्नायुश्च वसा च तयोः अवशेषः अवशिष्टभागः तेन मलिनम् = किञ्चिदवशिष्टस्नायुवसावशेषमलदूषितम्, निर्मांसम् = मांसरहितम्, अपि अस्थिकम् (पाठान्तरे निर्मांसमप्यस्थि गोः) = कीकसम्, लब्ध्वा = प्राप्य, परितोषम् = सन्तुष्टिम्, एति = प्राप्नोति, तु = किन्तु, तत् तस्य = तत् कीकसं शुनकस्य, क्षुधाशान्तये = बुभुक्षानिवारणाय न (अस्ति)। सिंहः = केसरी, अङ्कम् = उत्सङ्गम्, आगतम् = समायातम्, अपि जम्बुकम् = शृगालम्, त्यक्त्वा = विहाय, द्विपम् = गजम्, निहन्ति = मारयति, कृच्छ्रगतोऽपि = सङ्कटापन्नोऽपि , सर्वः जनः = सर्वः लोकः, सत्त्वानुरूपम् = स्वशक्त्यानुरूपम्, फलम् = लाभम्, वाञ्छति = इच्छति।

**व्याकरणम्**- निर्मांसम् = निर्गतं मासं यस्मात् तत्। अस्थिकम् = अस्थि +कन्। लब्ध्वा = लभ् + क्त्वा। परितोषम् = परि+तुष् +घञ् +तम्। अङ्कमागतम् = अङ्कम् + आ + गम् +क्त। त्यक्त्वा = त्यज् +क्त्वा। द्विपम् = द्वाभ्यां पिबति इति (उपपदस.) कृच्छ्रगतः =कृच्छ्रं गतः (तत्पु.)। सत्त्वानुरूपम् = सत्त्वस्य अनुरूपम् (तत्पु.)।

**भावार्थः**- किञ्चिदवशिष्टस्नायुवसावशेषमलदूषितम् अस्थि प्राप्य शुनकः सन्तुष्यति यद्यपि तत् तस्य बुभुक्षानिवारणाय पर्याप्तं नास्ति। परन्तु सिंहः उत्सङ्गं समायातमपि शृगालं त्यक्त्वा गजं विदारयति। वस्तुतस्तु सङ्कटापन्नोऽपि सर्वो लोकः स्वशक्त्यानुरूपमेव लाभमभिलषति।

**छन्दः**- शार्दूलविक्रीडितम्। **अलङ्कारः** - अप्रस्तुतप्रशंसा अर्थान्तरन्यासश्च।

**लाङ्गूलचालनमधश्चरणावपातं,**
**भूमौ निपत्य वदनोदरदर्शनं च।**
**श्वा पिण्डदस्य कुरुते, गजपुङ्गवस्तु,**
**धीरं विलोकयति, चाटुशतैश्च भुङ्क्ते।। ३१।।**

**प्रसङ्गः**- अत्र कविः क्षुद्रजन्तोः महतां च प्रकृतिं वर्णयति।

**अन्वयः**- श्वा पिण्डदस्य (पुरतः) लाङ्गूलचालनम् अधः चरणावपातं भूमौ च निपत्य वदनोदरदर्शनं कुरुते। तु गजपुङ्गवः तु धीरं विलोकयति चाटुशतैश्च भुङ्क्ते।

**व्याख्या**- श्वा = शुनकः, पिण्डदस्य = पिण्डम् अन्नं ददाति इति तस्य = अन्नदातुः, (पुरतः) लाङ्गूलचालनम् = पुच्छसञ्चालनम्, अधः = नीचैः, चरणावपातम् = पादपतनम्, भूमौ = धरायाम्, निपत्य = पतित्वा, वदनोदरदर्शनम् = वदनम् उदरं च तयोः दर्शनं =मुख-जठरयोः प्रदर्शनं च, कुरुते = करोति। तु = परन्तु, गजपुङ्गवः = गजराजः, धीरम् =गम्भीरम्, विलोकयति = पश्यति, चाटुशतैश्च = अनेकप्रियोक्तिभिः, भुङ्क्ते = खादति।

**व्याकरणम्** - पिण्डदस्य= पिण्ड + दा + क = तस्य। लाङ्गूलचालनम् = लाङ्गूलस्य चालनम् = चल् + णिच् + ल्युट्। चरणावपातम् =चरणयोः अवपातः - अव +पत् +घञ्। निपत्य = नि +पत् +ल्यप्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वदनोदरदर्शनम् = वदनं च उदरं च (द्वन्द्वः) तयोः दर्शनम् = दृश् + ल्युट्। गजपुङ्गवः = गजेषु गजानां च (तत्पु.)पुङ्गवः। चाटुशतैः = चाटूनां शतानि (तत्पु.)तैः।

**भावार्थः**– क्षुद्रजन्तुः कुक्कुरः भोजनदातुः स्वामिनः पुरतः पुच्छचालनं नीचैः पादपतनं पृथिव्यां च पतित्वा मुखोदरप्रदर्शनं करोति परन्तु उत्तमः जन्तुः गजराजः शान्तमनसा पश्यति अनेकमधुरवचनैः च खादति।

**छन्दः**– बसन्ततिलका। **अलङ्कार** :– अनुप्रासः अप्रस्तुतप्रशंसा च ।

**परिवर्तिनि संसारे, मृतः को वा न जायते।**
**स जातो येन जातेन, याति वंशः समुन्नतिम्।। ३२ ।।**

**प्रसङ्गः**–कविः प्रतिपादयति यत् तस्य जन्म सार्थकं भवति येन स्वकुलस्य समुन्नतिः कृता।

**अन्वयः**– परिवर्तिनि संसारे मृतः कः वा न जायते। स जातः येन जातेन वंशः समुन्नतिं याति ।

**व्याख्या**– परिवर्तिनि = परिवर्तनशीले, संसारे = जगति, कः (वा)= पुरुषः, न मृतः = प्रेत्यः, (कः) वा न जायते = नोत्पन्नो भवति। सः = पुमान्, जातः = उत्पन्नः, येन जातेन = येनोत्पन्नेन, वंशः = कुलम्, समुन्नतिम् = समुत्कर्षम्, याति = प्राप्नोति गच्छति।

व्याकरणम्– मृतः = मृ + क्त। जातः = जन् + क्तः। समुन्नतिम् = सम् + उद् + नम् + क्तिन्।

**भावार्थः**– अस्मिन् परिवर्तनशीले संसारे कः पुरुषः न म्रियते जायते वा। सर्वे एव जन्ममृत्युशीलाः सन्ति। वस्तुतस्तु तस्य जन्म सार्थकं भवति यस्य जन्मना कुलं समृद्धिमधिगच्छति।

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च इति गीतायाम्।

**छन्दः**– अनुष्टुप्। **अलङ्कारः**– काव्यलिङ्गम्।

**कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः।**
**मूर्ध्नि वा सर्वलोकस्य, शीर्यते वन एव वा।। ३३।।**

**प्रसङ्गः**– स्वाभिमानिनः जनस्य वृत्तिद्वयं भवति।

**अन्वयः**– मनस्विनः कुसुमस्तबकस्य इव द्वयी वृत्तिः (भवति) सर्वलोकस्य मूर्ध्नि वा (तिष्ठति), वन एव वा शीर्यते ।।

**व्याख्या**– मनस्विनः = स्वाभिमानिनः, कुसुमस्तबकस्य = पुष्पगुच्छस्य, इव = सदृशी, द्वयी = द्विविधा, वृत्तिः = स्थितिः (भवति) सर्वलोकस्य = सकलजनस्य, मूर्ध्नि = शिरसि, वा (तिष्ठति), वन = कानने ,एव = हि, वा शीर्यते = जीर्यते।

**व्याकरणम्**– मनस्विनः = मनस्+विनि। द्वयी = द्वि + तयप् + ङीप्। वृत्तिः = वृत् + क्तिन्।

**भावार्थः**– स्वाभिमानिनः जनस्य पुष्पगुच्छ इव स्वभावद्वयं भवति। पुष्पगुच्छः सर्वेषां जनानां मस्तके तिष्ठति अथवा कानने एव पतित्वा विनश्यति। इत्थं धीराः जनाः सर्वेषां मध्ये उच्चस्थानं लभन्ते वा तदभावे अरण्ये वा एकान्ते जीर्णतां प्राप्नुवन्ति।

**छन्दः**– अनुष्टुप्। **अलङ्कारः**– उपमा।

**सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषा–**
**स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।**
**द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ,**
**भ्रातः! पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः।। ३४।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रसङ्गः**–अत्र कविः वर्णयति यत् पराक्रमी जनः विपरीतपरिस्थितावपि दुर्बलशत्रून् न प्रहरति।

**अन्वयः**– हे भ्रातः! पश्य बृहस्पतिप्रभृतयः अन्येऽपि पञ्चषाः सम्भाविताः (ग्रहाः) सन्ति विशेषविक्रमरुचिः शीर्षावशेषाकृतिः दानवपतिः एषः राहुः तान् प्रति न वैरायते। भास्वरौ दिनेश्वरनिशाप्राणेश्वरौ द्वावेव पर्वणि ग्रसते।

**व्याख्या**– हे भ्रातः! = हे सखे ! पश्य = विलोकय, बृहस्पतिप्रभृतयः = सुरगुरुप्रभृतयः मङ्गल–बुध–शुक्र–शनि–रूपाः, अन्येऽपि = इतरेऽपि, पञ्चषाः = पञ्च वा षड् वा, सम्भाविताः = श्रेष्ठाः (ग्रहाः) सन्ति = विद्यन्ते, विशेषविक्रमरुचिः = पराक्रम–प्रदर्शनाभिलाषः, शीर्षावशेषाकृतिः = शिरो मात्रावशिष्टाकारः, दानवपतिः = दनुजस्वामी, एषः = अयम्, राहुः =स्वर्भानुः, तान् प्रति = बृहस्पत्यादीन् पञ्चषड्ग्रहान् प्रति, न वैरायते = शत्रुतां न करोति। भास्वरौ = तेजस्विनौ, दिनेश्वरनिशाप्राणेश्वरौ = सूर्यचन्द्रौ, द्वौ = उभौ, एव पर्वणि =अमावास्यायां पूर्णिमायां च, ग्रसते = आक्रमते।

व्याकरणम्– पञ्चषाः = पञ्च वा षड् वा (बहुव्रीहिः)। विशेषविक्रमरुचः = विशेषे विक्रमे रुचिः यस्य सः (बहुव्रीहिः)। शीर्षावशेषाकृतिः = शीर्षमेव अवशेषो यस्याः सा इति शीर्षावशेषा, सैव आकृतिर्यस्य सः (बहुव्रीहिः)। दानवपतिः= दानवानां पतिः (तत्पु.)। दिनेश्वरनिशाप्राणेश्वरौ = दिनेश्वरश्च निशाप्राणेश्वरश्च (द्वन्द्वः)। सम्भाविताः = सम् +भू + णिच् + क्त।

**भावार्थः**– यद्यपि बृहस्पतिप्रभृतयः पञ्च वा षड्वा श्रेष्ठा ग्रहाः सन्ति किन्तु पराक्रमप्रदर्शनाभिलाषी शीर्षावशिष्टः एव दानवराजः राहुः तान् ग्रहान् प्रति शत्रुतां न करोति अपितु तेजस्विनौ सूर्यचन्द्रौ एव अमावास्यायां पूर्णिमायां च आक्रमते।

**छन्दः** – शार्दूलविक्रीडितम्। **अलङ्कारः**– अप्रस्तुतप्रशंसा।

**वहति भुवनश्रेणिं शेषः फणाफलकस्थितां,**
**कमठपतिना मध्येपृष्ठं सदा स च धार्यते।**
**तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-**
**दहह ! महतां निःसीमानश्चरित्रविभूतयः।। ३५।।**

**प्रसङ्गः**– अत्र कविः महतां महत्तां वर्णयति।

**अन्वयः**– शेषः फणाफलकस्थितां भुवनश्रेणिं वहति, स च कमठपतिना सदा मध्येपृष्ठं धार्यते। तमपि पयोधिः अनादरात् क्रोडाधीनं कुरुते । अहह ! महतां चरित्रविभूतयः निःसीमानः ।

**व्याख्या**– शेषः = सर्पराजः, फणाफलकस्थिताम् = फणापट्टिकावस्थिताम्, भुवनश्रेणिम् = लोकराजिम्, वहति = धारयति, सः = शेषनागश्च, कमठपतिना = कच्छपाधिराजेन भगवता विष्णुना, सदा = सर्वदा, मध्येपृष्ठम् = पृष्ठस्य मध्यभागे, धार्यते = ऊह्यते। तमपि = कमठराजम्, पयोधिः = समुद्रः, अनादरात् = अवहेलया, क्रोडाधीनम् = अङ्कगतम्, कुरुते = करोति, अहह ! = आश्चर्यमिति, महताम् = महात्मनाम्, चरित्रविभूतयः =आचरणसंपदः, निःसीमानः = अपरिमिताः।

**व्याकरणम्**– फणाफलकस्थिताम् = फणा एव फलकम् (कर्म.) तस्मिन् स्थिता ताम्। भुवनश्रेणिम् = भुवनानां श्रेणिः (तत्पु.)ताम्। निःसीमानः = निर्गता सीमा यस्याः ताः (बहुव्रीहिः)। पयोधिः =पयः + धा + कि।

**भावार्थः**– शेषनागः अनन्तः विस्तृतां धरां फणापट्टिकायां धारयति। तं शेषनागं कच्छपरूपी भगवान् विष्णुः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्वपृष्ठे धारयति। समुद्रः तं कच्छपराजमपि अङ्कगतं करोति। इदमाश्चर्यं विद्यते। यतोहि महात्मनां चरित्रं सीमारहितं वर्तते।

**छन्दः**– हरिणी। **अलङ्कारः**– अर्थान्तरन्यासः।

**वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश–**
**प्रहारैरुद्गच्छद्बहलदहनोद्गारगुरुभिः।**
**तुषाराद्रेः सूनोरहह! पितरि क्लेशविवशे,**
**न चासौ सम्पातः पयसि पयसां पत्युरुचितः।। ३६।।**

**प्रसङ्गः**– श्लोकेऽस्मिन् कविः वर्णयति यत् स्वार्थपरता सदा निन्दनीया भवति।

**अन्वयः**– तुषाराद्रेः सूनोः उद्गच्छद्बहलदहनोद्गारगुरुभिः समदमघवन्मुक्तकुलिशप्रहारैः पक्षच्छेदः वरं (किन्तु) अहह! पितरि क्लेशविवशे (सति) पयसां पत्युः पयसि असौ च सम्पातः न उचितः।

**व्याख्या**– तुषाराद्रेः = हिमालयस्य, सूनोः = पुत्रस्य मैनाकस्य, उद्गच्छद्बहलदहनोद्गारगुरुभिः =उद्गच्छन् ऊर्ध्वं गच्छन् बहलः भूयिष्ठः दहनः अनलः उद्गारैः निःसरणैः गुरुभिः दुस्सहैः, समदमघवन्मुक्तकुलिशप्रहारैः = समदेन दर्पयुक्तेन मघवता इन्द्रेण मुक्तस्य क्षिप्तस्य कुलिशस्य वज्रस्य प्रहारैः आघातैः, पक्षच्छेदः = पक्षाणां च्छेदः, वरम् = समुचितम् (किन्तु) अहह! = आश्चर्यं कष्टम्, पितरि = हिमालये, क्लेशविवशे = दुःखाभिभूते (सति) पयसाम् = जलानाम्, पत्युः = स्वामिनः समुद्रस्य, पयसि = जले, असौ = सः (प्रसिद्धमैनाकस्य), सम्पातः = पतनम्, न च उचितः = नानुकूलः।

**व्याकरणम्**– तुषाराद्रेः = तुषारस्य अद्रिः (तत्पु.) तस्य। प्रहारः = प्र + हृ + घञ्। पक्षच्छेदः = पक्षाणां च्छेदः (ष.तत्पु.)। सम्पातः = सम् + पत् + घञ्।

**भावार्थः**– गर्वयुक्तेन इन्द्रेण प्रचण्डाग्निनिः सरणैः वज्राघातैः मैनाकस्य पक्षच्छेदः वरमासीत् परन्तु जनके हिमालये पक्षच्छेदत्वात् दुःखाभिभूते सति समुद्रपतनं पलायनं वा नोचितमासीत्।

**छन्दः**– शिखरिणी। **अलङ्कारः** – पर्यायोक्तिः।

**यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।**
**तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते।। ३७।।**

**प्रसङ्गः**– अत्र कविः वर्णयति यत् स्वाभिमानिनः जनाः परकृतापमानं न सहन्ते।

**अन्वयः**– अचेतनः अपि इनकान्तः सवितुः पादैः स्पृष्टः यत् प्रज्वलति तत् तेजस्वी पुरुषः परकृतनिष्कृतिं कथं सहते ?

**व्याख्या**– अचेतनः = जडः, अपि इनकान्तः = अपि सूर्यकान्तमणिः, सवितुः = सूर्यस्य, पादैः = चरणैः रश्मिभिः, स्पृष्टः = सम्मृष्टः, यत् = यतः, प्रज्वलति = तेजः प्रकाशयति, तत् = तस्मात् कारणात्, तेजस्वी पुरुषः = तेजयुक्तः मानी पुरुषः, परकृतनिकृतिम् = शत्रुकृततिरस्कारम्, कथम् = केन प्रकारेण, सहते = क्षमते, कदापि न सहते।

**व्याकरणम्**– अचेतनः = नास्ति चेतना यस्य सः (बहुव्रीहिः)। इनकान्तः = इनः सूर्यः कान्तः प्रियः यस्य सः (बहुव्रीहिः)। सवितुः = सू + तृच् –सविता, तस्य। स्पृष्टः = स्पृश् + क्तः। निकृतिम् = नि+कृ+क्तिन्। तेजस्वी = तेजस् + विनि।

**भावार्थः**– चेतनारहितः निर्जीवोऽपि सूर्यकान्तमणिः यस्मात् कारणात् सूर्यरश्मिसंपर्कात् तेजांसि प्रकाशते



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अस्मात् कारणात् सजीवः तेजस्वी जनः अरिभिः कृतमपमानं कदापि न सहते ।

**सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।**
**प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः।। ३८।।**

**प्रसङ्गः**– श्लोकेऽस्मिन् कविना भर्तृहरिणा वर्णितं यत् पराक्रमशालिनां वयः तेजसः हेतुः न भवति।

**अन्वयः**– शिशुः अपि सिंहः मदमलिनकपोलभित्तिषु गजेषु निपतति । सत्त्ववताम् इयं प्रकृतिः। वयः तेजसः हेतुः न खलु ।

**व्याख्या**– शिशुः = बालः, अपि सिंहः = केसरी, मदमलिनकपोलभित्तिषु = मदेन मलिनाः कपोलभित्तयः तेषु= मदवारिपङ्क्लिलगण्डस्थलेषु, गजेषु = करिषु, निपतति = आक्रम्य तिष्ठति। सत्त्ववताम् = पराक्रमशालिनाम्, इयम् = एषा, प्रकृतिः = स्वभावः (विद्यते)। वयः = आयुः (अवस्था), तेजसः = प्रतापस्य, हेतुः = कारणम्, न खलु = निश्चयेन न भवति।

**व्याकरणम्**– सत्त्ववताम् = सत्त्व + मतुप्। प्रकृतिः = प्र + कृ +क्तिन्।

**भावार्थः**– सिंहशावकः मदजलेन येषां गजानां गण्डस्थलानि मलिनानि सन्ति तेषु गजेषु आक्रमणं करोति। अत्यन्तपराक्रमशालिनां स्वभावोऽयम्। अवस्था बलस्य कारणं नास्ति इति निश्चयमेव।

**छन्दः**– आर्या। **अलङ्कारः**– काव्यलिङ्गः।

**जातिर्यातु रसातलं गुणगणस्तस्याप्यधो गच्छता–**
**च्छीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना।**
**शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं,**
**येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे।। ३९।।**

**प्रसङ्गः**–अत्र कविवरः धनस्य महत्त्वमुपादेयतां च वर्णयति।

**अन्वयः**–जातिः रसातलं यातु, गुणगणः तस्य अपि अधः गच्छतात्, शीलं शैलतटात् पततु, अभिजनः वह्निना सन्दह्यताम्, शौर्ये वैरिणि आशु वज्रं निपततु, नः केवलम् अर्थः अस्तु येन एकेन विना इमे समस्ताः गुणाः तृणलवप्रायाः (सन्ति)।।

**व्याख्या**– जातिः = द्विजत्वादिः, रसातलम् = तन्नामलोकं, यातु = गच्छतु, गुणगणः = गुणानां दयादाक्षिण्यादीनां गणः समूहः, तस्य अपि = रसातलापेक्षया, अधः = नीचैः पातालम्, गच्छतात् = व्रजतु, शीलम् = चरित्रम्, शैलतटात् = पर्वतशिखरात्, पततु = भ्रश्यतु, निपततु, अभिजनः = वंशः, वह्निना = अनलेन, सन्दह्यताम् = भस्मीभवतु, शौर्ये = पराक्रमे, वैरिणि = शत्रौ, आशु = शीघ्रमेव, वज्रम् = कुलिशम्, निपततु = पततु, नः = अस्माकम्, केवलम् = मात्रम्, अर्थः = धनम्, अस्तु = भवतु, येन एकेन = येन अद्वितीयेन धनेन, विना = अन्तरेण, इमे = पूर्वोक्ताः, समस्ताः = सकलाः, गुणाः = जात्यादिगुणाः, तृणलवप्रायाः = घासवन्निरर्थकाः (सन्ति)।

**व्याकरणम्**– गुणगणः = गुणानां गणः (ष.तत्पु.)। शौर्ये = शूर +ष्यञ् –तस्मिन्।

**भावार्थः**– ब्राह्मणत्वादिजातिः रसातलं गच्छतु, दयादाक्षिण्यशौर्यादयः गुणाः रसातलापेक्षया नीचैः पातालमपि गच्छन्तु, सदाचारः पर्वतशिखरात् निपततु, कुलं वह्निना भस्मीभवतु, शत्रौ पराक्रमशालित्वे वज्रपातो भवतु। अस्माकं पूर्वोक्तैः गुणैः न किमपि प्रयोजनम्। अस्माकं धनमात्रे प्रयोजनम्। वित्तेन विना एते सर्वे गुणाः शुष्कतृणवन्निरर्थका : विद्यन्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**छन्दः**– शार्दूलविक्रीडितम्। **अलङ्कारः**– काव्यलिङ्गम् उपमा च।

**तानीन्द्रियाण्यविकलानि, तदेव नाम,**
**सा बुद्धिरप्रतिहता, वचनं तदेव।**
**अर्थोष्मणा विरहितः पुरुषः स एव,**
**त्वन्यः क्षणेन भवतीति विचित्रमेतत्।। ४०।।**

**प्रसङ्गः**–श्लोकेऽस्मिन् महाकविना भर्तृहरिणा वर्णितं यत् धनाभावे नरस्य दशा विचित्रा भवति तथा व्यवहारेषु परिवर्तनं जायते।

**अन्वयः**– अविकलानि तानि इन्द्रियाणि तदेव नाम अप्रतिहता सा बुद्धिः तदेव वचनम् (किन्तु) अर्थोष्मणा विरहितः स एव तु पुरुषः, क्षणेन अन्यः भवति इति एतत् विचित्रम्।

**व्याख्या**– अविकलानि = विकाररहितानि, तानि = प्रसिद्धानि, इन्द्रियाणि = चक्षुरादीनि, तदेव = पूर्ववदेव, नाम= अभिधानम्, अप्रतिहता = अविकृता, सा बुद्धिः = पूर्वोक्ता प्रज्ञा, तदेव = पूर्ववदेव, वचनम् = वाणी (किन्तु) अर्थोष्मणा = धनमदेन, विरहितः = विहीनः, स एव तु = पूर्वपरिचितः, पुरुषः= जनः, क्षणेन = अल्पसमयेन, अन्यः = अपरः, भवति = जायते, इति एतत् = पूर्वोक्तम्, विचित्रम् = महदाश्चर्यम्।

**व्याकरणम्**–अविकलानि = न विकलानि (नञ् तत्पु.)। बुद्धिः = बुध् + क्तिन्। वचनम् = वच् + ल्युट्। अर्थोष्मणा = अर्थस्य ऊष्मा तेन (ष.तत्पु.)।

**भावार्थः**– तान्येव अक्षतानि चक्षुरादीनि इन्द्रियाणि सन्ति, तेषामभिधानं तदेवास्ति, सा पूर्वा एव प्रज्ञास्ति, वाणी अपि सा एवास्ति, परन्तु धनाभावे पूर्वपरिचितः पुरुषः क्षणमात्रेणापरो भवति, न कोऽपि तमभिजानाति एतदाश्चर्यकरम्।।

**छन्दः**– वसन्ततिलका। **अलङ्कारः**– काव्यलिङ्गम्।

**यस्यास्ति वित्तं स नरः कुलीनः,**
**स पण्डितः, स श्रुतवान् गुणज्ञः।**
**स एव वक्ता, स च दर्शनीयः,**
**सर्वे गुणाः काञ्चनमाश्रयन्ते।। ४१।।**

**प्रसङ्गः**– अत्र कविः धनस्य महत्त्वं प्रतिपादयति।

**अन्वयः**– यस्य वित्तम् अस्ति सः नरः कुलीनः, सः पण्डितः, सः श्रुतवान् गुणज्ञः, सः एव वक्ता, सः च दर्शनीयः (भवति), सर्वे गुणाः काञ्चनम् आश्रयन्ते।

**व्याख्या**– यस्य = नरस्य, वित्तम्=धनम्, अस्ति = विद्यते, सः जनः = सः नरः, कुलीनः =श्रेष्ठकुलोत्पन्नः, सः पण्डितः = विद्वान्, सः श्रुतवान् = सः जनः वेदज्ञः, गुणज्ञः = गुणान् जानाति गुणग्राही, सः = असौ जनः, एव वक्ता = वाग्मी, सः च दर्शनीयः = द्रष्टुं योग्यः रूपवान्,(भवति), सर्वे = समस्ताः, गुणाः = कुलीनादयः गुणाः, काञ्चनम् = सुवर्णं वित्तं वा,आश्रयन्ते = आश्रित्य तिष्ठन्ति।

**व्याकरणम्**– कुलीनः = कुले जातः, कुल + ख। 'कुलात्ख' । पण्डितः= पण्डा सूक्ष्मबुद्धिः अस्यास्तीति, पण्डा + इतच्। श्रुतवान् = श्रुतम् अस्ति अस्य इति, श्रुत + मतुप्। वक्ता = वच् + तृच्। दर्शनीयः = दृश् + अनीयर्।

**भावार्थः**– यस्य नरस्य समीपे धनमस्ति स एव नरः कुलीनः, विद्वान्, शास्त्रज्ञः, गुणग्राही, वाग्मी, रूपवान्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चास्ति। यतोहि सकलाः पूर्वोक्ताः गुणाः सुवर्णाधीनाः धनाधीनाः वा सन्त्येव।

**छन्दः**– उपजातिः। **अलङ्कारः**– अर्थान्तरन्यासः।

**दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः, सङ्गात्सुतो लालनाद्,**
**विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात्।**
**ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-**
**न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम्।। ४२।।**

**प्रसङ्गः**– अत्र कविः समुपदिशति यत् कः कस्मात् विनश्यति अर्थात् एतानि एतेषां विनाशस्य कारणानि सन्ति।

**अन्वयः**– नृपतिः दौर्मन्त्र्यात्, यतिः, सङ्गात्, सुतः लालनाद्, विप्रः अनध्ययनात्, कुलं कुतनयात्, शीलं खलोपासनात्, ह्रीः मद्यात्, अनवेक्षणात् अपि कृषिः, स्नेहः प्रवासाश्रयात्, मैत्री अप्रणयात्, समृद्धिः अनयात्, धनं त्यागात् प्रमादात् च विनश्यति ।

**व्याख्या**– नृपतिः = नराणां पतिः राजा, दौर्मन्त्र्यात् = दुर्मन्त्रसेवनात्, यतिः = तपस्वी, सङ्गात् = आसक्तिवशात्, सुतः = सन्तानः, लालनात् = स्नेहाधिक्यात्, विप्रः = ब्राह्मणः, अनध्ययनात् = वेदशास्त्राध्ययनाभावात्, कुलम् = वंशः, कुतनययात् =कुपुत्रात्, शीलम् = चरित्रम्, खलोपासनात् = दुष्टजनसंपर्कात्, ह्रीः = लज्जा, मद्यात् = मद्यपानात्, अनवेक्षणात् = अनिरीक्षणात्, अपि कृषिः = कृषिकर्म, स्नेहः = प्रेम, प्रवासाश्रयात् =परदेशनिवासात्, मैत्री = मित्रभावः मित्रता, अप्रणयात् = स्नेहाभावात्, समृद्धिः = ऐश्वर्यम्, अनयात् =नीतिविरुद्धाचरणात्, धनम् = वित्तम्, त्यागात् = दानात्, प्रमादात् = अनवधानात्, च विनश्यति = विनाशं प्राप्नोति।

**व्याकरणम्**– नृपतिः = नराणां पतिः (ष.तत्पु.)। सङ्गात् = सञ्ज् + घञ्–तस्मात्। अनध्ययनात्= न अध्ययनम् नञ् तस्मात्। खलोपासनात् = खलस्य उपासनम् (ष.तत्पु.) तस्मात्।

**भावार्थः**– नृपतिः कुमन्त्रात् विनश्यति, संन्यासी आसक्तिकारणात् विनश्यति, सन्तानः स्नेहाधिक्यात् विनश्यति, ब्राह्मणः वेदादिशास्त्राणाम् अनध्ययनात् विनाशं गच्छति, वंशः कुपुत्रात् विनश्यति, सदाचारः दुष्टजनसंपर्कात् विनश्यति, लज्जा मदिरासेवनात् विनाशं याति, कृषिकर्म अनिरीक्षणात् नश्यति, प्रेम परदेशनिवासात् विनश्यति, मित्रता स्नेहाभावात् विनाशं गच्छति, नीतिविरुद्धाचरणात् ऐश्वर्यं विनश्यति, धनं दानात् प्रमादाच्च नष्टं भवति।

**दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।**
**यो न ददाति न भुङ्क्ते, तस्य तृतीया गतिर्भवति।। ४३।।**

**प्रसङ्गः**– अत्र श्लोके कविः वर्णयति यत् धनस्य गतित्रयमेव भवति।

**अन्वयः**– वित्तस्य दानं, भोगः, नाशः तिस्रः गतयः भवन्ति । यः न ददाति न भुङ्क्ते तस्य तृतीया गतिःभवति।।

**व्याख्या**– वित्तस्य = धनस्य, दानम् = सत्पात्रेभ्यः वितरणम्, भोगः = स्वकीये सुखे प्रयोगः, नाशः = विनाशः, तिस्रः = त्रिप्रकाराः, गतयः = दशाः, भवन्ति = सन्ति । यः = यः धनवान् जनः, न ददाति = सत्पात्रेभ्यः वित्तं न वितरति, न भुङ्क्ते = नोपभोगं करोति, तस्य = धनस्य, तृतीया = नाशरूपा, गतिः = अवस्था, भवति = अस्ति।।

**व्याकरणम्** – वित्तस्य = विद् + क्त, तस्य। गतयः = गम् + क्तिन्। ताः। दानम् = दा +ल्युट्। भोगः = भुज्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

+ घञ्।

**भावार्थः**– धनस्य अवस्थात्रयं भवति – दानं भोगः नाशश्चेति। यः धनवान् स्वनिवृत्तिपूर्वकसत्पात्रेभ्यः दानं न प्रददाति, स्वानन्दायोपभोगं न करोति, तस्य धनवतः जनस्य धनस्यावशिष्टा विनाशरूपा तृतीया दशा भवति।

**छन्दः**– आर्या।

**मणिः शाणोल्लीढः, समरविजयी हेतिदलितो,**
**मदक्षीणो नागः, शरदि सरितः श्यानपुलीनाः।**
**कलाशेषश्चन्द्रः, सुरतमृदिता बालवनिता,**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः।। ४४।।**

**प्रसङ्गः**– अत्र कविः सोदाहरणं दानस्य महत्त्वं प्रतिपादयति।

**अन्वयः**– शाणोल्लीढः मणिः, हेतिदलितः समरविजयी, मदक्षीणो नागः, शरदि श्यानपुलीनाः सरितः कलाशेषः चन्द्रः, सुरतमृदिता बालवनिता, अर्थिषु च गलितविभवाः जनाः तनिम्ना शोभन्ते ।

**व्याख्या**– शाणोल्लीढः = शाणः उपलः (यन्त्रविशेषः) तस्मिन् उल्लीढः संघृष्टः, मणिः = रत्नम्, हेतिदलितः = हेतिः शस्त्रं तैः दलितः आहतः=शस्त्राहतः, समरविजयी =समरे विजयी= युद्धजयी, मदक्षीणः = मदेन क्षीणः = दानवारिक्षरेण दुर्बलः, नागः = गजः, शरदि = शरदृतौ, श्यानपुलीनाः = शुष्कतटप्रदेशाः, सरितः = नद्यः, कलाशेषः= कलामात्रस्थितः, चन्द्रः= इन्दुः, सुरतमृदिता = सुरतेन मृदिताः = रतिक्रीडया लुलिताः, बालवनिताः = मुग्धाङ्गनाः, अर्थिषु = याचकेषु, गलितविभवाः = नष्टार्थसंपदः, जनाः = नराः, च तनिम्ना = च कृशत्वेन, शोभन्ते = शोभायमानाः भवन्ति, विभान्ति।

**व्याकरणम्**– शाणेन शाणे वा उल्लीढः(तत्पु.)। उल्लीढः = उद् + लिह् +क्त। हेतिदलितः = हेतिभिः दलितः(तत्पु.)।समरविजयी =समरे विजयी (तत्पु.) समर + वि + जि+ णिनि। मदक्षीणः = मदेन क्षीणः। श्यानपुलीनाः = श्यानानि पुलीनानि यस्याः ताः =सरितः (बहुव्रीहिः)। सुरतमृदिता = सुरतेन सुरते वा मृदिताः (तत्पु.)।गलितविभवाः = गलिताः विभवाः येषां ते = जनाः (बहुव्रीहिः)। अर्थिषु = अर्थ + इनि –तेषु। तनिम्ना = तनोः भावः तनिमा, तनु + इमनिच् – तेन।

**भावार्थः**– शाणसंघृष्टं रत्नं, श्स्त्राहतः समरविजेता, दानवारिक्षरेण दुर्बलः गजः, शरत्समये शुष्कतटप्रदेशाः नद्यः, कलामात्रावशिष्टः शशाङ्कः, रतिकर्मणि विह्वलीकृता षोडशी बाला, तथा याचकेभ्यः प्रदानेन नष्टार्थसंपदः जनाः कृशत्वेन विभान्ति।

**छन्दः**– शिखरिणी, **अलङ्कारः**– दीपकम्।

**परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये,**
**स पश्चात्सम्पूर्णः कलयति धरित्रीं तृणसमाम्।**
**अतश्चानैकान्त्याद् गुरुलघुतयाऽर्थेषु धनिना–**
**मवस्था वस्तूनि प्रथयति च सङ्कोचयति च।। ४५।**

**प्रसङ्गः**– कविः वर्णयति यत् परिस्थितिवशात् धनाभावे धनाधिक्ये च नराणामवस्थापरिवर्तनं भवति।

**अन्वयः**– कश्चित् परिक्षीणः यवानां प्रसृतये स्पृहयति, सः पश्चात् सम्पूर्णः धरित्रीं तृणसमां कलयति । अतः अर्थेषु गुरुलघुतया अनैकान्त्यात् धनिनाम् अवस्था वस्तूनि प्रथयति च सङ्कोचयति च।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**व्याख्या**- कश्चित् = कोऽपि, परिक्षीणः = दरिद्रः सन्, यवानाम् = यवाख्यधान्यानाम्, प्रसृतये = अर्धाञ्जलिमात्राय, स्पृहयति = अभिलषति, सः = असौ धनहीनः जनः, पश्चात् = अनन्तरम्, सम्पूर्णः = परिपूर्णः, धरित्रीम् = वसुन्धराम्, तृणसमाम् = घासतुल्याम्, अतितुच्छाम्, कलयति = मनुते। अतः च = अस्मादेव हेतोः, अर्थेषु = वित्तेषु, गुरुलघुतया = महत्त्वाल्पत्वभावेन, अनैकान्त्यात् = न एकान्तमनेकान्तं तस्य भावः अनैकान्त्यं तस्मात् = अनियतरूपेण विद्यमानात्, धनिनाम् = संपत्तियुक्तानाम्, अवस्था = दशा, वस्तूनि = पदार्थान्, प्रथयति च = विस्तारयति च, सङ्कोचयति च =लघूकरोति च।

**व्याकरणम्**- परिक्षीणः = परि+ क्षि+क्त, न=ण। सम्पूर्णः = सम् + पृ +क्त। धरित्रीम् = धृ + इत्र + ङीष्। तृणसमाम् = तृणेन समा इति (तृ.तत्पु.) ताम्। गुरुलघुतया = गुरुलघु + तल, टाप्, तया।

**भावार्थः**- कश्चिद् निर्धनः अञ्जलिमात्रं यवमेव पर्याप्तं मनुते परन्तु सः जनः धनिकावस्थायामेव सम्पूर्णां वसुधां तृणसमामतितुच्छां गणयति। अस्मात् कारणात् धनविषयेषु महत्त्वाल्पत्वभावेन नियमाभावात् धनिकानां दशा एव वस्तूनि विस्तारयति लघुकरोति च।

**छन्दः**- शिखरिणी। **अलङ्कारः**- दीपकं काव्यलिङ्गञ्च।

**राजन् ! दुधुक्षसि यदि क्षितिधेनुमेतां,**
**तेनाद्य वत्समिव लोकममुं पुषाण।**
**तस्मिँश्च सम्यगनिशं परिपोष्यमाणे,**
**नानाफलैः फलति कल्पलतेव भूमिः ।। ४६ ।।**

**प्रसङ्गः**- अत्र महाकविः भर्तृहरिः राज्ञः प्रजापालनं वर्णयति।

**अन्वयः**- राजन् ! यदि एतां क्षितिधेनुं दुधुक्षसि तेन वत्सम् इव अमुं लोकं पुषाण। तस्मिन् च सम्यक् अनिशं परिपोष्यमाणे (सति) भूमिः कल्पलता इव नानाफलैः फलति ।

**व्याख्या** - राजन् ! = हे नृप! यदि एतां = चेद् इमाम्, क्षितिधेनुम् = क्षितिः पृथिवी धेनुः इव ताम् = गोतुल्यां धराम्, दुधुक्षसि = दोग्धुमिच्छसि, तेन = तर्हि, अद्य=अधुना, वत्सम् = तर्णकम्, इव = सदृशः, अमुम् = एनम्, लोकम् = प्रजाजनम्, पुषाण = पोषय। तस्मिन् च = लोके, सम्यक् = समीचीनतया, अनिशम् = सततम्, परिपोष्यमाणे = परिपाल्यमाने, (सति) भूमिः = वसुन्धरा, कल्पलता इव = कल्पवल्लीव, नानाफलैः = अनेकप्रकारफलैः, फलति = सर्वसम्पत्सम्पन्ना भवति।

**व्याकरणम्**- परिपोष्यमाणे = परि+ पुष् (लट्) +यक् +शानच्

**भावार्थः**- हे राजन्! यदि इमां पृथिवीं गामिव दोग्धुमभिलषसि तर्हि वत्समिव स्वकीयं प्रजाजनं सम्यक् परिपालय । प्रजाजने सततं समीचीनतया परिपाल्यमाने सति इयं धरा कल्पलतेव बहुविधफलं प्रददाति। यथा वत्सनाशे गौः दुग्धं न ददाति तथैव प्रजानाशे अर्थनाशः भवत्येव।

**छन्दः**- वसन्ततिलका। **अलङ्कारः**-उपमा।

**सत्यानृता च परुषा प्रियवादिनी च,**
**हिंस्रा दयालुरपि चाऽर्थपरा वदान्या।**
**नित्यव्यया प्रचुरनित्यधनागमा च,**
**वाराङ्गनेव नृपनीतिरनेकरूपा।। ४७।।**

**प्रसङ्गः**- महाकविः भर्तृहरिः श्लोकेऽस्मिन् राजनीतेः बहुरूपत्वं वर्णयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अन्वयः**- सत्या अनृता च, परुषा प्रियवादिनी च, हिंस्रा दयालुः च अपि अर्थपरा वदान्या, नित्यव्यया प्रचुरनित्यधनागमा च, नृपनीतिः वाराङ्गना इव अनेकरूपा (अस्ति)।

**व्याख्या**- सत्या = यथार्थवादिनी, अनृता = असत्यवादिनी च, परुषा = कठोरभाषिणी, प्रियवादिनी = मधुरभाषिणी च, हिंस्रा = क्रूरा, दयालुः = दयावती, अपि च अर्थपरा = वित्तपरायणा, वदान्या = दानशीला, नित्यव्यया = सततव्यययुक्ता, प्रचुरनित्यधनागमा च = पर्याप्तसर्वदाधनलाभा च, नृपनीतिः = राजनीतिः, वाराङ्गना = गणिका, इव = सदृशी, अनेकरूपा =बहुप्रकारा (अस्ति)।

**व्याकरणम्**- नित्यव्यया = नित्यं व्ययः यस्याः सा (बहुव्रीहिः)। प्रचुरनित्यधनागमा = प्रचुरः नित्यं धनस्य आगमा यस्याः सा (बहुव्रीहिः)। नृपनीतिः = नृपस्य नीतिः (ष.तत्पु.)।अनेकरूपा = अनेकानि रूपाणि यस्याः सा (बहुव्रीहिः)। सत्या = सत्य + अच् + टाप्। अनृता = अनृत + अच् + टाप्। परुषा = पृ +उषन् + टाप्। प्रियवादिनी = प्रिय +वद् + णिनि +ङीष्। वदान्या = वद् +आन्य +टाप्।

**भावार्थः**- एषा राजनीतिः वारवनिता इव कदाचित् सत्यरूपा, असत्यरूपा, कदाचित् कठोरभाषिणी मधुरभाषिणी च, कदाचित् क्रूरा दयावती च, धनपरायणा दानशीला सर्वदा व्यययुक्ता च, कदाचित् सर्वदा पर्याप्तधनागमा च एवंरूपेण बहुरूपा विद्यते।

**छन्दः**- वसन्ततिलका। **अलङ्कारः**- उपमा।

**आज्ञा कीर्तिः पालनं ब्राह्मणानां,**
**दानं भोगो मित्रसंरक्षणं च।**
**येषामेते षड्गुणा न प्रवृत्ताः,**
**कोऽर्थस्तेषां पार्थिवोपाश्रयेण।। ४८।।**

**प्रसङ्गः**- राज्याश्रयेण कानि फलानि लभ्यन्ते तानि अत्र कविना वर्णितानि।

**अन्वयः**-आज्ञा, कीर्तिः, ब्राह्मणानां पालनं, दानं, भोगः, मित्रसंरक्षणं च एते षड्गुणाः येषां न प्रवृत्ताः, तेषां पार्थिवोपाश्रयेण कः अर्थः ?

**व्याख्या**--आज्ञा = प्रशासनम्, कीर्तिः = यशः, ब्राह्मणानाम् = विप्राणाम्, पालनम् = पोषणम्, दानम् = सत्पात्रे त्यागः, भोगः = ऐश्वर्याणामुपभोगः, मित्रसंरक्षणम् = सुहृत्पालनम् च, एते षड्गुणाः = इमे पूर्वोक्ताः गुणाः, येषाम्= राज्ञाम् न प्रवृत्ताः = न विद्यन्ते, तेषाम्= शासकानाम्, पार्थिवानाम् = नृपाणाम्, उपाश्रयेण = सेवनेन, कः अर्थः = किं प्रयोजनम् ?

**व्याकरणम्**- कीर्तिः = कृत् + क्तिन्। पालनम् = पाल् +ल्युट्। दानम् = दा + ल्युट्। भोगः = भुज् + घञ्। संरक्षणम् = सम् + रक्ष् + ल्युट्। उपाश्रयेण = उप +आ +श्रि + अच्, तेन। प्रवृत्ताः = प्र +वृत् + क्त, ते।

**भावार्थः** - शासनं, यशः, विप्रपालनं, धनवितरणं, उपभोगः, मित्रसंपालनम् एते षड्गुणाः येषां राज्ञां न विद्यन्ते तेषां नृपाणां सेवनेन किं प्रयोजनम्?

**छन्दः**- शालिनी। **अलङ्कारः**- अर्थापत्तिः।

**यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं,**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम्।**
**तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः,**
**कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्।। ४९।।**

**प्रसङ्गः**– अत्र कविना प्रतिपादितं यत् भाग्यानुसारं धनं लभ्यते।

**अन्वयः**– धात्रा निजभालपट्टलिखितं स्तोकं महत् वा यद् धनं (अस्ति), तत् मरुस्थले अपि नितरां प्राप्नोति, ततः अधिकं मेरौ न (प्राप्नोति), तत् धीरः भव, वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः, पश्य, घटः कूपे पयोनिधौ अपि तुल्यं जलं गृह्णाति ।

**व्याख्या**– धात्रा = ब्रह्मणा, निजभालपट्टलिखितम् = स्वकीयललाटाङ्कितम्, स्तोकम् = अल्पम्, महत् = बहुलम्,वा यद् धनम् = वित्तम् (अस्ति), तत् = धनम्, मरुस्थले = निर्जलप्रदेशे, अपि नितराम् = अवश्यम्, प्राप्नोति = लभते, ततः = विधिलिखितात्, अधिकम् = अत्यधिकम्, मेरौ = मेरुपर्वते, न (प्राप्नोति) न (लब्धुं शक्नोति), तत् = तस्मात् कारणात्, धीरः = धैर्यवान्, भव = एधि, वित्तवत्सु = धनवत्सु, कृपणाम् = दीनाम्, वृत्तिम् = व्यापारम्, वृथा = व्यर्थमेव, मा कृथाः = न कुरु, पश्य = अवलोकय, घटः = कलशः, कूपे = प्रहौ, पयोनिधौ = समुद्रे, अपि तुल्यम् = समानम्, जलम् = वारि, गृह्णाति = स्वीकरोति, आदत्ते।

**व्याकरणम्**– धात्रा = धा + तृच् +तेन। पयोनिधौ = पयसां निधिः तस्मिन्।

**भावार्थः**– ब्रह्मणा नरस्य भालपलके विलिखितं यदल्पं बहु वा धनमस्ति तद्धनं नरः मरुप्रदेशे सम्पूर्णं लभते तदधिकं च सुवर्णपर्वते मेरौ न प्राप्नोति। अतः हे मानव ! धैर्यवान् भव, धनिकेषु दीनं व्यापारं न प्रदर्शय। विलोकय, घटः कूपे समुद्रे वा स्वपरिमाणानुसारं समानमेव जलं गृह्णाति।

**छन्दः**– शार्दूलविक्रीडितम् । **अलङ्कारः** – काव्यलिङ्गम्।

**त्वमेव चातकाधारोऽसीति केषां न गोचरः।**
**किमम्भोदवराऽस्माकं कार्पण्योक्तिं प्रतीक्षसे ?।। ५०।।**

**प्रसङ्गः**– श्लोकेऽस्मिन् कविना वर्णितं यत् प्रशस्तः दाता दरिद्रयाचकानां याचनां विनैव मनोरथान् पूरयति।

**अन्वयः**– हे अम्भोदवर ! त्वम् एव चातकाधारः असि इति केषां गोचरः न (अस्ति)। (अतः) अस्माकं कार्पण्योक्तिं किं प्रतीक्षसे ?

**व्याख्या**– हे अम्भोदवर ! = (अम्भः ददाति इति अम्भोद, तेषु वरः, तत्संबुद्धौ) हे मेघश्रेष्ठ ! त्वम् एव = केवलं त्वमेव, चातकाधारः = सारङ्गाश्रयः, असि = वर्तसे, इति = एवम्, केषाम् = प्राणिनाम्, गोचरः न (अस्ति) = ज्ञानं नास्ति। (अतः) = अस्मात् कारणात्, अस्माकम् = चातकानाम्, कार्पण्योक्तिम् = दैन्यवाणीम्, किम् = किमर्थम्, प्रतीक्षसे = प्रतीक्षां करोषि?

**व्याकरणम्**– कार्पण्योक्तिम् = कृपणस्य भावः तस्य उक्तिम्। कार्पण्यम् = कृपणस्य भावः ,भावे ष्यञ्। उक्तिम् = वच् + क्तिन् ताम्।

**भावार्थः**– हे मेघश्रेष्ठ ! त्वमेव अस्माकं चातकपक्षिणामाश्रयः असि इति सर्वे जानन्ति , अतः अस्माकं दीनवचनं श्रोतुं किमर्थं प्रतीक्षां करोषि? अर्थात् दैन्यवाणीमनाकर्ण्य अस्माकमाशा पूरणीया।

**छन्दः**– अनुष्टुप्। **अलङ्कारः**– अप्रस्तुतप्रशंसालङ्कारः।

**रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता–**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः।।५१।।**

**प्रसङ्गः**– अत्र कविना सोदाहरणं वर्णितं यत् संसारे सर्वे उदाराः न सन्ति अतः सर्वत्र याच्ञा न करणीया।

**अन्वयः**– रे रे मित्र चातक ! सावधानमनसा क्षणं श्रूयताम्। गगने बहवः अम्भोदाः वसन्ति, सर्वे अपि एतादृशाः न (सन्ति)। केचिद् वसुधां वृष्टिभिः आर्द्रयन्ति, केचिद् वृथा गर्जन्ति, (त्वं) यं यं पश्यसि तस्य तस्य पुरतः दीनं वचः मा ब्रूहि।

**व्याख्या**– रे रे मित्र चातक ! = हे हे सखे सारङ्ग ! सावधानमनसा = अवहितचेतसा, क्षणम् = अल्पकालम्, श्रूयताम् = आकर्ण्यताम्। गगने = आकाशे, बहवः = अनेके, अम्भोदाः = जलदाः, वसन्ति = तिष्ठन्ति, सर्वे = मेघाः, अपि एतादृशाः = ईदृशाः जलप्रदाः, न (सन्ति) = न वर्तन्ते। केचिद् = केचन पयोदाः, वसुधाम् = धराम्, वृष्टिभिः = वर्षाजलैः, आर्द्रयन्ति = जलेन सिञ्चन्ति, केचिद् = अपरे केचन मेघाः, वृथा = विना कारणम्, गर्जन्ति = शब्दायन्ते, (त्वं) यं यं = मेघम्, पश्यसि = अवलोकयसि, तस्य तस्य = सर्वस्य मेघस्य, पुरतः = अग्रतः, दीनम् = कृपणाम्, वचः = वाणीम्, मा ब्रूहि = न वद।

**व्याकरणम्**– अम्भोदाः =अम्भं ददाति ते (उपपदसमासः)

**भावार्थः**– हे मित्र चातक ! स्वस्थमनसा क्षणमात्रं शृणु। आकाशे बहवः जलदाः निवसन्ति परन्तु सर्वे जलं प्रदातुं समर्थाः न भवन्ति। केचिद् मेघाः वर्षाजलेन धरां सिञ्चन्ति अपरे व्यर्थमेव गर्जन्ति। अतः यं यं मेघमवलोकयसि तस्य तस्य अग्रतः जलप्रार्थनायुक्तां दीनवाणीं मा वद।

**छन्दः**– शार्दूलविक्रीडितम्। **अलङ्कारः** – काव्यलिङ्गम्।

## अभ्यास-प्रश्नाः-

### वस्तुनिष्ठ-प्रश्नाः

१. अपण्डितानां भूषणं किम्?
   १. वस्त्रम् २. मौनम्
   ३. भोजनम् ४. दानम्। ( )

२. कस्य नास्ति औषधम् ?
   १. दरिद्रस्य २. पण्डितस्य
   ३. मूर्खस्य ४. वानरस्य। ( )

३. वाराङ्गनेव------अनेकरूपा।
   १. चाणक्यनीतिः २. देशनीतिः
   ३. शुक्रनीतिः ४.राजनीतिः। ( )

४. सत्संगतिः कथय कि न करोति -----।
   १. जनानाम् २. नराणाम्
   ३. पुसाम् ४. वीराणाम्। ( )

५. -----परं भूषणम् ।
   १. शीलम् २. चरित्रम्
   ३. वलम् ४ कार्यम्। ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. -----भूषणं भूषणम्।

१. धनम् २. वाक्

३. वाग् ४. वाणी। ( )

७. सुकविता यद्यस्ति -------किम्?

१. राज्येन २. धनेन

३. विद्यया ४. यशसा। ( )

८. कं नरं ब्रह्मापि न रञ्जयति ?

१. विज्ञम् २. अज्ञम्

३. विशेषज्ञम् ४. ज्ञानलवदुर्विदग्धम्। ( )

९. स्मयदूषिताः सन्ति ?

१. बोद्धारः २. प्रभवः

३. मूर्खाः ४. विद्वांसः। ( )

१०. सूर्यातपः कथं वारयितुं शक्यः ?

१. छत्रेण २. जलेन

३. मेघेन ४. दण्डेन । ( )

११. निशिताङ्कुशेन कः वारयितुं शक्यः ?

१. सूर्यातपः २. हुतभुक्

३. नागेन्द्रः ४. मूर्खः । ( )

१२. विद्या कुत्र पूज्यते ?

१. बन्धुजने २. राजसु

३. विदेशगमने ४. गृहे । ( )

१३. ज्ञातिश्चेत्-------- किम्?

१. अनलेन २. कवचेन

३. अरिभिः ४. राज्येन । ( )

१४. धनस्य तृतीया गतिः का ?

१. दानम् २. नाशः

३. भोगः ४. यशः। ( )

१५. कल्पलतेव नानाफलैः का फलति ?

१. नीतिः २. वृक्षः

३. भूमिः ४. देशः । ( )

१६. खलोपासनात् किं विनश्यति?

१. शीलम् २. कुलम्

३. धनम् ४. मित्रत्वम् । ( )

१७. कुलं कस्माद् विनश्यति?

१. सङ्गात् २. कुतनयात्

३. लालनात् ४. अनध्ययनात् । ( )

१८. विप्रः कस्माद् विनश्यति?

१. सङ्गात् २. कुतनयात्

३. लालनात् ४. अनध्ययनात् । ( )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१९. गजपुङ्गवः कथं विलोकयति ?
१. शीघ्रम् २. उच्चैः
३. धीरम् ४. नीच्चैः । ( )

**अतिलघूत्तरात्मकः-**

१. नीतिशतकस्य लेखकः कः?
२. कवेः कति रचनाः सन्ति ?
३. के मत्सरग्रस्ताः ?
४. कीदृशः जन्तुः परिग्रहफल्गुतां न गणयति ?
५. शतमुखः विनिपातः केषां भवति ?
६. हुतभुक् कथं वारयितुं शक्यः ?
७. भुविभारभूताः मनुष्यरूपेण के चरन्ति ?
८. यैः मणयः अर्घतः पातिताः ते कीदृशाः स्युः ?
९. गुरूणां गुरुः का विद्यते?
१०. कीदृशी वाणी पुरुषं समलङ्करोति?
११. यदि सुहृद् किं फलम्?
१२. दुर्जने सदा किं प्रदर्शनीयम्?
१३. आर्जवं कुत्र भवेत्?
१४. धृष्टता कुत्र प्रदर्शनीया ?
१५. वाचि सत्यं का सिञ्चति ?
१६. कीदृशाः कवीश्वराः जयन्ति?
१७. प्रारभ्य विघ्नविहिताः के विरमन्ति?
१८. कः चाटुशतैः भुङ्क्ते?
१९. वयः कस्य हेतुः न खलु ?
२०. धनस्य कति गतयः भवन्ति?
२१. सर्वे गुणाः कम् आश्रयन्ति?
२२. सुतः कस्माद् विनश्यति ?
२३. अनवेक्षणात् किं विनश्यति?
२४. नृपतिः कस्माद् विनश्यति ?
२५. सवितुः पादैः स्पृष्टः कः प्रज्वलति?
२६. मनस्विनः कस्य इव द्वयी वृत्तिः भवति ?

**लघूत्तरात्मकः-**

१. कुपितः विधाता हंसस्य कीदृशीं प्रसिद्धां कीर्तिमपहर्तुं न समर्थः ?
२. पुरुषस्य सर्वोत्तममाभूषणं लिखत।
३. जन्मग्रहणस्य साफल्यं लिखत।
४. उदारतायाः प्रमाणं लेख्यम्।
५. धनस्य गतयः काः ?
६. कषां चरित्रविभूतयः निःसीमानः भवन्ति?
७. मनस्विनः वृत्तिद्वयं लिखत।

**निबन्धात्मक-प्रश्नाः-**

१. सत्संगतेः महत्त्वं प्रतिपादनीयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अमरकोषः

### भूमिवर्गः

**भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा।**
**धरा धरित्री धरणी क्षोणी ज्या काश्यपी क्षितिः।।1।।**
**सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा।**
**गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही।।2।।**
**विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा।**
**भूतधात्री रत्नगर्भा जगती सागराम्बरा।।3।।**

* भूमेरष्टात्रिंशन्नामानि–
भूः, भूमिः, अचला, अनन्ता, रसा, विश्वम्भरा, स्थिरा, धरा, धरित्री, धरणी, क्षोणी, ज्या, काश्यपी, क्षितिः, सर्वंसहा, वसुमती, वसुधा, उर्वी, वसुन्धरा, गोत्रा, कुः, पृथिवी, पृथ्वी, क्ष्मा, अवनिः, मेदिनी, मही, विपुला, गह्वरी, धात्री गौः, इला, कुम्भिनी, क्षमा, भूतधात्री, रत्नगर्भा, जगती सागराम्बरा चा (स्त्री.)

**मृन्मृत्तिका, प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका।**
**उर्वरा सर्वसस्याढ्या स्यादूषः क्षारमृत्तिका।।4।।**

* मृत्तिकाया नामद्वयम् –
मृत् मृत्तिका च (स्त्री.)।
* प्रशस्तमृत्तिकायाः (अच्छी मिट्टी) नामद्वयम् –
मृत्सा मृत्स्ना च [2 स्त्री.]
* सर्पसस्याढ्याभूमेः एकं नाम – (उपजाऊ भूमि)
उर्वरा [स्त्री.]
* क्षारमृत्तिकायुक्तभूमेः नामद्वयम् –
ऊषः (पु.) क्षारमृत्तिका च [स्त्री.]।

**ऊषवानूषरो द्वावप्यन्यलिङ्गौ, स्थलं स्थली।**
**समानौ मरुधन्वानौ द्वे खिलाऽप्रहते समे।।5।।**

* क्षारविशिष्टभूमेः नामद्वयम् –
ऊषवान् ऊषरः च [2 त्रिषु लिङ्गेषु]
* अकृत्रिमभूमेः नामद्वयम् –
स्थलम् (नपुं.) स्थली च [स्त्री.]
* कृत्रिमभूमेः एकं नाम – (जुती हुई भूमि)
स्थला (स्त्री.)
* मरुभूमेः धन्वा (धन्वन्) च [2 पु.]।
* मरुः धन्वा (धन्वन्) च [2 पु.]।
* अप्रहतभूमेर्नामद्वयम्। (पडती, बिना जुती हुई भूमि)
खिलम् अप्रहतं च [2 त्रिषु लिङ्गेषु]

**त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्।**
**लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः।।6।।**
**देशः प्राग्दक्षिणः प्राच्यः उदीच्यः पश्चिमोत्तरः।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**प्रत्यन्तो म्लेच्छ देशः स्यान्मध्यदेशस्तु मध्यमः।।7।।**

**जगतः पञ्चनामानि**

* जगती (स्त्री.) लोकः (पु.) विष्टपम्, भुवनं जगत् च [नपुं.]।
* भारतवर्षस्य (हिन्दुस्तान का) एकं नाम - भारतम् (नपुं.)
* शरावत्याः (राप्ती) अवधेः यः प्राग्दक्षिणः देशः सः प्राच्यः [पु.]
* शरावत्याः अवधेः पश्चिमोत्तरो देशः उदीच्यः [पु.]।
* शिष्टाचाररहितस्य देशस्य नामद्वयम् - प्रत्यन्तः म्लेच्छदेशश्च [2 पु.]।

**तद्यथा- चातुर्वण्यव्यवस्थानं यस्मिन् देशे न विद्यते।**
**तं म्लेच्छाविषयं प्राहुरार्यावर्तमतः परम्।।**

* मध्यदेशस्य नामद्वयम् - मध्यदेशः मध्यमः च [2 पु.]।

**आर्यावर्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः।**
**नीवृज्जनपदो देशविषयौ तूपवर्तनम्।।8।।**

* हिमालयविन्ध्यमध्यवर्तिदेशस्य नामद्वयम् - आर्यावर्तः (पु.) पुण्यभूमिः (स्त्री.)
* जनपदस्य नामद्वयम् - नीवृत् जनपदः च [2 पु.]
* ग्रामसमुदायस्य नामत्रयम् - देशः, विषयः (2 पु.) उपवर्तनं च [नपु.]।

**त्रिष्वागोष्ठान् नडप्राये, नड्वान्नाड्वल इत्यपि।**
**कुमुद्वान् कुमुदप्राये, वेतस्वान् बहुवेतसे।।9।।**

* गोष्ठशब्दम् अभिण्याप्यशब्दाः त्रिषु लिङ्गेषु प्रयुज्यन्ते।
* नडाधिकप्रदेशस्य नामद्वयम् - नडवान् नड्वलः च [2 त्रि.]
* कुमुदाधिकप्रदेशस्य नाम - कुमुद्वान् [कुमुइत्, त्रि]
* वेतसाधिकप्रदेशस्य नाम - वेतस्वान् [वेतस्वत्, त्रि.]

**शाद्वलः शादहरिते सजम्बाले तु पङ्किलः।**
**जलप्रायमनूप्रं स्यात् पुंसि कच्छस्तथाविधः।।10।।**

* हरितघासयुक्तप्रदेशस्य नाम - शाद्वलः [त्रि.]
* पङ्किलप्रदेशस्य नाम - (कीचड युक्त प्रदेश) - पङ्किलः [त्रि.]
* जलाधिकप्रदेशस्य नामत्रयम् - जलप्रायम् (त्रि) अनूपं (त्रि) कच्छः च (पु.)।

**स्त्री शर्करा शर्करिल शार्करः शार्करावति।**
**देश एवादिमावेवमुन्नेयाः सिकतावति।।11।।**

* शर्करायुक्तप्रदेशस्य (छोटे-छोटे कङ्कड युक्त प्रदेश) नाम-द्वयम्-शर्करा (स्त्री.) शर्करिलः च [त्रि]।
* शर्करामिश्रितवस्तुमात्रस्य (कङ्कडमिश्रितवस्तु) नामद्वयम् - शार्करः, (त्रि.) शार्करावान् च (त्रि)

**देशो नद्यम्बुवृष्ट्यम्वुसम्पन्नव्रीहिपालितः।**
**स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्।।12।।**

* नदीजलद्वारा उत्पन्नव्रीहिपालितदेशः नदीमातृकः [त्रि.]।
* वृष्टिजलद्वारा उत्पन्नव्रीहिपालितदेशः देवमातृकः [त्रि.]।

**सुराज्ञि देशे राजन्वान् स्यात्ततोऽन्यत्रराजवान्।**
**गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम्।।13।।**

* सज्जनराजयुक्तदेशस्य नाम - राजन्वान् [राजन्वत्, त्रि.]



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* सौमार्त्यराजयुक्तदेशस्य नाम – राजवान् [राजवत् त्रि.]
* गोष्ठस्य (गोठ, गोशाला) नामद्वयम् – गोष्ठम् (न.) गोस्थानकं च (व.)
* भूतपूर्वगोष्ठस्य नाम – गौष्ठीनम् (न.)

**पर्यन्तभूः परिसरः सेतुरालौ स्त्रियां पुमान्।**
**वामलूरश्च नाकुश्च वल्मीकं पुन्नपुंसकम्।।14।।**

* ग्रामनगरनद्यादिसमीपभूमेर्नामद्वयम् – पर्यन्तभूः (स्त्री.) परिसरः च (पु.)।
* सेतोर्नामद्वयम् (पुल) – सेतुः (पु.) आलिः च (स्त्री.)
* वल्मीकस्य (बाँबी) नामत्रयम् – वामलूरः (पु.) नाकुः (पु.) वल्मीकं च (पु न.)।

**अयनं वर्त्म मार्गाऽध्वपन्थानः पदवी सृतिः।**
**सरणिः पद्धतिः पद्या वर्तन्येकपदीति च।।15।।**

* मार्गस्य द्वादश नामानि – अयनम्, वर्त्य, (वर्त्मन रन) मार्गः, अध्वा (अध्वन) पन्थाः (पधिन, पु) पदवी, सृतिः, सरणिः, पद्धतिः, पद्या, वर्तनी एकपदी च, (7 स्त्री)

**अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि।**
**व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः।।16।।**

* सुन्दरमार्गस्य नामत्रयम् – अतिपन्थाः (अतिपथिन्), सुपन्थाः (सुपथिन्) सत्पथः च [3 पु]।
* कुपथः पञ्चनामानि – व्यध्वः, दुरध्वः, विपथः, कदध्वा (कदध्वन्) कापथः च (5 पु.)

**अपन्थास्त्वपथं तुल्ये, शृङ्गाटक-चतुष्पथे।**
**प्रान्तरं दूरशून्योऽध्वा, कान्तारं वर्त्म दुर्गमम्।।17।।**

* मार्गरहितस्य नामद्वयम् – अपन्थाः (अपथिन्, पु.) अपथं च [नपु.]
* चतुष्पथस्य (चौराहा) 5 – शृङ्गटकं चतुष्पथं च [2 नपुं.]।
* छायाविहीननिर्जलदूरदेशस्थमार्गस्य नाम – प्रान्तरम् [नपु.]।
* दुर्गममार्गस्य नाम – कान्तारम् [पु. नपुं.]

**गव्यूतिः स्त्री क्रोशयुगं, नल्वः किष्कुचतुः शतम्।**
**घण्टापथः संसरणं, तत्पुरस्योपनिष्करम्।।18।।**

* क्रोशद्वयस्य नाम – गव्यूतिः [स्त्री.]
* चतुः शतहस्तपरिमितभूमेः नाम – नल्वः (पु.)।
* राजपथस्य (सड़क) नामद्वयम् – घण्टापथः (पु.) संसरणं च (नपु)।
* नगरगामिराजमार्गस्य नाम – उपनिष्करम् (नपु.)।
* भूम्याकाशयोः पञ्चनामानि – द्यावापृथिव्यौ, रोदस्यौ, द्यावाभूमी, रोदसी दिवस्पृथिव्यौ च [5 स्त्री.द्वि.व.]।
* लवणाकरस्य (खारा समुद्र) नामत्रयम् – गञ्जा (स्त्री.) रूमा (स्त्री) लवणाकरश्च (पु.)।

## पुरवर्गः

**पूः स्त्री पुरी-नगर्यौ वा पत्तनं पुटभेदनम्।**
**स्थानीयं निगमोऽन्यत्तु यन्मूलनगारात्पुरम्।।1।।**

* नगर्याः सप्तनामानि – पूः (पुर, स्त्री.) पुरी, नगरी (2 स्त्री. नपु.) पत्तनम्, पुटभेदनम्, स्थानीयम (3 न.) निगमश्च (पु.)।

**तच्छाखानगरं वेशो, वेश्याजनसमाश्रयः।**
**आपणस्तु निषद्यायां, विपणिः पण्यवीथिका।।2।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* मूलनगरस्य (राजधानी) नाम – शाखानगरम् (न 9)
* वेश्यानां निवास स्थानस्य नामद्वयम् – वेशः वेश्याजन समा-प्रयश्च (2 पु.)
* आपणस्य (दुकान/गोदाम) नामद्वयम् – आपणः (पु.), निषद्या च (स्त्री.)
* पण्यवीथिकायाः (बाजार) नामद्वयम – विपणिः पण्यवीथिका च (2 स्त्री.)।

**रथ्या प्रतोली विशिखा, स्याच्चयो वप्रमस्त्रियाम्।**
**प्रकारो वरणः सालः, प्राचीनं प्रान्ततो वृतिः।।3।।**

* रथ्यायाः (गली के) त्रीणि नामानि – रथ्या, प्रतोली विशिखा च (3 स्त्री.)।
* वप्रनिर्माणार्थमिष्टकादिचयस्य (किले के चारों ओर ऊँचा किया मिट्टी का ढेर) नामद्वयम् – चयः (पु.) वप्रं च (न.पु.)
* प्राकारस्य नामत्रयम् – प्राकारः, वरणः सालश्च (3 पु.)।
* ग्रामादेरन्ते कण्टकादिवेष्टनस्य नाम – प्राचीनम् (न.पु.) प्राचीरम् इति पाठान्तरम्,

**भित्तिः स्त्री कुड्यमेडूकं यदन्तर्न्यस्तकीकसम्।**
**गृहं गेहोदवसितं वेश्म सद्म निकेतनम्।।4।।**
**निशान्त-वस्त्यसदनं भवनागारमन्दिम्।**
**गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः।।5।।**

* भित्तेनामद्वयम् – भित्तिः (स्त्री.) कुड्य. च (नपु.)
* अस्थ्यादिमध्यनिहितभित्तेर्नाम – एडूकम् (नपु.)
* गृहस्य षोडशनामानि – गृहम्, गेहम्, उदवसितम्, वेश्म (वेश्मन्)
* सद्म (सद्मन्), निकेतनम्, निशान्तम्, वस्त्यम्, सदनम्, भवनम, अगारम्, मन्दिरम् (12 नपु.) गृहा (पु.ब.व.), निकाय्यः, निलयः, आलयश्च (3 पु.)।

**वासः कुटी द्वयोः शाला सभा सञ्जवनं त्विदम्।**
**चतुः शालं मुनीनान्तु पर्णशालोटजोऽस्त्रियाम्।।6।।**

* सभागृहस्य चत्वारि नामानि – वासः (पु.) कुटी (पु.स्त्री.) शाला सभा च (2 स्त्री)।
* चतुः शालस्य (चौतरफा घर वाला स्थान) नामद्वयम् – सञ्जवनं, चतुःशालं च (2 नपु.)
* मुनिगृहस्य नामद्वयम् – पर्णशाला (स्त्री.) उटजश्च (पु.नपु.)

**चैत्यमायतनं तुल्ये, वाजिशाला तु मन्दुरा।**
**आवेशनं शिल्पिशाला, प्रपा पानीयशालिका ।।7।।**

* बौद्धस्तूपस्य (बौद्धस्तूप/यज्ञस्थानविशेष) नामद्वयम् – चैत्यम् आयतनं च (2 नपु.)
* वाजिशालायाः (घुडशाल) नामद्वयम् – वाजिशाला मन्दुरा च (र स्त्री.)
* शिल्पिशालायाः (कारीगरों का घर) नामद्वयम् – आवेशन (न.) शिल्पिशाला च (स्त्री.)
* पानीयशालिकायाः (प्याऊ) नामद्वयम् – प्रपा पानीयशालिका च (2 स्त्री.)

**मठश्छात्रादिनिलयो, गञ्जा तु मदिरागृहम्।**
**गर्भागारं वासगृहमरिष्टं सूतिकागृहम्।।8।।**

* सन्यासि-विद्यार्थि-निवासस्य नाम-मठः (पु.)
* मदिरागृहस्य नामद्वयम् – गञ्जा (स्त्री.) मदिरागृहं च (नपु.)
* देवप्रतिमादिनिवासार्थगर्भगृहस्य (तहखाना) नामद्वयम् – गर्भागारं वासगृहं च (2 नपु.)।
* सूतिकागृहस्य नामद्वयम् – अरिष्टं सूतिकागृहं च।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**कुट्टिमोऽस्त्री निबद्धभूश्चन्द्रशाला शिरोगृहम्।**
**वातायनं गवाक्षोऽथ मण्डपोऽस्त्री जनाश्रयः।।9।।**
**हर्म्यादिधनिनां वासः प्रासादो देवभूभुजाम्॥**

* कुट्टिमस्य (पक्का आंगन) नाम-कुट्टिमः (पु.नपु.)।
* शिरोगृहस्य (छत पर बना कमरा) नामद्वयम्-चन्द्रशाला (स्त्री.) शिरोग्रहं च (नपु.)।
* वातायनसा (खिड़की/झरोखा) नामद्वयम्-वातायनं (नपु.) गवाक्षश्च (पु.)।
* मण्डपस्य नामद्वयम्-मण्डपः (पु. नपु.) जनाश्रयश्च (पु.)।
* धनिकानां गृहस्य नाम-हर्म्यम् (नपु.)।
* देवभूभुजां भवनस्य नाम-प्रासादो।

**सौधोऽस्त्री राजसदनमुपकार्योपकारिका।**
**स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च।।10।।**

* राजगृहस्य (राजमहल) नामद्वयम्-सौधः (पु. नपु.) राजसदनं च (नपु.)।
* राजगृहसामान्यस्य (सामान्य राजगृह/तम्बू शामियाना)-उपकार्या उपकारिका च (2 स्त्री.)

**विच्छन्दकः प्रभेदा हि भपन्तीश्वरसद्मनाम्।**
**स्त्र्यगारं भूभुजामन्तः पुरं स्यादवरोधनम्।।11।।**

* राजधनिकगृहाणामेकैकं नाम-स्वस्तिकः, सर्वतोभद्रः, नन्द्यावर्तः (आदि शब्देन रुचकवर्द्धमानादिपरिग्रहः), विच्छन्कः च (4 पु.)
* राज्ञाम् अन्तः पुरस्य (रनिवास) चत्वारि नामानि-अन्तः पुरम् (नपु.) अवरोधनम् (न.) शुन्यन्तः अवरोधश्च (2 पु.)

**शुद्धान्तश्चावरोधश्च स्यादट्टः क्षौममस्त्रियाम्।**
**प्रघाण-प्रघणाऽलिन्दा बहिर्द्वारप्रकोष्ठके।।12।।**

* गृहस्थिस्योपरिवर्तमानस्य प्रकोष्ठस्य नामद्वयम्-अट्टः (पु.) क्षौमं च (पु. नपु.)।
* बहिर्द्वारप्रकोष्ठकस्य चतुष्कस्य (चौखट की बाहरी जगह) नामत्रयम्-प्रघाणः, प्रघणः अलिन्दश्चो (3 पु.)।

**गृहाऽवगृहणी देहल्यङ्गनं चत्वराऽजिरे।**
**अघस्ताद्दारुणि शिला, नासा दारूपरिस्थितम्।।13।।**

* देहल्याः नामद्वयम्-गृहावग्रहणी देहली च (2 स्त्री.)।
* चत्वरस्य (आँगन/चबूतरा) नामत्रयम्-अङ्गनम् (नपु.), चत्वरम् (नपु.) अजिरं (नपु.) च।
* द्वारस्तम्भस्य अघोभागस्थितकाष्ठादेः नाम-शिला (स्त्री.)।
  (दरवाजे के दोनों खम्भों के नीचे वाले काष्ठ लोहे या पत्थर का नाम)
* द्वारस्तम्भस्य ऊर्ध्वभागास्थितकाष्ठादेः नाम-नासा (स्त्री.)
  (दरवाजे के ऊपर स्थित काष्ठ लोहे या पत्थर का नाम)

**प्रच्छन्नमन्तर्द्वारं स्यात्पक्षद्वारं तु पक्षकः।**
**वलीक-नीध्रे पटलप्रान्तेऽथ पटलं छदिः।।14।।**

* गुप्तद्वारस्य नामद्वयम्-प्रच्छन्नम् (नपु.), अन्तर्द्वारं च (नपु.)
* पक्षद्वारस्य (बगल का दरवाजा) नामद्वयम्-पक्षद्वारं (नपु.) पक्षकं च (नपु.) पक्षकः (पु.) इति पाठान्तरम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* गृहच्छादन-पटलप्रान्तस्य (छान का प्रान्तभाग) नामत्रयम्-वलीकं (नपु.) नीध्रं (नपु.), पटलप्रान्तं (नपु.) च।

* छदिषः पटलस्य (छान) नामद्वयम्-पटलं (नपु.) छदिः (छदिस्) (स्त्री. नपु.)

**गोपानसी तु वलभीछादने वक्रदारुणि।**
**कपोतपालिकायान्तु विटङ्कं पुन्नपुंसकम् ।।15।।**

* चन्द्रशालायाः छादनस्य (छज्जा) नामद्वयम्-गोपानसी (स्त्री.) वलभी (स्त्री.) च।

* कपोतपालिकायाः (कबूतर आदि पक्षियों के लिए लकड़ी आदि का बनाया हुआ घर/कंगूरा) नामद्वयम्-कपोतपालिका (स्त्री.) विटङ्कं च (नपु.पु.)

**स्त्री द्वार्द्वारं प्रतीहारः स्याद् वितर्दिस्तु वेदिका।**
**तोरणोऽस्त्री बहिर्द्वारं पुरद्वारं तु गोपुरम् ।।16।।**

* द्वारस्य नामत्रयम्-द्वाः (द्वार, स्त्री.), द्वारं (नपु.) प्रतीहारः च (पु.)

* वेदिकायाः (वेदी, चबूतरा) नामद्वयम्-वितर्दिः (स्त्री.) वेदिका (स्त्री.) च।

* बहिर्द्वारस्य (तोरण, बाहरी फाटक) नामद्वयम्-तोरणः (पु. नपु.) बहिर्द्वारं च (नपु.)।

* पुरद्वारस्य (नगरद्वार) नामद्वयम्-पुरद्वारं (नपु.), गोपुरं च (नपु.)।

**कूटं पूर्द्वारि यद्धस्तिनखस्तस्मिन्नथ त्रिषु।**
**कपाटमररं तुल्ये, तद्विष्कम्भोऽर्गलं न ना ।।17।।**

* पुरद्वारेऽवतारणार्थं कृतस्य क्रमेण निम्नमृत्कूटस्य नाम-हस्तिनखः (पु.) (किला या नगर का विशेषद्वारा 'खुर्रा')

* कपाटस्य (किवाड़) नामद्वयम्-कपाटम् (नपु.) अररं च (नपु.)

* कपाटरोधक काष्ठदण्डस्य (आगल) नाम-अर्गलम् (नपु.) अर्गला (स्त्री.)

**आरोहणं स्यात्सोपानं निश्रेणिस्त्वधिरोहणी।**
**संमार्जनी शोधनी स्यात्सङ्करोऽवकरस्तथा।।18।।**

* आरोहणस्य (सीढी, सोपान) नामद्वयम्-आरोहणं (नपु.), सोपानं (नपु.) च।

* अधिरोहण्याः (लकड़ी की सीढ़ी) नामद्वयम्- निश्रेणिः (स्त्री.) अधिरोहणी (स्त्री.)।

* सम्मार्जन्याः (झाड़ू) नामद्वयम्- सम्मार्जनी (स्त्री.), शोधनी (स्त्री.)।

* सङ्करस्य (कूडा) नामद्वयम्-सङ्करः (पु.), अवकरः च (पु.)।

* गमनागमनमार्गस्य नामद्वयम्-मुखं (नपु.), निःसरणं च (नपु.)।

* सन्निवेशस्य (ठहरने योग्य सुन्दर स्थान, बस्ती) नामद्वयम्-सन्निवेशः (पु.) निकर्षणः च (पु.)।

**क्षिप्ते मुखं निःसरणं सन्निवेशो निकर्षणम्।**
**समौ संवसथ-ग्रामौ वेश्मभू वास्तुरस्त्रियाम् ।।19।।**

* गमनागमन ..............।

* सन्निवेशस्य ............।

* संवसथस्य (गाँव) नामद्वयम्-संवसथः (पु.), ग्रामः च (पु.)।

* वेश्मभूमेः (घर की भूमि) नामद्वयम्-वेश्मभूः (स्त्री.) वास्तुः (पु. नपु.)

**ग्रामान्त-उपशल्यं स्यात् सीमसीमे स्त्रियामुभौ।**
**घोष आभीरपल्ली स्यात् पक्कणः शबशलयः।।20।।**

* ग्रामसमीपभूमेः नामद्वयमू-ग्रामान्तम् (नपु.), उपशल्यं (नपुं.) च।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* सीमायाः नामद्वयम्-सीमा (सीमन्, स्त्री.) सीमा (स्त्री.) म।
* आभीरपल्लाः (अहीरबस्ती) नामद्वयम्-घोषः (पु.) आभीरपल्ली (स्त्री.) च।
* शबरालयस्य (भीलों की बस्ती) नामद्वयम्-पक्कणः (पु.) शबरालयश्च (पु.)।

## शैलवर्गः

**महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः।**
**अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः।।1।।**

त्रयोदश नामानि पर्वतसामान्यस्य –

(1) महीध्रः (पु.), (2) शिखरी (पु.), (3) क्ष्माभृद् (पु.), (4) अहार्यः (पु.), (5) धरः (पु.), (6) पर्वतः (पु.), (7) अद्रिः (पु.), (8) गौत्रः (पु.), (9) गिरिः (पु.), (10) ग्रावा (पु.), (11) अचलः (पु.), (12) शैलः (पु.), (13) शिलोच्चयः (पु.)।

**लोकालोकश्चक्रवालः त्रिकूटस्त्रिककुत्समौ**
**अस्तस्तु चरमक्ष्माभृत् उदयः पूर्वपर्वतः ।।2।।**

* सप्तद्वीपवत्याः भूमेः पर्वतस्य नामद्वयम् –
(1) लोकालोकः (पु.) (2) चक्रवालः (पु.)
* लङ्काधिष्ठानपर्वतस्य नामद्वयम् –
(1) त्रिकूटः (पु.) (2) त्रिककुद् (पु.)
* पश्चिम पर्वतस्य द्वे नामनी –
(1) अस्तः (पु.) (2) चरमक्ष्माभृत् (पु.)
* उदयाचलस्य द्वे नामनी –
(1) उदयः (पु.) (2) पूर्वपर्वतः (पु.)

**हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रकः।**
**गन्धमादनमन्ये च हेमकूटादयोनगाः।।3।।**

हिमवान् (पु.), निषधः (पु.), विन्ध्यः (पु.), माल्यवान् (पु.), पारियात्रकः (पु.), गन्धमादनः (पु.), हेमकूटः (पु.), आदिशब्दात् मलयः (पु.), दर्दुरः (पु.), चित्रकूटः (पु.), मैनाकः (पु.), सह्यः (पु.)

**पाषण-प्रस्तर-ग्रावोपलाश्मनाः शिला दृषत्।**
**कूटोऽस्त्री शिखरं शृङ्गं प्रपातस्त्वतटो भृगुः।।4।।**

* सप्त पाषणनामानि –
(1) पाषाणः (पु.), (2) प्रस्तरः (पु.), (3) ग्रावा (पु.), (4) उपलः (पु.), (5) अश्मन् (पु.), (6) शिला (स्त्री.), (7) दृषत् (पु.)
* पर्वताग्रस्य त्रीणि नामानि –
(1) कूटः (पु.), (2) शिखरम् (नपु.), (3) शृङ्गम् (नपु.)
* त्रीणि पर्वतात्पतनस्थानस्य नामानि –
(1) प्रपातः (पु.), (2) अतटः (पु.), (3) भृगुः (पु.)

**कटकोऽस्त्री नितम्बोऽद्रेः स्नुः प्रस्थः सानुरस्त्रियौ।**
**उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झरः।।5।।**

* पर्वतमध्यभागस्य मेखलाख्यस्य एकं नाम –
(1) कटकः (पु.)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* पर्वतसमभूभागस्य त्रीणि नामानि –
(1) स्नु : (पु.), (2) प्रस्थ: (पु.), (3) सानु: (पु.)

* जलस्रवणस्य नामद्वयम् –
(1) उत्स: (पु.), (2) प्रस्रवणम्: (नपु.)

* जलप्रवाहस्य द्वे नामनी –
(1) निर्झर: (पु.), (2) झर: (पु.)

**दरी तु कन्दरो वा स्त्री, देवखातबिले गुहा।**
**गह्वरं गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ।।6।।**

* कृत्रिम–गिरिविवरस्य द्वे नामनी –
(1) दरी (स्त्री), (2) कन्दर: (पु.)

* अकृत्रिम–गिरिविलस्य त्रीणि नामानि –
(1) देवखात: (पु.), (2) बिलम् (नपु.), (3) गुहा (स्त्री)

* गिरे: पतितस्थूलपाषाणस्य एकं नाम –
(1)गण्डशैल: (पु.)

**खनिः स्त्रियामाकरः स्यात्, पादाः प्रत्यन्तपर्वताः।**
**उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ।। 7।।**

* रत्नाद्युत्पत्तिस्थानस्य नाम द्वयम् –
(1) खनि: (स्त्री), (2) आकर: (पु.)

* पर्वतसमीपस्थालपपर्वतानां नाम द्वयम् –
(1) पाद: (पु.), (2) प्रत्यन्तपर्वत: (पु.)

* पर्वतस्य अध: भूमे: एकं नाम –
(1) उपत्यका (स्त्री)

* पर्वतस्य ऊर्ध्वासन्नभूमे: एकं नाम –
(1) अधित्यका (स्त्री)

**धातुर्मनः शिलाद्यद्रेः गैरिकं तु विशेषतः।**
**निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे ।।8।।**

* धातो: एकं नाम –
(1) मन: शिला (स्त्री)

* धातुविशेषस्य एकं नाम –
(1) गैरिकम् (नपु.)

* लतादिभि: पिहित–स्थानस्य नामनी द्वे –
(1) कुञ्ज: (पु.), (2) निकुञ्ज: (पु.), कुञ्जम् (नपुं.), निकुञ्जम् (नपुं.)

सिंहादिवर्ग:

* षट्सिंहस्य नामानि –

**सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरि हरिः।**
**शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः ।।1।।**

(1) सिंह:, (2) मृगेन्द्र:, (3) पञ्चास्य:, (4) हर्यक्ष:, (5) केसरी:, (6) हरि: (पु.)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* त्रीणि व्याघ्रस्य नामानि –

(1) शार्दूल:, (2) द्वीपी, (3) व्याघ्र: (पु.)

* द्वे नामनी हुण्डातुरस्य।

(1) तरक्षु: (पु.), (2) मृगादन: (पु.)

* द्वारश नामानि सूकरस्य –

**वराह: सूकरो घृष्टि: कोल: पोत्री किट: किटि:**
**दंष्ट्री घोणी स्तब्धरोमा क्रोडो भूदार इत्यपि ।।2।।**

(1) वराह: (पु.), (2)सूकर: (पु.), (3) घृष्टि: (पु.), (4) कोल: (पु.), (5) पोत्री (पु.), (6) किर: (पु.), (7) किटि: (पु.), (8) द्रष्ट्री (पु.), (9) घोणी, (10) स्तब्धरोमा, (11) क्रोड: (12) भूदार: (पु.)।

* वानरस्य नव नामानि –

**कपिप्लवंगप्लवगशाखामृगवलीमुखा:।**
**मर्कटो वानर: कीशो वनौका: मथभल्लुके ।।3।।**

(1) कपि: (पु.), (2) प्लवंगम: (पु.), (3) प्लवग: (पु.), (4) शखामृग: (पु.), (5) वलीमुख: (पु.), (6) मर्कर: (पु.), (7) वानर: (पु.), (8) कीश:, (9) वनौक:

**ऋक्षाच्छभल्लभालूका: गण्डके खड्गखड्गिनौ।**
**लुलापो महिषो वाहद्विषत्कासरसैरिभा:।।4।।**

* चत्वारि भल्लुकस्य नामानि – (भालु)

(1) ऋक्ष: (पु.), (2) अच्छ: (पु.), (3) भल्ल: (पु.), (4) भालूक:

* त्रीणि गण्डकस्य नामानि – (गंडा)

(1) गण्डक:, (2) खड्ग:, (3) खड्गी

* पञ्च महिषस्य नामनि –

(1) लुलाप:, (2) महिष:, (3)वाहद्विषत्, (4) कासर:, (5) सैरिभ:

* दश जम्बुकस्य नामानि –

**स्त्रियां शिवा भूरिमाय गोमायुमृगधूर्तका:।**
**शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुका: ।।5।।**

(1) शिवा (स्त्री), (2) भूरिमाय:, (3) गोमायु:, (4) मृगधूर्तक: (पु.), (5) शृगाल: (पु.), (6) वञ्चक: (पु.), (7) क्रोष्टु: (पु.), (8) फेरु: (पु.), (9) फेरव: (पु.), (10) जम्बुक: (पु.)

**ओतुर्विडालो मार्जारो वृषदंशक आखुमुक्।**
**त्रयो गौधारगौधेर गौधेया गौधिकात्मजे ।।6।।**

* पञ्च मार्जारस्य नामनि –

(1) ओतु: (पु.), (2) विडाल: (पु.), (3) मार्जर: (पु.), (4) वृषदंशक: (पु.), (5) आखुभुक्

* त्रीणि चन्दनगोहा –

(1) गौधार: (पु.), (2) गौधेर:, (3) गौधेया

**श्वावित्तु शल्य: तल्लोम्नि शलली शललं शलम्।**
**वातप्रमीर्वातमृग: कोक ईहामृगोवृक:।।7।।**

* शल्यस्य (सेह) द्वे नायनी



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(1) श्वावि: (पुं.), (2) शल्य: (पुं.)

* त्रीणि शल्यरोम्णाम् –

(1) तलोम्नि, (2) शलली, शललम्, शलम्

* द्वे मृगभेदस्य नामनी

(1) वातप्रमी: (पुं.), (2) वातमृग: (पुं.)

* वृकस्य त्रीणि नामानि (विग)

(1) कोक: (पुं.), (2) ईहामृग: (पुं.), (3) वृक: (पुं.)

* पञ्च हरिणस्य नामानि –

**मृगे कुरङ्गवातायुहरिणाजिनयोनय:।**
**ऐणेयमेण्याश्चर्माद्यमेणस्यैणमुभे त्रिषु ।।8।।**

(1) मृग: (पुं.), (2) कुरङ्ग: (पुं.), (3) वातायु: (पुं.), (4) हरिण: (पुं.), हरिणी (स्त्री) (5) अजिनयानि: (पुं.)

* हरिणाजिनस्य एकं नाम (त्रिषु लिङ्गेषु) –

(1) एण: (पु.), (2) ऐणी (स्त्री), (3) ऐणेयम् (नपु.)

* षड् मृगभेदा: –

**कदली कन्दली चीनश्चमूरुप्रियकावपि**
**समूरुश्चेति हरिणा अमी अजिनयोनय: ।।9।।**

(1) कदली (पुं.), (2) कन्दली (पुं.), (3) चीन (पुं.), (4) चमूर: (पु.), (5) प्रियक: (पुं.), (6) समूरु: (पुं.)।

* द्वादश मृगभेदा: –

**कृष्णसाररुरुन्यङ्कुरङ्कुशंवररौहिषा:।**
**गोकर्णपृषतैणर्श्यरोहिताश्चमरो मृगा:।। 10 ।।**

(1) कृष्णसार: (पुं.), (2) रुरु: (पुं.), (3) न्यङ्कु: (पुं.), (4) रङ्कु: (पुं.), (5) शम्वर:, (6) रौहिष: (पुं.), (7) गोकर्ण: (पुं.), (8) पृषता (पुं.), (9) ऐण: (पुं.), (10) ऋष्य: (पुं.), (11) रोहित: (पुं.), (12) चमर: (पुं.)

* **पशुजातय:**

**गन्धर्व: शरभो राम: सृमरो गवय: शश:।**
**इत्यादयो मृगेन्द्राद्या गवाद्या: पशुजातय: ।।11।।**
**उन्दुरुर्मूषिकोऽप्याखु: गिरिका बालमूषिका।**
**सरट: कृकलास: स्यान्मुशली गृहगोधिका ।।12।।**

* मूषिकस्य त्रीणि नामानि

(1) उन्दु: (पुं.), (2) मूषिक: (पुं.), (3) आखु: (पुं.)

* द्वे स्वल्पमूलकजाते: नायनी (गिलहरी)

(1) गिरिका, (2) बालमूषिका (स्त्री.)

* द्वे सरटस्य नामनी (छिपकली) (पुं.)

(1) सरट:, (2) कृकलास:

* द्वे गृहगोधाया: नामनी (विच्छुतमा)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(1) मुसली, (2) गृहगोधिका (स्त्री.)

**लूता स्त्री तन्तुवायोर्णनाममर्कटका समाः।**
**नीलङ्गुस्तु क्रिमिः कर्णजलौका शतपद्युभे ।।13।।**

* चत्वारि ऊर्णनाभस्य नामानि (मकडी)
  (1) लूता (स्त्री), (2) तन्तुवायः (पुं.), (3) ऊर्णनाभः, (4) मर्कटकः (पुं.)
* द्वे सुनकीडा
  (1) नीलङ्ग (पुं.), (2) क्रिमिः
* द्वे कर्णजलौकायाः नामनी (गोणर)
  (1) कर्णजलौका, (2) शतपदी

**वृश्चिकः शूककीटः स्यादलिद्रुणौ तु वृश्चिके ।।14।।**

* द्वे ऊर्णादिभक्षक कृमिविशेषस्य द्वे नामनी
  (1) वृश्चिकः (पुं.), (2) शूककीटः (पुं.)
* त्रीणि वृश्चिकस्य नामानि
  (1) आलिः (पुं.), (2) द्रोणः (पुं.), (3) वृश्चिकः (पुं.)

**पारावतः कलरवः कपोतोऽथ शशादनः।**
**पत्त्री श्येनः उलूके तु वायसारातिपेचकौ ।।15।।**

* त्रीणि पारावतस्य नामानि –
  (1) पारावतः (पुं.), (2) कलरवः(पुं.) (3) कपोतः (पुं.)
* श्येनस्य त्रीणि नामानि (वाण)
  (1) पत्त्री (पुं.), (2) श्येनः (पुं.), (3) शशादनः (पुं.)
* उलूकस्य त्रीणि नामानि
  (1) उलूकः (पुं.) (2) वायसारातिः (पुं.), (3) पेचनः (पुं.)

**व्याघ्राटः स्याद्भरद्वाजः खञ्जरीटस्तु खञ्जनः।**
**लोहपृष्ठस्तु कङ्कः स्यादथ चाषः किकीदिविः ।।16।।**

* भरद्वाजपक्षिणः द्वे नामनी
  (1) व्याघ्राटः, (2) भरद्वाजः
* खञ्जनपक्षिणः द्वे नामनी
  (1) खञ्जरीटः, (2) खञ्जनः
* कंकस्य द्वे नामनी
  (1) लोहपृष्ठः, (2) कङ्कः
* चाषस्य द्वे नामनी (चास)
  (1) चाषः, (2) किकीदिविः

**कलिङ्गभृङ्गधूम्याटाः अथ स्याच्छतपत्रकः।**
**दार्वाघाटः अथशारङ्गः स्तोककश्चातकः समाः।।**
**कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः ।।17।।**

* भृङ्गस्य त्रीणि नामानि
  (1) कलिङ्गः (पुं.), (2) भृङ्गः (पुं.), (3) धूम्याटः (पुं.)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* काष्टकुट्टस्य नामद्वयम् (काठकोटा) (पुं.)
(1) दार्वाघाट: (पुं.), (2) शतपत्रक: (पुं.)
* त्रीणि चातकयक्षिण: नामानि (पपिहा)
(1) शारङ्ग: (पुं.), (2) स्तोकक: (पुं.), (3) चातक: (पुं.)
* चत्वारि कुक्कुटस्य नामानि –
(1) कृकवाकु: (पुं.), (2) ताम्रचुड: (पुं.), (3) कुक्कुट: (पुं.), (4) चरणायुध: (पुं.)

**चटक: कलविङ्क: स्यात्तस्य स्त्री चटका तयो:।**
**पुमपत्ये चाटकैर: रुयपत्ये चटकैव हि ।।18।।**
**कर्करेटु: करेटु: स्यात्कृकणक्रकरौ समौ।**
**वनप्रिय: परभृत: कोकिल: पिक इत्यपि ।।19।।**

* चटकस्य नामद्वयम् –
(1) चटक: (पु.) (2) कलविङ्क: (पुं.), चटका (स्त्री.)
* अशुभादिपक्षिभेदद्वयम्
(1) कर्करेटु: (पुं.), (2) करेटु: (पुं.)
* कोकिलस्य नामचतुष्टयम् – (कोमल)
(1) वनप्रिय: (पुं.), (2) परभृत: (पुं.), (3) कोकिल: (पुं.), (4) पिक: (पुं.)
* दश काकस्य नामानि

**काके तु करटारिष्टबलिपुष्टसकृत्प्रजा:**
**ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा: अपि ।।20।।**

(1) काक: (पु.) काका (स्त्री), (2) करट: (पुं.), (3) अरिष्ट: (पुं.), (4) बलिपुष्ट: (पुं.), (5) सकृत्प्रजा (पुं.), (6) ध्वाङ्क्ष: (पुं.), (7) आत्मघोष: (पुं.), (8) परभृद् (पुं.), (9) वलिभुक् (पुं.), (10) वायस: (पुं.)

**द्रोणकाकस्तु काकोल: दात्युह: कालकण्टक:।**
**आतायिचिल्लौ दाक्षाय्यगृध्रौ कीटशुकौ समौ ।।21।।**

* डोडकाकद्वयम् –
(1) द्रोणकाक: (पुं.), (2) काकोल: (पुं.)
* द्वे दात्यूहस्य नामनी
(1) दात्यूह: (पुं.), (2) कालकण्ठक: (पुं.)
* चीलस्य नामद्वयम् –
(1) आतायी (पुं.), (2) चिल्ल: (पुं.)
* गृध्रस्य नामद्वयम्
(1) दाक्षाय्य:, (पुं.) (2) गृध्र: (पुं.)
* शुकस्य नामद्वयम्
(1) कीर: (पुं.), (2) शुक: (पुं.)

**क्रुङ् क्रौञ्चोऽथ बक: कह्व: पुष्कराह्वस्तु सारस:।**
**कोकश्चक्रश्चक्रवाको रथाङ्गाह्वयनामक: ।।22।।**

* क्रौञ्चस्य नामद्वयम् –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(1) क्रुङ् (पुं.), (2) क्रौञ्चः (पुं.)

* वकस्य नामद्वयम्

(1) वकः (पुं.), (2) कह्वः (पुं.)

* सारसस्य नामद्वयम्

(1) पुष्करः, (2) सारसः

* चक्रवाकस्य नाम चतुष्टयम् (चम् वा)

(1) कोकः (पुं.), (2) चक्रः (पुं.), (3) चक्रवाकः (पुं.), (4) रथाङ्गाह्वयः (पुं.)

**कादम्बः कलहंसः स्यादुत्क्रोशकुररौ समौ।**
**हंसास्तु श्वेतगरुतश्चक्राङ्गा मानसौकसः ।।23।।**

* कादम्बस्य नामद्वयम् (वतक)

(1) कादम्बः (पुं.), (2) कलहंसः (पुं.)

* कुरस्य नामद्वयम्

(1) उत्क्राशः (पुं.), (2) कुररः (पुं.)

* हंसस्य चत्वारि नामानि

(1) हंसः (पुं.), (2) श्वेतगरुतः (पुं.), (3) चक्राङ्गः (पुं.), (4) मानसौकः (पुं.)

* राजहंसस्य एकं नाम

**राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः**
**मलिनैर्मल्लिकाख्यास्ते धार्तराष्ट्राः सितेतरैः ।।24।।**

* कृष्ण चञ्चुचरणहंसस्य एकं नाम –

धृतराष्ट्रः (पुं.)

**शरारिराटिराडिश्च बलाका विसकण्ठिका ,**
**हंसस्य योषिद्वरटा, सारसस्य तु लक्ष्मणा ।।25।।**

* वकभेदस्य द्वे नामनी

वलाका विसकण्ठिका (स्त्री.)

**जतुकाऽजिनपत्रा स्यात्, परोष्णी तैलपायिका।**
**वर्वणा मक्षिका नीला, सरघा मधुमक्षिका ।।26।।**

* जतुकायाः द्वे नामनी

(1) जतुका (स्त्री.), (2) अजिनपत्रा (स्त्री.)

* पिप्पिलिकायाः द्वे नामनी –

(1) परोष्णी (स्त्री.), (2) तैलपायिका (स्त्री.)

* नीलवर्णमक्षिकायाः द्वे नामनी

(1) वर्वणा (स्त्री.), (2) मक्षिका नीला (स्त्री.)

* मधुमक्षिकायाः द्वे नामनी –

(1) सरघा (स्त्री.), (2) मधुमक्षिका (स्त्री.)

**पतङ्गिका पुत्तिका स्यात्, दंशस्तु वनमक्षिका।**
**दंशी तज्जातिरल्पा स्याद्, गन्धोली वरटा द्वयोः ।।27।।**

* विशेषमधुमक्षिकायाः द्वे नामनी –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

(1) पतङ्गिका (स्त्री.), (2) पुत्तिका (स्त्री.)

* वनमक्षिकाया: द्वे नामनी –

(1) वनमक्षिका (स्त्री.), (2) दंश: (पुं.)/दंशी (स्त्री.)

* वरटाया: द्वे नामनी –

(1) गन्धोली (स्त्री.), (2) वरटा/वरटी (स्त्री.)

**भृङ्गरी चीरुका चीरी झिल्लिका च समा: इमा:।**
**समौ पतङ्गशलभौ खद्योतो ज्योतिरिङ्गण: ।।28।।**

* झिल्लिकाया: चत्वारि नामानि –

(1) भृङ्गारी (स्त्री.), (2) चीरुका (स्त्री.), (3) चीरी (स्त्री.), (4) झिल्लिका (स्त्री.)

* पतङ्गस्य द्वे नामनी –

(1) पतङ्ग: (पुं.), (2) शलभ: (पुं.)

* खद्योतस्य नामद्वयम् –

(1) खद्योतो (पुं.), (2) ज्योतिरिङ्गन् (पुं.)

* भ्रमरस्य एकादश नामानि –

**मधुव्रतो मधुकरो मधुलिण्यमधुपालिन:।**
**द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालय:।।29।।**

(1) मधुव्रत: (पुं.), (2) मधुकर: (पुं.), (3) मधुलिट् (पुं.), (4) मधुप: (पुं.), (5) द्विरेफ: (पुं.), (6) पुष्पलिट् (पुं.), (7) भृङ्ग: (पुं.), (8) षट्पद: (पुं.), (9) भ्रमर: (पुं.), (10) अलि: (पुं.), (11) अल: (पुं.)

* मयूरस्य नव नामानि –

**मयूरो बर्हिणो वर्ही नीलकण्ठो भुजङ्गभुक्।**
**शिखावल: शिखी केकी मेघनादानुलास्यपि ।।30।।**

(1) मयूर: (पुं.), (2) बर्हिण: (पुं.), (3) वर्ही (पुं.), (4) नीलकण्ठ: (पुं.), (5)भुजङ्गभुक्(पुं.), (6) शिखावल: (पुं.), (7) शिखी (पुं.), (8) केकी (पुं.), (9) मेघनादानुलासी (पुं.)।

**केकावाणी म०यूरस्य, समौ चन्द्रकमेचकौ।**
**शिखा चूडा शिखण्डश्य पिच्छवर्हे नपुंसके ।।31।।**

* मयूरस्य वाणी – केका
* मयूरस्य शिखा – चूडा
* मयूरपिच्छस्य त्रीणि नामानि

(1) शिखण्ड: (पुं.), (2) पिच्छम् (नपुं.), (3) बर्हम् (नपुं.)

**खगे विहंगविहगविहंगमविहायस:।**
**शंकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजा: ।।32।।**
**पतत्रिपत्त्रिपतगपतत्पत्त्ररथाण्डजा:।**
**नगौकोवाजिविकिरविविष्किर पतत्रय: ।।33।।**
**नीडोद्भवा गरुत्मन्त: पित्सन्तो नभसंगमा:।**
**तेषां विशेष हारीरीतो मङ्गु: कारण्डव: प्लव: ।।34।।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पक्षिमात्रस्य नामानि सप्तविंशतिः।

(1) खगः (पुं.), (2) विंहगः (पुं.), (3) विहगः (पुं.), (4) विहगंमः (पुं.), (5) विहायसः (पुं.), (6) शकुन्निः (पुं.), (7) सक्षि (8) शकुनिः (पुं.), (9) शकुन्तः (पुं.), (10) शकुनः (पुं.), (11) द्विजः (पुं.), (12) पतत्रि (पुं.), (13) पत्री (पुं.), (14) पतगः (पुं.), (15) पतत्पत्री (पुं.), (16) अण्डजः (पुं.), (17) नगौकः (पुं.), (18) वाजी (पुं.), (19) विकिरः (पुं.), (20) विविष्करः (पुं.), (21) पतत्री (पुं.), (22) नीडोद्भा (पुं.), (23) गरुत्मन् (पुं.), (24) पित्सन्तः (पुं.), (25) नभसंगमः (पुं.)



Downloaded from https:// www.studiestoday.com